नीचे गिरता है ॥ ३३ ॥ तूने देनेको कहकर फिर हमको नहीं दिया और कपट किया, इसलिये झूठका फल यही है कि आप कुछ दिन नरकका भोग कीजिये ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणे अष्टम-स्कन्धे बलिनिग्रहो नामैकविंशोऽध्यायः ॥ २१ ॥ दोहा-सुतल लोक पठयो बलिहि, प्रभु दीनो वरदान। सो बाइस अध्यायकी, कथा सकल जग जान ॥ श्रीशुकदेवजी बोले कि हे राजन् ! इस प्रकार अंगीकार किये हुए राजा बलिको इस तरह भगवान्ने चलायमान भी किया तथापि अविचलित चित्तसे वह राजा बलि वक्ष्यमाण अविक्लव वचन बोला ॥ १ ॥ राजा बलिने ने कहा कि, हे उत्तमश्लोक भगवन् ! मेरी कही हुई प्रतिज्ञा असत्य नहीं है, आपने ही पहले कपटका आश्रय ले वामनरूप बनकर मुझसे भिक्षा मांगी और इस समय दूसरा रूप धारण किया। अच्छा जो इस प्रकारसे भी आप मेरी (प्रतिज्ञा)

विप्रलब्धो ददामीति त्वयाऽहं चाढ्यमानिना ॥ तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित्समाः ॥३४॥ इति श्रीभागवते महा० अष्टम० बलिनिग्रहो नामैकविंशोऽध्यायः ॥ २१ ॥ श्रीशुक उवाच ॥ एवं विप्रकृतो राजन्बलिर्भगवताऽसुरः ॥ भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥ १ ॥ बलिरुवाच ॥ यद्युत्तम श्लोक भवान्ममेरितं वचोव्यलीकं सुरवर्य मन्यते ॥ करोम्यृतं तन्नभवेत्प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥ २ ॥ बिभेमि नाहं निरयात्पदच्युतो न पाशबन्धाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद् भृशमुद्विजे यथा ॥ ३ ॥ पुंसां श्लाघ्यतमं मन्ये दण्डमर्हत्तमार्पितम् ॥ यं न माता पिता भ्राता सुहृदश्चादिशन्ति हि ॥ ४ ॥

बातको झूठ मानें, तो भी मैं अपना वचन पूर्ण करता हूं। हमारा वचन ठगाईका नहीं हो सकता, आपने दो चरण तो माप ही लिये, तीसरे चरण का स्थान नहीं पाया, अतः मैं अपना मस्तक झुकाता हूँ, इसपर यह अपना चरणकमल रखिये, क्योंकि मैं सब लोगोंका राजा हूं, तब क्या मेरा शरीर एक चरणके बराबर भी न होगा ॥ २ ॥ हे महाराज ! जिस प्रकार मैं अपकीर्तिसे डरता हूँ वैसा नरकसे, वरुणकी फांसीसे, अत्यन्त भयंकर विपत्तिसे नहीं डरता और धन के कष्टसे अथवा राज्यभ्रष्ट होनेसे भी मैं वैसा नहीं डरता ॥ ३ ॥ हे भगवन् ! आपका किया हुआ यह दण्ड अपकीर्तिका कारण नहीं है, क्योंकि माननीय पुरुष जो दण्ड देते हैं, वह तो वाञ्छनीय है, क्योंकि

माता अथवा पिता वा भ्राता किंवा सुहृद् लोग ऐसा दण्ड नहीं दे सकते, इस कारण आप हमारे हितैषी हैं, वह दण्ड जो दिया इससे तो मैं बड़ाईके ही योग्य हुआ ॥ ४ ॥ हे भगवन् ! आप वास्तव में शत्रुके रूपसे प्रगटे हैं, प्ररंतु यथार्थ आप शत्रु नहीं हैं, नहीं तो हम असुरलोगोंके भी आप ही परम गुरु हैं, क्योंकि हम लोग महामदसे अन्धे हो रहे थे, आपने हमारी ममताका नाश करनेके लिये हमारे ज्ञान के नेत्र खोल दिये ॥५॥ अहो ! जिनसे वैर बांधकर अनेक असुरगण सिद्धिको प्राप्त हो गये और जिनको केवल एकान्तयोगी लोग ही प्राप्त होते हैं ॥ ६ ॥ अनेक कर्मकारी उन्हीं परमगुरु करके हमको दंड मिला और वरुणकी फांसीसे बँधे तो फिर इससे हमको लाज अथवा दुःख क्या हो सकता है ? बस, इस बंधनसे न मैं दुःखी हूं न लज्जित हूं ॥ ७ ॥ हे भगवन् ! मेरे ऊपर जो आपने दण्डरूप यह अनुग्रह किया,

त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः ॥ यो नोऽनेकमदान्धानां विभ्रंशं चक्षुरादिशत् ॥ ५ ॥ यस्मिन्वैरानुबन्धेन रूढेन विबुधेतराः ॥ बहवो लेभिरे सिद्धिं यामुहैकान्तयोगिनः ॥ ६ ॥ तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ॥ ७ ॥ पितामहो मे भवदीयसंमतः प्रह्राद आविष्कृतसाधुवादः ॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ॥ ८ ॥ किमात्मनाऽनेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥९॥ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम् ॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तम ॥१०॥

मैं इसका अधिकारी नहीं था, आपने अपने भक्तका पोता (नाती) जानकर मुझपर यह अनुग्रह किया, हमारे पितामह प्रह्लादजी आपके परमप्रीतिपात्र हैं उनके साधुपन को सबही जानते हैं, आप उनके पराश्रय थे। यद्यपि वह आपके शत्रु अपने पिता हिरण्यकशिपु करके अद्भुत पीडाको प्राप्त हुए थे ॥८॥ तो भी यह विचार करके कि आयु के शेष में आत्मीय नामधारी चोररूपी जो पुत्रादि हैं; वे जो देहको छोड़कर चले जायँगे, उस देह से क्या फल ? और स्त्री संसारकी हेतुभूत है, इससे भी कुछ फल नहीं और घरसे भी क्या प्रयोजन है ? क्योंकि इससे केवल आयुका क्षय होता है, सुख कुछ नहीं है ॥ ९ ॥ हे सत्तम ! अगाध बोधसम्पन्न हमारे पितामह प्रह्लादजी ऐसा निश्चय करके, यद्यपि आप उनके पक्ष (पितादि निशिचरों) के क्षयकारी थे, तथापि स्वजनसे भीत होते हुए जहांपर किसी ओरसे भयकी

संभावना नहीं और जो ध्रुव हैं, ऐसे आपके चरणकमलकी शरणको प्राप्त हुए थे ॥ १० ॥ हे भगवन् ! इस समय दैव करके मैं भी अपने शत्रु आपकी शरण आया हूँ, यह दैव हमसे अति अनुकूल है, क्योंकि बलात्कार इसने हमसे उस सम्पत्तिका त्याग कराया है, जिस सम्पत्ति से पुरुष स्तब्धमति हो मृत्युके निकट आनेपर भी इस जीवन को अनित्य नहीं समझता है ॥ ११ ॥ श्रीशुकदेवजी बोले कि हे कुरुश्रेष्ठ ! असुरश्रेष्ठ राजा बलि इस प्रकार कह रहा था कि इतने में ही भगवद्भक्त प्रह्लादजी पूर्ण चन्द्रमा समान आकाशसे उदय हो दैत्यराज बलिके निकट आकर उपस्थित हुए ॥१२॥ श्रीप्रह्लादजी के दोनों नेत्र कमलदलके समान बड़े-बड़े थे, श्यामवस्त्र धारण किये हुए थे, दोनों भुजायें अत्यन्त लम्बायमान थीं; वे अति ऊँचे थे, रंग श्याम था, अपनी कांतिसे विराजमान हो रहे थे, इस प्रकारसे पितामह महात्मा प्रह्लादजी

अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः ॥ इदं कृतान्तान्तिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥ ११ ॥ श्रीशुकउवाच ॥ तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ॥ आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥ १२ ॥ तमिन्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम् ॥ प्रांशुं पिशङ्गाम्बरमञ्जनत्विषं प्रलम्बबाहुं सुभगं समैक्षत ॥ १३ ॥ तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणं नोपजहार पूर्ववत् ॥ ननाम मूर्ध्नाऽश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥१४॥ तत्र हासीनमुदीक्ष्य सत्पतिं सुनन्दनन्दाद्यनुगैरुपासितम् ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविह्वलः ॥ १५ ॥

को राजा बलिने देखा ॥१३॥ परन्तु वरुणजीकी फांसीमें बँधनेके कारण पहलेके समान भेंट देकर राजा बलि उनकी पूजा नहीं कर सका, आंखोंमें आंसू भरकर और शिर झुका केवल प्रणाम करने लगा । हे राजन् ! उस समय ऐसा जान पड़ा कि राजा बलिको अपने किये हुए अहंकारादि अपराधका स्मरण हुआ कि जिससे वह लाजके कारण चुपचाप मस्तक नवाकर रह गया ॥१४॥ हे राजन् ! सुनन्दादि पार्षदोंसे पूजित जगत्पति भगवान् हरिको राजा बलिके निकट बैठा हुआ देखकर प्रह्लादजीने विचारा कि इसके ऊपर निःसंदेह भगवान्का अनुग्रह हुआ है, इसलिये यह महात्मा पुलकावलीसे पूर्ण व अश्रुजलसे पूर्ण हो मस्तक झुकाकर वारंवार नमस्कार करते-करते भगवान्के

भा० अ० निकट गये और निकट जाकर शिर झुकाकर प्रणामकर बैठ गये ॥१५॥ श्रीप्रह्लादजी बोले कि हे भगवन्! आपने ही बलिको इन्द्रपदवी दी
॥ ६६ ॥ और आपने ही ले ली। आपने इसके इन्द्रपदको हरण नहीं किया, बरन् अपना पद फिर ग्रहण कर लिया, यह अच्छा नहीं हुआ।
मैं अनुमान करता हूं, कि इस पर आपका बड़ा ही अनुग्रह हुआ है, क्योंकि ऐश्वर्य और सम्पत्ति आत्माको मोह करनेवाली हैं, यह इससे छूट गया ॥ १६ ॥ हे भगवन्! ऐश्वर्य व सम्पत्तिके मोहकी वार्त्ता क्या कहूँ! इससे विद्यावान पुरुष भी मोहित हो जाते हैं, इस लिये सम्पत्ति रहनेपर कोई पुरुष भली-भांति आत्मतत्त्वको नहीं देख सकता, आपने बलि की सम्पत्ति लेकर इसपर बड़ा ही अनुग्रह प्रकट किया। आप महा करुणाकर हैं, जगदीश्वर अखिल लोकके साक्षी नारायण हैं, मैं आपको वारंवार नमस्कार करता हूँ। श्रीशुकदेवजी

प्रह्लाद उवाच ॥ त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम्॥मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ १६ ॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ॥१७॥ श्रीशुक उवाच ॥ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृताञ्जलेः ॥ हिरण्यगर्भो भगवानुवाच मधुसूदनम् ॥१८॥ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला ॥ प्राञ्जलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप ॥ १९ ॥ विन्ध्यावलिरुवाच ॥ क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर-ईश कुर्युः ॥ कर्तुः प्रभोस्तव किमस्यतआवहन्ति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥ २० ॥

बोले कि हे परीक्षित्! इसके पीछे हिरण्यगर्भ ब्रह्माजी हाथ जोड़कर खड़े हुए, उन प्रह्लादजीके सामने ही उन वामनरूपी मधुसूदनसे कुछ कहनेकी इच्छा करने लगे ॥ १७ ॥ १८ ॥ हे राजन्! उसी समय राजा बलिकी स्त्री विंध्यावली भगवान्से कुछ कहनेके लिये आयी, इस
भा० टी० कारण ब्रह्माजी उसका सम्मान करनेके लिये कुछ देर चुपचाप रहे। बलिकी स्त्री विंध्यावली पतिको बँधा हुआ देखकर भयके कारण
अ० २२ व्याकुल हो गयी, फिर हाथ जोड़ नीचेको मुख कर यह वचन कहने लगी ॥ १९ ॥ विंध्यावली बोली कि हे ईश! आपने अपनी क्रीडाके लिये यह जगत् बनाया है, परन्तु दुर्बुद्धि लोग इसमें अपना अपना स्वामीपन कल्पित किया करते हैं। हे भगवन्! आप त्रिजगत्की सृष्टि, स्थिति और संहारके करनेवाले हैं, कोई दूसरा आपको इस जगत्में क्या देगा? जो लोग कहते हैं, "*कि हमने आपको समर्पण*

किया " उनको लज्जा नहीं है, "हम स्वतंत्र हैं" उनमें केवल यही वाद आपने अवरोपित किया ॥ २० ॥ हे राजन् ! विंध्यावलीके इन वचनोंका तात्पर्य यह है कि इस हमारे स्वामीने आपसे जो यह कहा कि हमने आपको तीनों लोक अर्पण कर दिये हैं और तीसरे चरणके पूर्ण करनेको अपनी देहका देना कहा, सो इन्होंने देहादिमें अपना स्वामीपन जानकर जो कुछ कहा उससे निर्लज्जता ही प्रकाशित होती,है क्योंकि आप सर्वव्यापी हैं,इसलिये मन्दबुद्धिवाले इस राजाको आप कृपा करके छोड़ दीजिये॥२१॥यद्यपि भगवान् प्रह्लाद और रानी विन्ध्यावलीके दीन वचनोंसे प्रसन्न हो गये, तथापि ब्रह्माजीने लोभ दिखानेके लिये बहुत सारी विनती और प्रार्थना करके कहा कि हे भूत-भावन ! हे भूतेश ! हे देवदेव ! हे जगन्मय ! आप राजा बलिका सर्वस्व हरण कर लिया, अब इसको दण्ड न देकर छोड़ दीजिये

ब्रह्मोवाच ॥ भूतभावन भूतेश देवदेव जगन्मय ॥ मुञ्चै नं हृतसर्वस्वं नायमर्हति निग्रहम् ॥ २१ ॥ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ॥ निवेदितं च सर्वस्वमात्माऽविक्लवया धिया ॥ २२ ॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ॥ अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्ति-मृच्छेत् ॥ २३ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहम् ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥ २४ ॥

॥ २१ ॥ २२ ॥ हे भगवन् ! यह असुरवर श्रेष्ठबुद्धिवाला है और इसने अपने कर्मसे प्राप्त किये सब लोकोंको दान कर दिया है, जिसने अकातर होकर प्रथम सर्वस्व और पीछे अपना देहतक अर्पण कर दिया वह फिर दण्ड पानेके योग्य नहीं हो सकता । हे भगवन् ! लोकोंमें शठताईको छोड़ जो आपके चरणामृतको पान करता है वह दूबके अंकुरोंके दान करनेसे भी उत्तम गतिको पाता है, फिर यह राजा बलि, कि जिसने क्लेशरहित होकर आपको त्रिलोकी दान कर दिया, फिर भी क्या यह दण्ड पानेके योग्य हो सकता है ? ॥ २३ ॥ श्री भगवान् बोले कि हे ब्रह्मन् ! हम जिसके ऊपर अनुग्रह करते हैं, प्रथम उसके धनका नाश कर देते हैं, क्योंकि धनसे ममता उत्पन्न होती है, इससे पुरुष नम्रता रहित हो सब लोकोंको और मुझको भी कुछ नहीं समझता, इस कारण मदके दूर करनेके लिये सब धनका हरण करना ही

अनुग्रह है ॥ २४ ॥ और जीवात्मा सदा परवश होकर अपने कर्मोंकरके कृमिकीटादि अनेक योनियोंमें भ्रमण करता हुआ फिर पौरुषी गतिको प्राप्त होता है, अर्थात् पुरुष होकर जन्मता है ॥ २५ ॥ जो उस पुरुषजन्ममें जन्म, कर्म, वयस, सत्य, विद्या, ऐश्वर्य और धनादिसे उसको स्तंभ (गर्व) न हुआ तो मेरा बड़ा ही अनुग्रह है ॥ २६ ॥ हमने ध्रुवादिकोंको जो सम्पत्ति दानकी है, उसमें एक कारण है, जो हमारे भक्त हैं वे अनम्रतादिके लिये भूत और सर्व प्रकार भलाईके प्रतिकूल जन्मादिके होनेपर भी कभी मोहित नहीं होते, इसलिये हम भक्तकी इच्छासे सम्पदा देते हैं, अभक्त सम्पदासे मोहित हो जाता है, इसलिये उसपर अनुग्रह हम सब सम्पदा हरण करके करते हैं ॥ २७ ॥ हे ब्रह्मन् ! यह दानव (बलि) दैत्यलोगोंका अगुआ और कीर्तिका बढ़ानेवाला है, इसने दुर्जयमायाको जीत लिया है, इसलिये यह खेदको

यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः ॥ नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ॥ २५ ॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवेत्स्तम्भस्तत्रायं मदनुग्रहः ॥२६॥ मानस्तम्भनिमित्तानांजन्मादीनां समन्ततः ॥ सर्वश्रेयः प्रतीपानां हन्त मुह्येन्न मत्परः ॥ २७ ॥ एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः ॥ अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥ २८ ॥ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः ॥ २९ ॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तोमया धर्मो नायं त्यजति सत्यवाक् ॥ ३० ॥ एष मे प्रापितः स्थानं दुष्प्रापममरैरपि ॥ सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः ॥ ३१ ॥

प्राप्त होकर भी मोहित नहीं होता है ॥ २८ ॥ यह निर्धन हो गया स्थानसे भ्रष्ट हो गया, शत्रुसे बांधा गया, झिझकारा गया और इसके जातिवालोंने इसको छोड़ दिया व इसने अनेक प्रकारकी यातना भी पायी; अधिक करके इसके गुरु शुक्राचार्यजीने भी इसको बहुत धमकाया, शाप भी दिया, तो भी इसने अपने सङ्कल्पको नहीं छोड़ा ॥ २९ ॥ मैंने छलकरके जो धर्म इसको बताया उसको भी यह नहीं छोड़ता, इससे यह पुरुष अतिशय भक्तिमान् और सत्यवादी है ॥ ३० ॥ ऐसी निष्ठा रखनेके लिये मैंने भी इसको ऐसा स्थान दिया है कि जो देवता लोगोंको भी नहीं मिल सकता । अब हमने इस बलि का आश्रय लिया, यह बलि सावर्णि-मन्वन्तरमें इन्द्र

होगा ॥ ३१ ॥ जबतक वह सावर्णिमन्वन्तर न आये, तबतक यह विश्वकर्माजीके बनाये सुतल लोकमें जाकर वास करे। यह स्थान साधारण नहीं है, जो लोग वहां पर वास करते हैं, हमारी दृष्टिके पड़नेसे उनको आधि, व्याधि और थकावट कभी नहीं होती है ॥३२॥ हे राजन्! ब्रह्माजीको इस प्रकारसे उत्तर देकर भगवान् फिरकरुणा परायण होकर राजा बलिसे बोले कि हे इन्द्रसेन! हे महाराज! तुम्हारा मंगल हो तुम अपने सब जातिवालोंके साथ सुतललोकको चले जाओ कि जिसे स्वर्गके रहनेवाले भी चाहते हैं ॥ ३३ ॥ उस स्थानमें लोकपालगण भी तुम्हारा पराभव नहीं कर सकेंगे, फिर दूसरेकी तो बात ही क्या है! जो दैत्यलोग तुम्हारी आज्ञाको न

तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितम् ॥ यन्नाधयो व्याधयश्च क्लमस्तन्द्रा पराभवः ॥ नोपसर्गा निवसतां संभवन्ति ममेक्षया ॥ ३२ ॥ इन्द्रसेन महाराज याहि भो भद्रमस्तु ते ॥ सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥ ३३ ॥ न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे ॥ त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ॥ ३४ ॥ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम् ॥ सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान् ॥ ३५ ॥ तत्र दानवदैत्यानां सङ्गात्ते भाव आसुरः ॥ दृष्ट्वा मदनुभावं वै सद्यः कुण्ठो विनङ्क्ष्यति ॥ ३६ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे बलिवामनसंवादो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

मानेंगे, उनका संहार हमारे चक्रसे हो जायगा ॥ ३४ ॥ सब सामग्रीके साथ और सब सेवकोंके साथ हम तुम्हारी रक्षा करेंगे। हे वीर! क्या हमारे वियोगके मारे तुम वहां जानेकी इच्छा नहीं करते? हम सत्य ही सत्य कहते हैं कि हमको तुम सदा उस स्थानमें देखोगे ॥३५॥ वहां दैत्यदानवोंके संग रहनेसे हुआ जो तुम्हारा असुरभाव वह मेरे प्रभावको देखकर उसी समय नष्ट हो जायगा * ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे भाषाटीका बलिवामनसंवादो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

* शंका–ऐसा कौन लोक है कि, जिसमें देवता भी बड़े क्लेशसे जा सकते हैं? और उसी लोकको एक क्षणमें राजा बलि चला गया, जो कभी स्वर्ग लोकको बलि गया तो स्वर्गलोक देवताओं का है और जो सुतल लोकको गया तो सुतल लोक नागोंका है ।

उत्तर—वामन भगवान्ने जिस समय राजा बलिसे दान लिया तो उसी समय बलि जीता था तो भी संसारसे मुक्त कर दिया था, चाहे तो संसारमें रहे चाहे योगियोंके लोकको जाय, ऐसे लोकको देवता लोग बड़े दुःखसे भी नहीं जा सके, इसलिये शुकदेवजीने कहा कि जिस लोकको बलि गया वह लोकदेवताओंको भी प्राप्त नहीं होता ॥

भा० अ० ॥ ६८ ॥ दोहा–सुतल लोकको बलि गये, इन्द्र मिल्यो सुरलोक । सो तेइस अध्यायमें, पढ़कर होहु विशोक ॥ श्रीशुकदेवजी बोले कि हे नृपोत्तम ! पुरातनपुरुष भगवान्‌ने जब इस प्रकारसे कहा, तब समस्त साधुसम्मत महानुभाव राजा बलिके दोनों नेत्र आँसुओंकी कलाओंसे आकुल हो गये । वह भक्तिसे उत्कंठित हो हाथ जोड़कर गद्गद स्वरसे श्रीभगवान्‌से कहने लगा ॥ १ ॥ राजा बलि बोला कि अहो ! आपके प्रति नमस्कार करनेकी कैसी आश्चर्यमय महिमा है ? इसके लिये उद्यम करते ही भक्तजनोंके कार्य सिद्ध हो जाते हैं, आपको नमस्कार करनेके उद्यमने इस अधम असुरको भी उस अनुग्रहका दान किया, कि जो लोकपालोंको भी नहीं मिल सकता । हे भगवन् ! आप परमेश्वर हैं मैं अति अवस्तु हूँ; मैं भला क्या आपको त्रिलोकीका दान दूंगा ? बरन् मैंने तो आपको भली-भाँति प्रणाम भी

श्रीशुक उवाच ॥ इत्युक्तवन्तं पुरुषं पुरातनं महानुभावोऽखिलसाधुसम्मतः ॥ बद्धाञ्जलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत् ॥ १ ॥ बलिरुवाच ॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः ॥ यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥ ३ ॥ एवमिन्द्राय भगवान् प्रत्यानीय त्रिविष्टपम् ॥ पूरयित्वाऽदितेः काममशासत्सकलं जगत् ॥ ४ ॥

नहीं किया, केवल प्रणाम करनेको उद्यम किया है, सो इतने ही उद्यमका ऐसा माहात्म्य है कि करोड़ों तप और दान करनेसे जो अनुग्रह प्राप्त नहीं हो सकता, वह मुझको मिल गया । हे महाराज ! आपके प्रणाम करनेका माहात्म्य अति आश्चर्यमय है ॥ २ ॥ श्रीशुकदेवजी कहते हैं कि हे परीक्षित् ! असुरश्रेष्ठ राजा बलिने इस प्रकार कहकर भगवान् वामनजीको और महेश्वरके साथ ब्रह्माजीको प्रणाम किया इसके पीछे प्रीतिमें भर प्रफुल्लचित्त हो असुरसमूहके साथ सुतललोकको चला गया ॥ ३ ॥ इस प्रकारसे भगवान् हरिने इन्द्रको फिर त्रिलोकी समर्पण कर अदिति की कामना को साध स्वयं इंद्र बन सब जगतका

पालन किया था ॥ ४ ॥ इधर अपने वंशधर पोते बलिको छूटते हुए और भगवान्‌की प्रसन्नता प्राप्त करते हुए देख प्रह्लादजीने भक्तिसे गद्गद हो यह वचन कहे ॥ ५ ॥ प्रह्लादजीने कहा कि हे भगवन् ! जिन लोगोंकी वन्दना सम्पूर्ण विश्व करता है, वे समस्त लोग आपके चरणकमलोंकी वन्दना करते हैं। आप "सर्व प्रकार से रक्षा करेंगे" यह कहकर जो हमारे दुर्गपाल हुए आपका यह प्रसाद अति दुर्लभ है। ब्रह्मा महेश्वर और लक्ष्मी कोई भी इस प्रसादको प्राप्त नहीं हुए, फिर दूसरेकी तो बात ही क्या है ? ॥ ६ ॥ हे आश्रयप्रद ! आपके पदारविन्दमकरन्दका सेवन करके ब्रह्मादि देववृन्द विभूतियोंका भोग करते हैं, हम खलयोनि किस प्रकारसे आपकी

लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम् ॥ निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत ॥५॥ प्रह्लाद उवाच॥नेमं विरिञ्चो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ॥ यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरपि वन्दिताङ्घ्रिः॥६॥यत्पादपद्ममकरन्दनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः ॥ कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥ चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ॥ सर्वात्मनः समदृशो विषमस्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥ श्रीभगवानुवाच ॥ वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम् ॥ मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥९॥ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम् ॥ मद्दर्शनमहाह्लाद्ध्वस्तकर्मनिबन्धनः ॥ १० ॥

कृपादृष्टिकी पदवीको प्राप्त हों ? ॥७॥ हे भगवान्! आपकी चेष्टा अतिशय आश्चर्यकी है, यह तो कुछ बात ही नहीं है, आप अचिन्त्य योगमायासे लीलापूर्वक त्रिभुवनकी रक्षा करते हैं और सर्वात्मा व सर्वज्ञ होनेके कारण आप सबको समभावसे देखते हैं, आपका ऐसा विषम स्वभाव नहीं है परन्तु भक्तके ऊपर स्नेहवश हो आपका ऐसा कल्पतरुस्वभाव हुआ है ॥८॥ तब श्री भगवान् बोले कि हे प्रह्लाद ! तुम्हारा कल्याण हो, तुम भी सुतललोकमें चले जाओ और अपने पोते बलिके साथ आनन्द करते हुए अपने जातिवालोंको सुख दो ॥ ९ ॥ हम वहां पर गदा हाथमें लिये खड़े रहेंगे और वहां तुम नित्य हमको देखोगे, हमारे दर्शन करनेसे आनन्द पाओगे और

तुम्हारा ज्ञान भी नष्ट नहीं होगा ॥ १० ॥ श्रीशुकदेवजी बोले कि हे राजन् ! निर्मलमतिवाला प्रह्लाद अपने पोते राजा बलि के साथ " यही करता हूँ " कह भगवान्की आज्ञा को स्वीकार किया। फिर सब असुर और सेनापति हाथ जोड़कर महात्मा आदि पुरुष की परिक्रमा दे प्रणाम कर उनकी आज्ञा लेकर उसी समय सुतललोक को चले गये, कि जो बड़ा भारी पाताल था ॥ ११ ॥ १२ ॥ इसके पीछे भगवान् वामनजी संनिकट बैठे हुए ब्रह्मवादियोंकी सभामें ऋत्विक् लोगोंके बीच आसीन महर्षि शुक्राचार्यजीसे बोले ॥१३॥ कि हे ब्रह्मन् ! आपके शिष्य राजा बलिके यज्ञमें जो कुछ त्रुटि रह गयी है, उसको आप स्वयं पूर्ण कीजिये। यदि तुम कहो कि यज-

श्रीशुक उवाच ॥ आज्ञां भगवतो राजन् प्रह्लादो बलिना सह ॥ बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृताञ्जलिः ॥ ११ ॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ॥ प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम् ॥ १२ ॥ अथाहोशनसं राजन् हरिर्नारायणोऽन्तिके ॥ आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥ १३ ॥ ब्रह्मन् संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ॥ यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ॥ १४ ॥ शुक्र उवाच ॥ कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ॥ यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥१५॥ मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रं नाम संकीर्तनं तव ॥ १६ ॥ तथाऽपि वदतो भूमन् करिष्याम्यनुशासनम् ॥ एतच्छ्रेयः परं पुंसां यत्तवाज्ञाऽनुपालनम् ॥ १७ ॥

मानके विना यज्ञ किस प्रकार पूरा हो सकता है ? वह बात नहीं, क्योंकि ब्राह्मण करके देखे जाते ही सब कर्मों की विषमता समताको प्राप्त होती है, आपके करनेसे इस यज्ञ के पूर्ण हो जाने में क्या सन्देह है ? ॥ १४ ॥ श्रीभगवान् वामनजीने ऐसे वचन सुनकर शुक्राचार्यजी बोले कि हे भगवन् ! आप कर्मके प्रवर्तक, यज्ञफलदाता और यज्ञ पुरुष हैं, आप जिस करके सर्व प्रकार पूजित हुए फिर उसके कर्मोंकी विषमता कहां रही ? ॥१५॥ मन्त्रसे स्वरादिभ्रंश द्वारा, तन्त्रसे क्रमकी विपरीतता द्वारा और देश, काल, पात्र, वस्तुसे दक्षिणादि द्वारा जो जो न्यूनता होती है, आपका नाम लेते ही उन सब छिद्रोंको दूर करता है ॥ १६ ॥ तथापि आप जो कुछ आज्ञा करते हैं, उसको मैं अवश्य

पालन करूंगा, क्योंकि आपकी आज्ञा पालन करनेसे ही पुरुषोंका कल्याण होता है ॥ १७ ॥ हे राजन् ! शुक्राचार्यजीने इस प्रकारसे भगवान्की आज्ञा पर हर्ष प्रकट कर सब ब्राह्मणोंसहित राजा बलिके छिद्रको अच्छिद्र किया अर्थात् यज्ञ पूरा कर दिया॥१८॥ हे महाराज परीक्षित् ! श्रीभगवान् वासुदेवने वामन अवतार ले इस प्रकार राजा बलिके सम्मुख भूमिकी भिक्षा मांग दानव लोगोंने जिसको हरण कर लिया था वह स्वर्ग फिर अपने भ्राता इन्द्रको दे दिया॥१९॥ उसके उपरान्त कश्यप अदितिजी को प्रसन्न करने के लिये और सब प्राणियोंके

श्रीशुक उवाच ॥ अभिनन्द्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥१८॥ एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः ॥ ददौ भ्रात्रे महेन्द्राय त्रिदिवं यत्परैर्हृतम् ॥ १९ ॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ॥ दक्षभृग्वङ्गिरोमुख्यैः कुमारेण भवेन च ॥ २० ॥ कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च ॥ लोकानां लोकपालानामकरोद्वामनं पतिम् ॥ २१ ॥ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः ॥ मङ्गलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥ २२ ॥ उपेन्द्रं कल्पयांचक्रे पतिं सर्वविभूतये ॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥ २३ ॥

हितार्थ देव, ऋषि, पितृगण, मनुवर्ग, दक्ष, भृगु, अंगिरादि मुनिगण और कुमार व भोलानाथ शिवके साथ प्रजापति ब्रह्माजीने उन वामनजीको लोक व लोकपालोंका अधीश्वर किया * ॥ २० ॥ २१ ॥ यद्यपि इन्द्र सब लोकोंके पति हैं तो भी समस्त वेद, सर्व देव, धर्म, यश और सब प्रकारसे मंगल व्रतादिके पालन करनेमें निपुण वे वामनजी सर्व प्राणियोंका बहुत ऐश्वर्य बढ़ाने को इन्द्रके सहायक उपेंद्र बनाये गये,

* शंका–जगत्को उत्पन्न करने वाले, जगत्के स्वामी, जगत्के पालन करनेवाले जो भगवान् हैं, उन भगवान्को इन्द्रके हाथके नीचे ब्रह्माजीने राज्य दिया, अधीश तो इन्द्रभगवान्को ब्रह्माने किया, यह बड़ी शंका है ?

उत्तर—भगवान्की आज्ञा मानकर ब्रह्माने बहुत प्रकारसे विचार किया और इन्द्रको त्रास देनेके लिये भगवान् को इन्द्रके हाथके नीचे ब्रह्माने अधीश्वर किया, क्योंकि लोकमें भी अपने बराबर पुत्रको भाईको देखकर लोग कुकर्म नहीं करते । इस प्रकारसे भगवान् इन्द्रके छोटे भाई हैं, अतः वामन भगवान्के सम्मुख इन्द्र खोटा कर्म नहीं करेगा, इसलिये त्रिलोकीके नाथको इन्द्रके हाथके नीचे ब्रह्माने स्वामी किया ।

इसलिये उस समय सब प्राणियोंको बहुत ही आनन्द प्राप्त हुआ ॥२२॥२३॥ इसके पीछे इन्द्रने विमानपर चढ़ाकर आगे कर उन वामनजीको स्वर्गमें ले गये । यह देखकर लोकपालोंके और ब्रह्माजीके मनमें परमानन्द हुआ ॥२४॥ हे महाराज ! इस प्रकार इंद्र त्रिलोकीको प्राप्त हो उपेंद्रजीके बाहुबलसे उसको पालन करने लगा और परम श्रीसम्पन्न व निर्भय होकर सुख संभोगमें निमग्न हुआ ॥ २५ ॥ इस ओर ब्रह्मा,महेश्वर,कुमार,भृगु आदि मुनि,पितृलोग और सर्व प्राणी,सिद्ध व वैमानिक सब ही भगवान् के इस अद्भुत कर्मकी प्रशंसा करते-करते अपने-अपने स्थानोंको चले गये और सब स्थानोंमें कश्यपजीकी स्त्री अदितिजीकी बड़ी प्रतिष्ठा हुई ॥ २६ ॥ २७ ॥ हे कुरुनन्दन परीक्षित् ! श्रीभगवान्के ये पवित्र चरित्र श्रोता लोगोंके पापोंका नाश करनेवाले हैं, वह हमने आप के संमुख सब वर्णन किये ॥ २८ ॥

ततस्त्विन्द्रः पुरस्कृत्य देवयानेन वामनम् ॥ लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥ २४ ॥ प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥ २५ ॥ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥ २६ ॥ सुमहत् कर्म तद्विष्णोर्गायन्तः परमाद्भुतम् ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥ २७ ॥ सर्वमेतन्मयाऽऽख्यातं भवतः कुलनन्दन ॥ उरुक्रमस्य चरितं श्रोतृणामघमोचनम् ॥ २८ ॥ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान उत जात उपैति मर्त्य इत्याह मन्त्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥ य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन् याति परां गतिम् ॥ ३० ॥

भा० टी०
अ० २३

जिस पुरुषने बलसे अनेक भांतिके विक्रम करनेवाले भगवान् विष्णुकी महिमाका पार देख लिया है, वह पृथ्वीके राजःकणोंकी संख्या भी कर सकता है, अर्थात् जिस प्रकार पृथ्वीके रजःकणोंकी संख्या नहीं हो सकती, वैसे ही भगवान्के चरित्रों को गाते-गाते कोई पार नहीं पा सकता । इसलिये मंत्र और मंत्रदर्शी पुरुष लोगोंने स्पष्ट कहा है कि उत्पन्न हुये और उत्पन्न होनेवाले मनुष्योंकी जातिमें क्या कोई पुरुष पूर्णस्वरूप पुरुषकी महिमाको प्राप्त हुआ है! अर्थात् कोई नहीं हुआ और न आगेको होगा ॥२९॥ हे राजन् ! अद्भुतकर्मकारी देव देव भगवान् वासुदेवके वामनावतारविषयक चरित्र जो मनुष्य गायेंगे वा सुनेंगे अथवा सुनायेंगे व लिखेंगे उनको परम श्रेष्ठ गति प्राप्त

हो जायगी, इसमें कुछ सन्देह नहीं है ॥ ३० ॥ श्रीशुकदेवजी कहते हैं कि हे परीक्षित् ! देवता अथवा पितरोंमें अथवा लौकिक कर्म करनेके समय जिस-जिस कार्यमें इस चरित्रका गान होगा, वे समस्त कार्य यथावत् पूर्ण होंगे, इस बातको पंडितगण भली प्रकार जानते हैं ॥३१॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे भाषाटीका वामनावतारचरित्रवर्णनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ दोहा—कथा मत्स्य अवतारकी, चौबिसवें अध्याय । सत्य व्रत रक्षा करी, सो कहिहौं समुझाय ॥ राजा परीक्षित् व्यासपुत्र श्रीशुकदेवजी बोले कि हे भगवन् ! आपने जो अनुग्रह करके वामन अवतारकी कथा मुझे सुनायी वह मुझे अत्यन्त प्रिय लगी, अब कृपापूर्वक मुझे प्रथमावतारकी कथा सुनाइये कि जिसमें अद्भुत कर्मकारी भगवान्ने अपनी मायाके द्वारा मत्स्यरूप धारण किया था, मैं उसके श्रवण करनेकी इच्छा

क्रियमाणे कर्मणीदं देवे पित्र्येऽथ मानुषे ॥ यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ॥ ३१ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कन्धे वामनावतारचरिते त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ राजोवाच ॥ भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मायामत्स्यविडम्बनम् ॥ १ ॥ यदर्थमदधाद् रूपं मात्स्यं लोकजुगुप्सितम् ॥ तमःप्रकृति दुर्मर्षं कर्मग्रस्तमिवेश्वरः ॥२॥ एतन्नो भगवन् सर्वं यथावद् वक्तुमर्हसि ॥ उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥ सूत उवाच ॥ इत्युक्तो विष्णुरातेन भगवान् बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत् कृतम् ॥ ४ ॥ श्रीशुक उवाच ॥ गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥

करता हूं ॥ १ ॥ क्योंकि मत्स्यरूप लोकमें निंदित है और तमोगुणी स्वभाववाला होनेका कारण सहनेके अयोग्य है, ईश्वरने कर्मग्रस्तके समान होकर इस रूपको किस कारण धारण किया था ? ॥ २ ॥ यह सब वृत्तांत आप मुझसे यथार्थरूपसे कहिये। हे योगिन् ! भगवान् उत्तमश्लोकके चरित्र सबको ही सुखके देनेवाले हैं ॥ ३ ॥ सूतजी बोले कि जब राजा परीक्षित्ने इस प्रकारसे प्रार्थना की तब व्यासपुत्र श्रीशुकदेवजी वह सब लीला कहने लगे, जो कि विष्णुभगवान्ने मत्स्यरूप धारण करके की थी ॥ ४ ॥ श्रीशुकदेवजी प्रसन्नता पूर्वक कहने लगे कि हे कुरुवंशावतंस परीक्षित् ! गौ, ब्राह्मण, देवता, वेद, साधु, कर्म और अर्थकी रक्षा करने के लिये समय-समय पर विष्णु भग-

वान् अवतार लिया करते हैं ॥ ५ ॥ बुद्धिके गुण करके ऊंचे-नीचे प्राणियोंके पवनके समान आदिपुरुष भगवान् विचरण करते हैं, परंतु निर्गुण होनेके कारण ऊंच-नीचको नहीं भजते और मत्स्यावतारका जो प्रयोजन है वह भी सुनो ॥६॥ अतीत कल्पके अंतमें जब ब्रह्माजीकी निद्राके लिये प्रलय हुआ, तब भूरादि सब लोग समुद्रके जलमें डूब गये ॥ ७ ॥ तब समयके वश होकर ब्रह्माजी सो रहे थे, उस समय उनके वदनमेंसे सब वेद निकले, कि जिनको दानवेंद्र हयग्रीवने हरण कर लिया ॥ ८ ॥ हे राजन् ! जब दानवश्रेष्ठ हयग्रीवका यह कर्म भगवान् वासुदेवने जाना; तब वे इस दैत्यका दमन करनेके लिये शफरीरूप (मत्स्यरूप) धारण कर लिये ॥ ९ ॥ उसी समय कोई

उच्चावचेषु भूतेषु चरन् वायुरिवेश्वरः ॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥६॥ आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ॥ ७ ॥ कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ॥ मुखतो निस्सृतान् वेदान् हयग्रीवोऽन्तिकेऽहरत् ॥ ८ ॥ ज्ञात्वा तद्दानवेन्द्रस्य हयग्रीवस्य चेष्टितम् ॥ दधार शफरीरूपं भगवान् हरिरीश्वरः ॥९॥ तत्रराजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ॥ नारायणपरोऽतप्यत् तपः स सलिलाशनः ॥ १० ॥ योऽसावस्मिन् महाकल्पे तनयः स विवस्वतः ॥ श्राद्धदेव इति ख्यातो मनुत्वे हरिणाऽर्पितः ॥ ११ ॥ एकदा कृतमालायां कुर्वतो जलतर्पणम् ॥ तस्याञ्जल्युदके काचित् शफर्येकाऽभ्यपद्यत ॥ १२ ॥ सत्यव्रतोऽञ्जलिगतां सह तोयेन भारत ॥ उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः ॥ १३ ॥तमाह साऽतिकरुणं महाकारुणिकं नृपम् ॥ यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥ कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥ १४ ॥

सत्यव्रत नामक नारायणपरायण राजर्षि केवल जलका आहार कर तप करते थे ॥ १० ॥ वही राजर्षि इस महाकल्पमें विवस्वान् (सूर्य) के पुत्र हो श्राद्धदेवके नामसे विख्यात और भगवान् हरिकरके मन्वन्तरके पदपर अभिषिक्त हुए ॥ ११ ॥ एक दिन यह राजर्षि सत्यव्रत कृतमाला नदीमें स्नान करके तर्पण कर रहे थे, कि इतनेमें ही उनकी अञ्जलीके जलमें एक मछली दिखायी दी ॥१२॥ हे भारत ! यह देखकर दयावान् द्रविड़राज सत्यव्रत अंजलिके जलसहित इस मछलीको नदीके जलमें डालनेको प्रस्तुत हुए ॥ १३ ॥ राजर्षि सत्यव्रतको महा

करुणाकर जानकर वह मछली करुणाके वचन कहने लगी कि हे महाराज ! आप दीनवत्सल हैं और मैं दीन,हीन क्षीण मीन हूँ, नदीके जलमें जातिका घात करनेवाले अनेक जन्तु हैं, उनके हाथमें हमको आप किस प्रकार छोड़ते हैं ? हे महाराज ! हम भीत हो शरण आयी हैं, आप हमारी रक्षा कीजिये ॥ १४ ॥ राजर्षि सत्यव्रत यद्यपि यह नहीं जानते थे कि हमारे ही ऊपर अनुग्रह करनेको स्वयं भगवान्ने यह सत्यस्वरूप धारण किया है,तो भी प्रीतिपूर्वक उस मछलीकी रक्षा करनेको मन स्थिर कर लिया ॥१५॥ दीन वचन सुनते ही राजर्षिके मनमें दया उत्पन्न हो गयी और वह जलपूर्ण कलशमें रखकर मछलीको अपने आश्रममें ले आये ॥ १६ ॥ हे राजा परीक्षित् ! कलशमें रहनेपर एक ही रातके बीच वह मछली इतनी बढ़ी, कि वह फिर उसमें न समा सकी, इसलिये अपने सुभीतेके लिये उन राजर्षिसे कहने लगी

तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम् ॥ अजानन् रक्षणार्थाय शफर्याः स मनोदधे ॥ १५ ॥ तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम् ॥ १६ ॥ सा तु तत्रैकरात्रेण वर्धमाना कमण्डलौ ॥ अलब्ध्वाऽऽत्मावकाशं वा इदमाह महीपतिम् ॥ १७ ॥ नाहं कमण्डलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे ॥ कल्पयौकः सुविपुलं यत्राहं निवसे सुखम् ॥ १८ ॥ स एनां तत आदाय न्याधादौदञ्चनोदके ॥ तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत ॥ १९ ॥ न म एतदलं राजन् सुखं वस्तुमुदञ्चनम् ॥ पृथु देहि पदं मह्यं यत्त्वाऽहं शरणं गता ॥२०॥ तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे ॥ तदावृत्त्यात्मना तोयं महामीनोऽन्ववर्धत ॥ २१ ॥

॥ १७ ॥ कि हे राजन् ! इस गगरीमें मेरा शरीर नहीं समाता, इसमें कष्टके मारे मैं वास नहीं कर सकती, अतः आप मुझे कोई ऐसा स्थान बता दीजिये कि जहाँ मैं सुखसे रह सकूं ॥ १८ ॥ यह सुनकर राजा सत्यव्रतने उस मछलीको जलसे निकाल एक बड़े भारी कमण्डलुमें डाल दिया । हे राजन् ! उस कमण्डलुमें गिरते ही एक क्षणके बीचमें वह मछली तीन हाथ बढ़ गयी ॥ १९ ॥ तब वह मछली कहने लगी कि इस कमण्डलुके बीच भी मैं सुखसे नहीं रह सकती, अनुग्रह करके मुझको आप किसी बड़े भारी स्थानमें रखवा दें, क्योंकि मैं आपकी शरण आयी हूँ, इसलिये सब प्रकार आपको मेरी रक्षा करनी उचित है ॥ २० ॥ तब राजर्षिने इस मछलीको कमण्डलुसे उठाकर एक

सरोवरमें डाल दिया परंतु डालतेही वह मछली अपने शरीरसे उस सरोवरमें बड़ी मछलीके समान बढ़ गयी और फिर राजर्षि सत्यव्रतसे
निवेदन करने लगी कि हे महाराज ! मैं जलवासी हूँ, मुझको नहीं जान पड़ता कि सरोवरका जल मेरे मंगलार्थ होगा ॥ २१ ॥ महा-
ह्रदको पानेके प्रथम विना जलके जिससे मेरा नाश न हो जांय ऐसा उपाय करके तुम मुझको किसी ह्रदमें स्थापित करो, क्योंकि ह्रद
स्वभावसे ही गम्भीर नीरवाले होते है उनका जल शीघ्र नहीं घटता ॥ २२ ॥ हे राजन् ! जब उस मत्स्यने इस प्रकारसे कहा तब
राजर्षि सत्यव्रतने उसको लेकर जिसका जल कभी क्षीण न हो ऐसे अगाध जलाशयमें डाल दिया, परन्तु एक दिनमें ही वह
मछली इतनी बढ़ी कि वह जलाशय भर गया, राजा सत्यव्रतने जब देखा कि इस मछलीका शरीर जलाशयमें भी नहीं समाता तो

**नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ॥ निधेहि रक्षायोगेन ह्रदे मामविदासिनि ॥ २२ ॥ इत्युक्तः
सोऽनयन्मत्स्यं तत्र तत्राविदासिनि ॥ जलाशये संमितं तं समुद्रे प्राक्षिपज्झषम् ॥२३॥ क्षिप्यमाणस्तमाहेदमिह मां
मकरादयः ॥ अदन्त्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥२४॥ एवं विमोहितस्तेन वदता वल्गुभारतीम् ॥ तमाह को
भवानस्मान् मत्स्यरूपेण मोहयन् ॥२५॥ नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपिच ॥ यो भवान् योजनशतमह्ना-
ऽभिव्यानशे सरः ॥ २६ ॥ नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोऽव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसाम्
॥ २७ ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २८ ॥**

उसको समुद्रमें डालनेके लिये चला ॥२३॥ तब उस मीनने दीन भावसे राजर्षिके प्रति कहा कि हे राजन् ! यहांपर अति बलवान् मकरादि
जन्तु हैं, वे हमको भक्षण कर लेंगे इसलिये आप हमको इस स्थानमें न छोड़िये ॥ २४ ॥ जब उस मत्स्यसे ऐसे वचन सुनकर राजर्षि

सत्यव्रत अतिशय मोहित हुये तब मत्स्यसे बोले, "आप कौन हैं ?" और मत्स्यके रूपसे हमको क्यों मोहित करते हैं ? ॥ २५ ॥ हमने
कभी इस प्रकारका जलचर न देखा, न सुना । आपने एक दिनमें अपना शरीर बढ़ाकर शत योजनके विस्तारवाले सरोवरको ढक
दिया ॥ २६ ॥ हम निश्चय जानते हैं कि आप नारायण अथवा हरि हैं, प्राणियोंपर अनुग्रह करनेके लिये आपने जलचररूप धारण
किया है ॥ २७ ॥ हे पुरुष श्रेष्ठ ! आपको नमस्कार है । आप सृष्टि, स्थिति और प्रलयके अधीश्वर हैं । हे प्रभो ! हम आपके

भक्त हैं और शरणागत है, आप हमारे आत्मा और आश्रय है ॥ २८ ॥ आपके समस्त लीला-अवतार प्राणियोंकी विभूतिके अर्थ है तो सही, पर इस रूपके धारण करनेका क्या कारण है? वह मैं जानना चाहता हूँ ॥ २९ ॥ हे अरविन्दलोचन! देहाभिमानी पुरुषोंकी उपासना जिस प्रकार व्यर्थ होती हैं, वैसे ही सर्व सुहृद् और प्रिय आत्मा आपके चरणोंकी उपासना व्यर्थ नहीं हो सकती, क्योंकि हम लोग केवल आपके भक्त है तो भी आपने ऐसी अनिर्वचनीय दया प्रकट करके हमको यह अद्भुत मूर्ति दर्शन कराया ॥ ३० ॥ श्रीशुकदेवजी बोले कि जब राजा सत्यव्रतने इस प्रकारसे कहा तब जगत्पालक मत्स्यरूपी भगवान् प्रलयके समुद्रमें

सर्वे लीलावतारास्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥२९॥ न तेऽरविन्दाक्ष पदोपसर्पणं मृषा भवेत सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥३०॥ श्रीशुक उवाच॥ इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकान्तजनप्रियःप्रियम् ॥३१॥ श्रीभगवानुवाच ॥ सप्तमेऽद्यतनादूर्ध्वमहन्यतदरिंदम ॥ निमङ्क्ष्यत्यप्ययाम्भोधौ त्रैलोक्यं भूर्भुवादिकम् ॥३२॥ त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ ३३ ॥ त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ॥ सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ॥३४॥ आरुह्य महतीं नावं विचरिष्यस्यविक्लवः ॥ एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३५ ॥

विहार करनेकी इच्छासे अपने मनकी बात उस राजासे कहने लगे, क्योंकि भक्तजन उनको अत्यन्त प्यारे होते है ॥ ३१ ॥ मत्स्यरूपी भगवान् बोले कि हे अरिन्दम! आजसे सातवें दिन प्रलय होगा और उस प्रलयके जलमें त्रिलोकी डूब जायगी ॥ ३२ ॥ हे राजन्! जब प्रलयके जलमें त्रिलोकी डूबने लगगी तब उस समय हमारी भेजी हुई एक बड़ी नाव तुम्हारे निकट आयेगी ॥ ३३ ॥ तुम उसको देखते ही सब प्रकारकी औषधियाँ और छोटे-बड़े समस्त बीज ग्रहण करके सप्तऋषियोंको लेकर सब प्राणियोंके साथ ॥३४॥ उस नावपर अतिशीघ्रताके साथ चढ़ जाना। उस नावमें चढ़कर विना खेदके तुम सब जगत् घूम सकोगे। हे राजन्! जब सब जल ही जल हो जायगा तब

उजाला नहीं रहेगा, परन्तु तुम ऋषिलोगोंके तेजसे सब कुछ देखनेको समर्थ होगे ॥३५॥ फिर प्रलय पवनके लगनेसे जब वह नाव कम्पायमान होने लगेगी, तब हम भी तुम्हारे समीप आ जायँगे, तब तुम बृहत् सर्परूप रस्सीसे हमारे सींगमें नावको बांध देना ॥ ३६ ॥ जबतक ब्रह्माजीकी रात रहेगी तबतक हम उस नावको ऋषि लोगोंके सहित प्रलय समुद्रमें खींचते फिरेंगे ॥ ३७ ॥ हे राजन् ! परब्रह्मपदवाच्य जो हमारी महिमा है वह उसी समय तुम्हारे प्रश्न करने पर कहेंगे । तुम हमारी प्रसन्नतासे उस महिमाको अपने हृदयमें जान सकोगे ॥३८॥ श्री भगवान् इस प्रकार सत्यव्रतको आज्ञा दे उसी स्थलमें अन्तर्धान हो गये। इसके उपरान्त यह राजर्षि सावधान हो भगवान्की आज्ञा दिये

दोधूयमानां तां नावं समीरेण बलीयसा ॥ उपस्थितस्य मे शृंगे निबध्नीहि महाहिना ॥ ३६ ॥ अहं त्वामृषिभिः साकं सहनावमुदन्वति ॥ विकर्षन् विचरिष्यामि यावद् ब्राह्मी निशा प्रभो ॥ ३७ ॥ मदीयं महिमानं च परं ब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥३८॥ श्रीशुक उवाच ॥ इत्थमादिश्य राजानं हरिरन्तरधीयत ॥ सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ॥ ३९ ॥ आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः ॥ निषसाद हरेः पादौ चिन्तयन्मत्स्यरूपिणः ॥ ४० ॥ ततः समुद्रउद्वेलः सर्वतः प्लावयन्महीम् ॥ वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ४१ ॥ ध्यायन्भगवदादेशं ददृशे नावमागताम् ॥ तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥ ४२ ॥ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवम् ॥ स वै नः संकटादस्मादविता शं विधास्यति ॥ ४३ ॥

हुए कालकी राह देखने लगे ॥ ३९॥ अर्थात् सत्यव्रत राजा मत्स्यरूपी भगवान्के चरित्रका स्मरण करता हुआ पूर्वकी ओरको हैं अग्रभाग जिनके ऐसे कुशोंको बिछाकर पूर्व उत्तरकी ओर को मुख करके बैठ गया ॥ ४० ॥ कुछ कालके पीछे दिखायी दिया कि समुद्र का नीर तटको तोड़ सर्व प्रकारसे पृथ्वीको डुबाता हुआ बढ़ने लगा और भयंकर मेघ अनिवारित जलधारा वर्षाने लगे ॥ ४१ ॥ राजा सत्यव्रतने भगवान् की आज्ञाका विचार करते-करते देखा कि एक नाव निकट आ पहुँची । मत्स्यमूर्ति भगवान्की आज्ञाका स्मरण कर वह सत्यव्रत सब प्रकारकी औषधि व लतादि लेके सप्तऋषियोंके साथ उस नावपर आरूढ़ हो गया ॥ ४२ ॥ जब यह सत्यव्रत राजर्षि

नौकापर चढ़े तब मुनिलोग बोले कि हे राजन्! भगवान् केशवका ध्यान करो, वे ही हम लोगोंको इस संकटसे बचाकर मंगल करेंगे ॥४३॥ हे राजन्! जब राजा सत्यव्रतने ध्यान किया तब एक शृंग धारण किये मत्स्य भगवान् साक्षात् समुद्रमें प्रकट हुए। इनका यह शृंग सुवर्णका था और देहकी लम्बाई एक लाख योजनकी थी ॥४४॥ राजर्षि सत्यव्रत भगवान्की आज्ञानुसार अहिडोरसे इस मत्स्यकी शृंगमें नौका बांध प्रसन्नचित्त हो भगवान् मधुसूदनकी स्तुति करने लगे ॥ ४५ ॥ राजर्षि सत्यव्रतने कहा कि हे भगवन्! जिन पुरुषोंका अन्तःकरण अनादि अविद्यासे ढका हुआ है, इस कारण जो अविद्यारूप संसारके परिश्रमसे आतुर हैं, वे लोग भी इस संसार में जिसके अनु-

सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ॥ एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः ॥ ४४ ॥ निबद्ध्य नावं तच्छृङ्गे यथोक्तो हरिणा पुरा ॥ वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम् ॥ ४५ ॥ राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृच्छयेहोपसृता यदाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥ ४६ ॥ जनोऽबुधोऽयं निजकर्मबन्धनः सुखेच्छया कर्म समीहतेऽसुखम् ॥ यत्सेवया तां विधुनोत्यसन्मतिं ग्रन्थिं स भिन्द्याद्धृदयं स नो गुरुः ॥ ४७ ॥ यत्सेवयाऽग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः ॥ भजेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ॥ ४८ ॥ न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ॥ कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥

ग्रहके लिये आश्रित हो जिसको प्राप्त होते हैं आप वही पुरुष हैं, हम लोगोंको मुक्तिके देनेवाले आप परमगुरु हैं ॥ ४६ ॥ हे भगवन्! यह जन अत्यन्त अबोध है, अपने कर्मोंसे ही इसका बन्धन हुआ है, यह सुखकी इच्छासे असुरोंकेसे कर्म करनेकी चेष्टा करता-फिरता है, परन्तु जिनकी सेवा करनेसे वह सुखकी इच्छा छूट जाती है वे हमारे हृदयकी गांठको खोल दे, वे ही भगवान् हमारे परमगुरु हैं ॥ ४७ ॥ अहो! चांदी जिस प्रकार अग्निकी सेवा करके अपनी मलिनताको छोड़ अपने पहले रूपको प्राप्त हो जाती है, ऐसे ही जिन आपकी सेवासे मनुष्य अज्ञानको छोड़ अपने स्वरूपको प्राप्त हो जाता है, वे ही अव्यय ईश हमारे गुरु हों, क्योंकि वे ही गुरुके भी परमगुरु हैं ॥ ४८ ॥ अहो! देवता गुरु व सब श्रेष्ठजन एकत्र होकर भी जिसके प्रसादके दश हजार भागके एक किनकेको भी प्राप्त करने के लिये समर्थ नहीं

भा० अ० हो सकते, हे भगवान् ! आप वही ईश्वर हैं, हम आपकी शरण हैं ॥४९॥ हे प्रभो । अंधा जिस प्रकार अन्धेको आगे करके चले, वैसे ही
॥ ७४ ॥ अविद्वान् पुरुष अबोध को अपना गुरु बनाता है; हम वैसे नहीं हैं। आपके जाननेकी इच्छा करते हैं, इसलिये आपको ही गुरु बनाते हैं,
आपका ज्ञान सूर्यके प्रकाशके समान स्वयंसिद्ध है और आप ही सब इंद्रियोंके प्रकाशक हैं ॥५०॥ हे भगवन् ! प्राकृत गुरु केवल अनर्थके हेतु हैं, वे पुरुषको कामादिककी मतिका उपदेश करते हैं; इससे मनुष्य तरनेके अयोग्य संसारको प्राप्त हो जाता है, आप इस प्रकारके नहीं हैं, आप यथार्थमें अव्यय और अव्यय ज्ञानका उपदेश दिया करते हैं, इससे सर्वसाधारण अर्थात् सब कोई आपके पदको प्राप्त हो जाते हैं ॥५१॥ हे देव ! यद्यपि आप सब पुरुषोंके सुहृद, प्रिय, ईश्वर, आत्मा, गुरु, ज्ञान और अष्टसिद्धिस्वरूप हैं, तो भी अनेक दूसरी

अचक्षुरन्धस्य यथाऽग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः ॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥५०॥ जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः ॥ त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम् ॥५१॥ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ॥ तथापि लोको न भवन्तमन्धधीर्जानाति सन्तं हृदि बद्धकामः ॥ ५२ ॥ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ॥ छिन्ध्यर्थदीपैर्भगवन्वचोभिर्ग्रन्थीन्हृदय्यान्विवृणु स्वमोकः ॥५३॥ श्रीशुक उवाच ॥ इत्युक्तवन्तं नृपतिं भगवानादिपूरुषः॥मत्स्यरूपी महाम्भोधौ विहरंस्तत्त्वमब्रवीत् ॥५४॥ पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम् ॥ सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥ ५५ ॥

भा० टी० बुद्धि और कामके वश होकर अपने हृदयमें स्थित हुए आपको नहीं जान सकते ॥ ५२ ॥ परन्तु हम ज्ञान प्राप्त करनेके लिये आपकी
अ० २४ शरणमें आये हैं आप देवताओंमें श्रेष्ठ, वरेण्य और ईश्वर हैं। हे भगवन् ! आप परमार्थप्रकाशक वचनोंसे हमारे हृदयमें उत्पन्न हुई अहंकारादिकी गांठ खोलिये और आज्ञास्वरूपप्रकाश करनेकी कृपा हो ॥ ५३ ॥ शुकदेवजी बोले कि हे परीक्षित् ! जब राजर्षि सत्यव्रतने इस प्रकार से स्तुति की तब मत्स्यरूपी भगवान् आदिपुरुषने प्रलयके महासमुद्रमें विहार करते-करते उस राजर्षिको तत्त्वज्ञानका उपदेश किया था ॥ ५४ ॥ और सांख्ययोग व क्रियाविशिष्ट दिव्य पुराणसंहिता अर्थात् मत्स्यपुराण और अतिगुप्त करने योग्य आत्म-

तत्त्वको भी बड़ी भारी व्याख्याके सहित कहा था ॥ ५५ ॥ ऋषिगणोंके सहित सत्यव्रत राजर्षि नावमें बैठकर ब्रह्मा और श्रीभगवान्‌के कहे हुए उस समस्त आत्मतत्त्वको विशेष करके सनातन धर्मकी कथाको श्रवण करने लगा और उस कथाके श्रवण करनेसे कुछ संदेह भी हुआ ॥ ५६ ॥ श्रीशुकदेवजी राजा परीक्षित्‌से कहने लगे कि हे भारत ! पहले प्रलयके अन्तमें जब ब्रह्माजी सोकर उठे तो उन मत्स्यरूपी भगवान्‌ने हयग्रीव असुरका संहारकर फिर सब वेद ब्रह्माजीको दे दिये॥५७॥और यह सत्यव्रत राजा भगवान्‌के प्रसादसे ज्ञानविज्ञान सम्पन्न हो इस कल्पमें वैवस्वतमनु हुआ है ॥५८॥ हे राजा परीक्षित् ! सत्यव्रत राजर्षिके और मायामत्स्यरूपी भगवान् विष्णुके इस अवतार का

अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम् ॥ नान्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम् ॥ ५६ ॥ अतीतप्रलयापाय उत्थिताय स वेधसे ॥ हत्वाऽसुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥५७॥ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः ॥ ५८ ॥ सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥ ५९ ॥ अवतारो हरेर्योऽयं कीर्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिध्यन्ति स याति परमां गतिम् ॥ ६० ॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमुपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥ ६१ ॥ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यामष्टमस्कन्धे मत्स्यावतारचरितानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ समाप्तोऽयमष्टमः स्कन्धः ॥

बड़ा पवित्र आख्यान श्रवण करनेसे सब पाप छूट जाते हैं ॥ ५९ ॥ श्रीभगवान् वासुदेवके इस अवतारको जो मनुष्य दिन-प्रतिदिन कहते सुनते हैं उनके सब कार्य सिद्ध हो जाते हैं और अन्तमें परमगतिको प्राप्त हो जाते हैं॥६०॥अहो ! प्रलय समुद्र के जलमें शयन करते हुए और शक्ति रहित विधाताके वदनसे निकले हुए सब वेदोंको जिस दानवने हरण कर लिया और जिन्होंने मत्स्यरूपी होकर उस हयग्रीव राक्षसको मार सब वेद सत्यव्रत और सप्तऋषियोंसे कहे थे, उन अखिलकारण मायामत्स्यरूपी भगवान्‌को हम वारंवार नमस्कार करते हैं* ॥६१॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे भाषाटीका मत्स्यावतारवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

* छप्पय-जय जय नटवर वेष तरणियतनयातच लम्पट । जय जय अट पट लटक चटक भूषित वंशीवट । जय जय जटित सुहाटक घटित मुकुट धर ॥ जब जय उत्कट शकट विपाटक वेणु लकुट कर ।। जयति चटुल तर पतिपट धर अघटित घटनाचरण ।। जय जयति निपट पटु करण प्रभु मम इच्छा पूरण करण ।

॥ इति श्रीमद्भागवते भाषाटीकायुते अष्टमस्कंधः समाप्तः ॥

॥ अथ श्रीमद्भागवते भाषाटीकायुते नवमस्कन्धः प्रारंभः ॥

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.

अश्विनीकुमार
सुकन्या
च्यवन
अंबरीष
सुदर्शन
दुर्वासा
कृत्या
कपिल
सौदासराजा
ऋषिपत्नी
सहस्रार्जुन
परशुराम
श्रीराम
सीता
ल.
भ.
शा.
हनुमान
देवयानी
ययातिपुत्र
शर्मिष्ठा
ययाति

सोरठा—जयवृन्दावन चन्द, जय मुकुन्दगोविंद हरि ॥ जय प्रभु आनन्दकन्द, जगवन्दन दुष्टनदलन ॥ जय त्रिभुवन आधार, जय जय जीवन जगतपति ॥ मम उर करहु विहार, कर मुरली शिर मुकुट धर ॥२॥ हे वृन्दावनचन्द, यह वर दीजे दयाकर ॥ श्रीव्रजको आनन्द, नित्य प्रति निरखत रहौं ॥३॥ शीश मुकुट उर माल; सँग राधा बाधा हरण ॥ इहि छबिसौं नँदलाल, वसहु सदा मेरे हिये ॥४॥ श्रीयमुनाके तीर, गाय चरावत सखन सँग ॥ ता छबिसों यदुवीर, वास करहु मेरे हृदय ॥५॥ अहो मदन गोपाल, रासरसिक राधारमण॥ हरहु जगतजंजाल, करहु दया जन जानकर ॥६॥ कर त्रिशूल शशिभाल, शीश गंग मन्मथदहन ॥ गलमें गरल कराल, आठ पहर झलकत रहत ॥७॥ दोहा-स्कन्ध नवममें वंश द्वै, सूर्य सोम विस्तारि ॥ तेरहग्यारहसों भनें, क्रम अध्याय विचारि ॥१॥ तहां प्रथम अध्यायमें वैवस्वतसुत वंश ॥ मध्य भन्यौ

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ मन्वन्तराणि सर्वाणि त्वयोक्तानि श्रुतानि मे ॥ वीर्याण्यनन्तवीर्यस्य हरेस्तत्र कृतानि च ॥ १ ॥ योऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ॥ ज्ञानं योऽतीतकल्पान्ते लेभे पुरुषसेवया ॥ २ ॥ स वै विवस्वतः पुत्रो मनुरासीदिति श्रुतम् ॥ त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥ ३ ॥ तेषां वंशं पृथग् ब्रह्मन् वंशानुचरितानि च ॥ कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥ ४ ॥ ये भूता ये भविष्याश्च भवन्त्यद्यतनाश्च ये ॥ तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥ ५ ॥

सुद्युम्नके, स्त्रीत्व जासु विधुवंश॥२॥श्रीशुकदेवजीसे राजा परीक्षित् बोले कि हे भगवन् ! सब मन्वन्तरोंका वृत्तान्त और मन्वन्तरोंमें अनन्त-वीर्यवान् भगवान् हरिने जो वीर्य प्रकट किया; वह सम्पूर्ण आपके अनुग्रहसे मैंने सुना ॥ १ ॥ हे योगिन् ! अतीतकल्पके अन्तमें द्रविड़ा-धिपति सत्यव्रत नामक राजर्षिने भगवान्की सेवा करके जो ज्ञान प्राप्त किया ॥ २ ॥ और वह वैवस्वतके पुत्र मनु हुए थे इसको भी मैंने सुना और उन वैवस्वत मनुके पुत्र जो इक्ष्वाकु आदि राजा हुए, उनका वृत्तान्त भी आप कह ही चुके हैं ॥ ३ ॥ हे महाभाग ! इन इक्ष्वाकु आदिका पृथक्-पृथक् वंश और वंशोंके चरित्र मैं सुनना चाहता हूँ; उसे कृपापूर्वक आप मुझसे वर्णन कीजिये ॥ ४ ॥ हे महाभाग ! इस वंशमें जो पुरुष हो गये हैं और जो आगे होंगे, जो अब वर्तमान हैं, पुण्यकीर्तिवाले उन सब मनुष्योंका विक्रम आप

यथार्थ मुझसे कहिये ॥ ५ ॥ श्रीसूतजी बोले कि ब्रह्मवादी ब्राह्मणोंकी सभामें राजा परीक्षितने जब इस प्रकारसे पूछा; तब परमधर्मज्ञ-श्रीशुकदेवजी कथाका आरम्भ करने लगे ॥ ६ ॥ श्रीशुकदेवजी बोले कि हे परीक्षित् ! मनुके वंशका वृत्तान्त हम कहते हैं, तुम श्रवण करो परंतु इसका विस्तारसे वृत्तान्त तो हम सहस्रों वर्षतक नहीं कह सकते ॥ ७ ॥ हे राजन् ! जो परम पुरुष पर अपर भूतोंके आत्मा हैं आगे केवल वही थे; कल्पके अन्तमें उनके अतिरिक्त विश्वमें कुछ और वस्तु नहीं थी ॥ ८ ॥ उन परमपुरुषकी नाभिसे एक सुवर्णमय कमल उत्पन्न हुआ । हे महाराज ! उस कमलसे चतुर्मुख ब्रह्माजीका जन्म हुआ ॥ ९ ॥ इन ब्रह्माजीके मनसे मरीच जन्मे, उनके पुत्र

सूत उवाच ॥ एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् ॥ पृष्टः प्रोवाच भगवान् शुकः परमधर्मवित् ॥ ६ ॥ श्रीशुक उवाच ॥ श्रूयतां मानवो वंशः प्राचुर्येण परंतप ॥ न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥ ७ ॥ परावरेषां भूताना-मात्मा यः पुरुषः परः ॥ स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किंचन ॥ ८ ॥ तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ॥ तस्मिन् जज्ञे महाराज स्वयंभूश्चतुराननः ॥९॥ मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः ॥ दाक्षायण्यां ततोऽदित्यां विवस्वानभवत् सुतः ॥ १० ॥ ततो मनुः श्राद्धदेवः संज्ञायामास भारत ॥ श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ॥ ११ ॥ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ॥ नरिष्यन्तं पृषधं च नभगं च कविं विभुः ॥१२॥ अप्रजस्य मनोः पूर्वं वशिष्ठो भगवान्किल ॥ मित्रावरुणयोरिष्टिं प्रजार्थमकरोत्प्रभुः ॥ १३ ॥ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत ॥ दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥ १४ ॥

कश्यपजी हुए, इन कश्यपजीकी भार्या दक्षकी बेटी अदितिके गर्भमें कश्यपजीसे सूर्यका जन्म हुआ ॥ १० ॥ हे भारत ! इन सूर्यनारा-यणसे संज्ञाके गर्भमें श्राद्धदेव मनु उत्पन्न हुए । इन श्राद्धदेवकी भार्या श्रद्धा हुई कि जिसके गर्भसे इन महात्माके दश पुत्र उत्पन्न हुए ॥ ११ ॥ उनके नाम यह हैं, यथा–इक्ष्वाकु, नृग, शर्याति, दिष्ट, धृष्ट, करूष, नरिष्यन्त, पृषध्र, नभग और कवि ॥ १२ ॥ हे राजन् ! इक्ष्वाकु आदि पुत्रोंकी उत्पत्तिके पहले मनुजी निःसन्तान थे, इसलिये महर्षि वशिष्ठजीने उनसे मित्रावरुणका यज्ञ कराया ॥ १३ ॥ हे राजन् ! मनुकी भार्या श्रद्धा उस यज्ञमें केवल दूध ही पीकर नियमसहित होताके निकट गयी और उसने *प्रणाम करके यह प्रार्थना की कि*

आप ऐसा होम करें कि जिससे मेरे कन्या उत्पन्न हो ॥ १४ ॥ श्रद्धाकी प्रार्थनासे "यज्ञ करो" इस प्रकार अध्वर्य्युसे प्रेरित हो होताने हविके ग्रहण हो जाने पर मनमें इस प्रकारका ध्यान और मुखसे "वषट्" शब्द उच्चारण करके मनुभार्याकी प्रार्थना को पूर्ण किया ॥ १५ ॥ हे राजन्! जब होताने इस प्रकारसे आचरण किया तब मनुके इलानाम एक कन्या उत्पन्न हुई। पुत्रकी चाहना होनेके कारण पुत्रीके होनेसे मनुको संतोष नहीं हुआ, इसलिये असंतुष्ट हो वशिष्ठजीसे बोले कि ॥ १६ ॥ हे भगवन्! आप ब्रह्मवादी हैं आप लोगोंका यह विपरीत कर्म कैसे हुआ? हा! कैसा कष्ट है? इस प्रकारसे मंत्रका उलटा होना उचित नहीं है॥१७॥ आप लोग ब्रह्मज्ञ और योगी हैं, तपकी अग्निसे आपके

प्रेषितोऽध्वर्युणा होता ध्यायंस्तत्सुसमाहितः ॥ हविषि व्यचरत् तेन वषट्कारं गृणन्द्विजः ॥ १५ ॥ होतुस्तद्व्यभिचारेणकन्येलानाम साऽभवत् ॥ तां विलोक्य मनुः प्राह नातिहृष्टमना गुरुम् ॥ १६ ॥ भगवन् किमिदं जातं कर्म वो ब्रह्मवादिनाम् ॥ विपर्ययमहो कष्टं मैवं स्याद् ब्रह्मविक्रिया ॥१७॥ यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः ॥ कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥१८॥ तन्निशम्य वचस्तस्य भगवान्प्रपितामहः ॥ होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ॥ १९ ॥ एतत्संकल्पवैषम्यं होतुस्ते व्यभिचारतः ॥ तथाऽपि साधयिष्ये ते सुप्रजस्त्वं स्वतेजसा ॥२०॥ एवं व्यवसितो राजन् भगवान् सुमहायशाः ॥ अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥ २१ ॥ तस्मै कामवरं तुष्टो भगवान्हरिरीश्वरः ॥ ददाविलाऽभवत्तेन सुद्युम्नः पुरुषर्षभः ॥ २२ ॥ स एकदा महाराज विचरन् मृगयां वने ॥ वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥ २३ ॥

अनन्त पाप भस्म हो गये हैं, देवता लोगोंमें अनृत (झूठ) के समान आप सब लोगोंमें इस प्रकार संकल्पकी विषमता कैसे हुई? ॥१८॥ हे राजन्! मनुके यह वचन सुनकर महर्षि वशिष्ठजी होताके व्यभिचारको समझ गये और मनुसे बोले कि ॥१९॥ हे वत्स! यद्यपि तुम्हारे होताने अन्य आचरण किया है, तो भी हम तुमको सुन्दर पुत्र ही देंगे॥२०॥ हे राजन्! वशिष्ठजी इस प्रकारसे कह मनुकी कन्या इलाको पुत्र बनानेकी कामनासे भगवान् आदिपुरुषकी स्तुति करने लगे ॥ २१ ॥ वशिष्ठजीकी स्तुतिसे भगवान् शीघ्र ही प्रसन्न हो गये और संतुष्ट हो वशिष्ठजीको मनमाना वरदान दिया, उस वरके प्रभावसे मनुकी कन्या इला सुद्युम्ननामक श्रेष्ठ पुत्र हो गयी ॥२२॥ हे महाराज! यह सुद्युम्न

एक दिन, सिंधुदेशके उत्पन्न हुए घोड़ेपर चढ़कर और कुछेक मंत्रियोंको साथ लेकर आखेटके लिये वनमें विचरण करने लगा ॥ २३ ॥ उसके हाथमें रुचिर धनुष और विचित्र बाण था और शरीरमें दृढ़ बख्तर पहने हुए था, इसलिये वह मृगोंके पीछे निर्भय दौड़ता हुआ उत्तर दिशामें पहुँचा ॥ २४ ॥ वहां सुमेरुपर्वतकी तलैटीमें सुकुमार वन है, जहां भगवान् भूतनाथ भूतेश्वर सदा पार्वतीजीके साथ रहकर विहार किया करते हैं, मनुका पुत्र सुद्युम्न अपने सेवकोंके साथ उसी वनमें पहुँचा । उसने वहां पहुँचते ही अपने आपको स्त्री देखा और अपने घोड़ेको घोड़ीरूप पाया ॥ २५ ॥ २६ ॥ और उसके सब सेवक अकस्मात् अपने-अपने पुरुषपनमें विकार हुआ देख परस्पर एक दूसरेको निहारकर विस्मित हुए ॥ २७ ॥ यह सुन राजा परीक्षित् बोले कि हे भगवन् ! यह स्थान ऐसे गुणवाला कैसे हुआ ? और किस पुरुषने

प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ॥ दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥ २४ ॥ स कुमारो वनं मेरोरधस्तात्प्रविवेश ह ॥ यत्रास्ते भगवान् रुद्रो रममाणः सहोमया ॥२५॥ तस्मिन् प्रविष्ट एवासौ सुद्युम्नः परवीरहा ॥ अपश्यत् स्त्रियमात्मानमश्वं च वडवां नृप ॥ २६ ॥ तथा तदनुगाःसर्व आत्मलिङ्गविपर्ययम् ॥ दृष्ट्वा विमनसोऽभूवन् वीक्षमाणाः परस्परम् ॥ २७ ॥ राजोवाच ॥ कथमेवं गुणो देशः केन वा भगवन्कृतः ॥ प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥२८॥ श्रीशुक उवाच ॥ एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ॥ दिशो वितिमिराभासाः कुर्वन्तः समुपागमन् ॥२९॥ तान् विलोक्याम्बिका देवी विवासा व्रीडिता भृशम् ॥ भर्तुरङ्कात्समुत्थाय नीवीमाश्वथ पर्यधात् ॥३०॥ ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ॥ निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम् ॥३१॥

इस स्थानको ऐसा कर दिया ? इस बातको सुनकर हमको बड़ा कौतूहल हुआ है, आप कृपा करके इस प्रश्नकी व्याख्या कीजिये ॥ २८ ॥ श्रीशुकदेवजी कहने लगे कि हे नृपश्रेष्ठ ! एक समय श्रेष्ठ बुद्धिवाले ऋषि लोग भगवान् गिरीश (महादेव) जीके दर्शन करनेकी वासनासे सब दिशाओंका अन्धकार दूर करते और प्रकाशको रहित करते अर्थात् केवल अपना प्रभाव प्रकाशित करते हुए वनमें गये थे ॥ २९ ॥ उस समय भगवती अम्बिकादेवी विवसना अर्थात् वस्त्ररहित थीं, इसलिये मुनि लोगोंको देखकर अत्यन्त लज्जित हुई और उन्होंने घबड़ाकर पतिकी गोदीसे उतर झटपट कटिवसन पहन लिये ॥ ३० ॥ हरगौरीका विहार देखकर उन सब

ऋषिगणोंका मन भी स्त्री प्रसंगसे कलुषित हुआ और वे उसी समय वहांसे लौटकर नरनारायणके आश्रमको चले गये ॥३१॥ इसके पीछे भगवान् भूतनाथ अपनी प्राणप्यारीका प्रिय कार्य करनेको समझाते-बुझाते हुए बोले कि आजसे जो कोई इस स्थानमें आयेगा, वह उसी समय स्त्री हो जायगा। * हे राजन्! तबसे सब पुरुषोंने इस वनको छोड़ दिया, कोई उस दिशाको भी तो नहीं जाता था ॥ ३२ ॥ राजकुमार सुद्युम्न अपने सेवकोंके साथ इस वनमें प्रवेश करनेके पीछे वन-वनमें भ्रमण करने लगे ॥ ३३ ॥ सखी सहेली नारियोंके

तदिदं भगवानाह प्रियायाः प्रियकाम्यया ॥ स्थानं यः प्रविशेदेतत्स वै योषिद्भवेदिति ॥ ३२ ॥ तत ऊर्ध्वं वनं तद्वै पुरुषा वर्जयन्ति हि ॥ सा चानुचरसंयुक्ता विचचार वनाद्वनम् ॥ ३३ ॥ अथ तामाश्रमाभ्याशे चरन्तीं प्रमदोत्तमाम् ॥ स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान्बुधः ॥३४॥ साऽपि तं चमके सुभ्रूः सोमराजसुतं पतिम् ॥ स तस्यां जनयामास पुरूरवसमात्मजम् ॥३५॥ एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ॥ सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम॥३६॥ स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ॥ सुद्युम्नस्याशयन्पुंस्त्वमुपधावत शंकरम् ॥ ३७ ॥

अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसाम्प्रतम् ॥ अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥ यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये ॥ धार्यते यैरिह ज्योतिः शिवः पन्थाश्च दर्शितः॥१२॥यान् वदन्त्युपतिष्ठन्ते लोकनाथाः सुरेश्वराः॥ भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥१३॥ वयं तत्रापि भृगवः शिष्योऽस्या नः पिताऽसुरः ॥ अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती ॥ १४ ॥ एवं शपन्तीं शर्मिष्ठा गुरुपुत्रीमभाषत। रुषा श्वसन्त्युरङ्गीव धर्षिता दष्टदच्छदा ॥१५॥ आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि ॥ किं न प्रतीक्षसेऽस्माकं गृहान् बलिभुजो यथा ॥ १६ ॥ एवंविधैः सुपरुषैः शप्त्वाऽऽचार्यसुतां सतीम् ॥ शर्मिष्ठा प्राक्षिपत् कूपे वास आदाय मन्युना ॥ १७ ॥ तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ॥ प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ १८ ॥

इस प्रकार तिरस्कार किया, तब शर्मिष्ठा धर्षित हुई सर्पिणीके समान बारंबार लम्बे-लम्बे श्वास लेने लगी और क्रोधके मारे होठ चबा-चबाकर कहने लगी कि ॥ १५ ॥ अरी भिखमंगी ! अपने आचरणको विना जाने ही कटु वचन कहने लगी ? काकके समान क्या तुम हमारे गृहका मुख नहीं देखती रहती हो ? ॥ १६ ॥ हे महाराज परीक्षित् ! इस प्रकारके कठोर वचन भी गुरुकन्या देवयानीको कहकर शर्मिष्ठाका क्रोध शांत नहीं हुआ, बरन इसके वस्त्र उतार नंगी कर धक्का दे एक कुएँमें ढकेल दिया ॥ १ ॥ देवयानीको कुएँमें ढकेलकर शर्मिष्ठा अपने घरपर चली आयी। भाग्यसे शिकार खेलकर घूमते-घूमते राजा ययाति भी उस वनमें आ पहुँचे और प्यासके मारे जल

भरनेके लिये जैसे ही इस कुएँके समीप गये कि वैसे ही उन्होंने देवयानीको कुएँमें देखा ॥ १८ ॥ शुक्राचार्यकी कन्याको कुएँमें नंगी गिरी हुई देखकर राजाको अत्यन्त दया आयी और तत्काल अपना दुपट्टा राजाने उसे पहननेको दे दिया और अपने हाथसे उसका हाथ पकड़कर उस दयावान् राजाने उसको कुएँसे बाहर निकाल लिया ॥ १९ ॥ देवयानी कुएँसे निकलकर प्रेमभरे वचन राजा ययातिसे बोली ॥२०॥ हे महाराज! आपने अनुग्रह करके हमारा हाथ पकड़ा है, अब यही प्रार्थना है कि जिस हाथको एकबार आपने ग्रहण किया उसको कोई दूसरा ग्रहण न करने पाये ॥२१॥ हे वीर! यद्यपि प्रतिलोम विवाह ठीक नहीं तो भी मैं कुएँमें डूबकर मरती थी इसी अव-

दत्त्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे ॥ गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥ १९ ॥ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ॥ राजंस्त्वया गृहीतो मे पाणिः परपुरंजय ॥ २० ॥ हस्तग्राहोऽपरो मा भूद् गृहीतायास्त्वया हि मे ॥ एष ईशकृतो वीर संबन्धो नौ न पौरुषः ॥ २१ ॥ यदिदं कूपमग्नाया भवतो दर्शनं मम ॥ न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ॥ कचस्य बार्हस्पत्यस्य शापाद् यमशपं पुरा ॥ २२ ॥ ययातिरनभिप्रेतं दैवोपहृतमात्मनः ॥ मनस्तु तद्गतं बुद्ध्वा प्रतिजग्राह तद्वचः ॥ २३ ॥ गते राजनि सा वीरे तत्र स्म रुदती पितुः ॥ न्यवेदयत्ततः सर्वमुक्तं शर्मिष्ठया कृतम् ॥ २४ ॥

सरपर आपका दर्शन हुआ तब हमारा दोनों जनोंका यह बानक परमेश्वरने बनाया है, यह किसी पुरुषका बनाया नहीं है और हे नरेश! ब्राह्मणके साथ मेरा विवाह नहीं होगा क्योंकि पहले मैंने बृहस्पतिके पुत्र कचको शाप दिया था, तब उन्होंने भी हमको शाप दिया था ॥ २२ ॥ शास्त्रके प्रतिकूल और इच्छानुसार न होने पर भी भाग्यसे प्राप्त हुआ जान और अपने अन्तःकरणको भी उसके प्रति सकाम देखकर यह निश्चय करके, कि मेरा मन अधर्ममें नहीं प्रवेश करता। देवयानीके वाक्यको राजा ययातिने अंगीकार किया॥२३॥ इसके उपरांत जब राजा ययाति चले गये तब देवयानी उस स्थानसे रोती-रोती पिताके निकट गयी और सब वृत्तांत निवेदन कर दिया

* इसमें यह कथा है कि –" बृहस्पतिके पुत्र कच जब शुक्राचार्य मुनिके निकट मृतसंजीवनी विद्या ग्रहण करते थे उस समय एक दिन शुक्रकी पुत्री देवयानी उनके साथ विवाह करना चाहा था, तब कच बोले कि तुम हमारी गुरुकन्या होनेसे पूजने योग्य हो, फिर हम किस प्रकारसे तुम्हारा पाणिग्रहण करें? तब देवयानीने कुपित हो यह शाप दिया कि, "तुम्हारी विद्या प्रभाहीन होगी" तब कचने भी यह शाप दिया कि–"तुम्हारा ब्राह्मणके साथ विवाह ही नहीं होगा" इसलिये ब्राह्मण हमसे विवाह ही न कर सकेगा ।

अर्थात् शर्मिष्ठाने जो भिखमङ्गी कहा था और कुएँमें डालकर जो कुकर्म किया था, वह सब विस्तारपूर्वक इसने अपने पितासे कहा॥२४॥ यह सुनकर शुक्राचार्यके मनमें बड़ा दुःख हुआ। पुरोहिताईकी निंदा करते और भिक्षावृत्तिकी प्रशंसा करते हुए वे दैत्यराजकी पुरीसे अपनी कन्यासहित बाहर चले ॥ २५ ॥ यह सुनकर राजा वृषपर्वाने जाना कि गुरुजी अप्रसन्न होकर देवताओंकी जीत करेंगे, इसलिये शीघ्र ही मार्गमें जाकर उनके चरणोंमें गिर पड़ा और शिर नवाकर प्रसन्न करने लगा ॥ २६ ॥ एक क्षणभरमें शुक्राचार्यका आधा क्रोध शांत हो गया और वह शिष्यसे बोले कि हे राजन्! हमारी कन्या जो कुछ कहे, इसकी उस अभिलाषाको तुम पूर्ण करो, क्योंकि हम इस अपनी कन्याको छोड़कर रह नहीं सकते ॥ २७ ॥ गुरुजीके यह वचन सुनकर गुरुकन्याकी प्रसन्नता चाहता हुआ वृषपर्वा खड़ा रहा।

दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ॥ स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ॥ २५ ॥ वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् ॥ गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि ॥ २६ ॥ क्षणार्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः ॥ कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥ तथेत्यवस्थिते प्राह देवयानी मनोगतम् ॥ पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥ २८ ॥ स्वानां तत् संकटं वीक्ष्य तदर्थस्य च गौरवम् ॥ देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् ॥ २९ ॥ नाहुषाय सुतां दत्त्वा सह शर्मिष्ठयोशना ॥ तमाह राजञ्छर्मिष्ठामाधास्तल्पे न कर्हिचित् ॥ ३० ॥

तब देवयानी अपने मनकी बात प्रकाशित करके बोली कि हमारे पिता जहां हमारा विवाह करें, यह शर्मिष्ठा तुम्हारी कन्या उसी स्थानमें अपनी सब सखियोंके साथ जाकर हमारी दासी हो ॥ २८ ॥ वृषपर्वाने विचारा कि गुरुजीके चले जानेसे हमारे ऊपर घोर संकट आ पड़ेगा और यहां रहनेसे हमारे कार्य सिद्ध होंगे। यह सोच-विचार कर राजा वृषपर्वा गुरुकन्या देवयानीके हाथमें सखियों सहित शर्मिष्ठाको सौंप दिया। जब पिताने शर्मिष्ठाको दे दिया तब यह हजार सखियोंके साथ देवयानीकी सेवा करने लगी ॥ २९ ॥ इसके पीछे दैत्यगुरु शुक्राचार्यजीने शर्मिष्ठासहित देवयानीका राजा ययातिके साथ विवाह कर दिया और भलीभांतिसे कह दिया, कि यद्यपि हम अपनी कन्याके

साथ शर्मिष्ठाको भी तुम्हें देते हैं तो भी तुम किसी समय इसको अपनी शय्यापर न ग्रहण कर सकोगे ॥ ३० ॥ हे महाराज परीक्षित् ! किसी समय शर्मिष्ठाने देखाकि देवयानीने स्वामीके सहवाससे परम सुन्दर पुत्र उत्पन्न किया है, इसलिये ऋतुकाल आ पहुँचनेपर अपनी सखीके पति ययाति राजाको एकान्तमें बुलाकर पुत्र उत्पन्न करनेके लिये प्रार्थना की॥३१॥राजा ययाति अत्यन्त धर्मात्मा थे। ऋतुकालमें राजकुमारी शर्मिष्ठासे संतानके लिये प्रार्थित होकर विचारने लगे कि इसकी कामना पूरी करनेमें धर्म है, इसलिये शुक्राचार्यजीका वचन स्मरण आनेपर भी उन्होंने दैवप्राप्त पितृयज्ञसे शर्मिष्ठाके साथ विवाह किया। राजा ययातिने धर्म समझकर ही शर्मिष्ठाकी प्रार्थना पूर्णकी थी, कुछ कामके वश होकर नहीं की । इसके उपरांत देवयानीने यदु और तुर्वसु दो पुत्र उत्पन्न किये और शर्मिष्ठाके गर्भसे द्रुह्यु,

विलोक्यौशनसीं राजञ्छर्मिष्ठा सप्रजां क्वचित् ॥ तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥ ३१ ॥ राजपुत्र्याऽर्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् ॥ स्मरञ्छुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥ ३२ ॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत ॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥ गर्भसंभवमासुर्या भर्तुर्विज्ञाय मानिनी ॥ देवयानी पितुर्गेहं ययौ क्रोधविमूर्च्छिता ॥ ३४ ॥ प्रियामनुगतः कामी वचोभिरुपमन्त्रयन् ॥ न प्रसादयितुं शेके पादसंवाहनादिभिः ॥ ३५ ॥ शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष ॥ त्वां जरा विशतां मन्द विरूपकरणी नृणाम् ॥ ३६ ॥ ययातिरुवाच ॥ अतृप्तोऽस्म्यद्य कामानां ब्रह्मन् दुहितरि स्म ते ॥ व्यत्यस्यतां यथाकामं वयसा योऽभिधास्यति ॥३७॥

अनु और पूरु इन तीनों पुत्रोंने जन्म ग्रहण किया ॥ ३२ ॥ ३३ ॥ हे महाराज ! अपने स्वामीसे शर्मिष्ठाको गर्भकी उत्पत्ति जानकर देवयानी अभिमानसे परिपूर्ण होगयी और क्रोधके कारण मूर्च्छितसी हो तत्काल पिताके घरको चली गयी ॥ ३४ ॥ हे राजन् ! राजा ययाति अत्यन्त कामी थे। वह प्यारीका क्रोध देखकर विनती करके प्रसन्न करते-करते अपनी प्रिय भार्याके पीछे-पीछे चले गये, परंतु अनेक प्रकारसे प्रार्थना द्वारा भी वह देवयानीको प्रसन्न नहीं कर सके ॥३५॥ हे महाराज ! इस ओरका कन्याके मुखसे सब वृत्तांत जानकर दैत्यगुरु शुक्राचार्यजी महाक्रोधित हो घृणायुक्त वचनोंसे जामाताको कहने लगे- तू कामी होकर अन्यायके कर्म करता है । अरे मतिमन्द ! इस अपराधसे मनुष्योंको विरूप करनेवाली जरा (बुढ़ापा) तेरे शरीरमें प्रवेश करे ॥ ३६ ॥ यह शाप सुनकर राजा ययातिका चित्त अत्यंत

दुःखित हुआ और निवेदन किया; ब्रह्मन् ! आपकी बेटीके काम भोगसे हम अबतक भी सब प्रकारसे तृप्त नहीं हुए हैं। तब शुक्राचार्यजी बोले कि हां यदि कोई पुरुष तुम्हारी जरा ग्रहणकर ले तो उसकी वयस (अवस्था) से तुम इच्छानुसार काम भोग कर सकोगे ॥ ३७ ॥ हे राजन् ! इस प्रकार राजा ययाति जराके उतरनेंकी व्यवस्था पाकर पहले अपने बड़े पुत्र यदुको बुलाकर बोले- हे तात यदो ! हमारी यह जरा अवस्था ग्रहण करके अपनी वयस हमको दो॥३८॥बेटा! तुम्हारे नाना शुक्राचार्यने हमको जरा ग्रस्त किया है, परंतु हम अबतक विषय भोगसे तृप्त नहीं हुए हैं, इसलिये यह जरा तुम लो और तुम्हारी युवा अवस्था लेकर कुछ वर्षतक मैं विहार करूँगा ॥ ३९ ॥ यह सुन कर यदु बोले कि पिता ! आप मध्यम समयमें जराको प्राप्त हुए हैं। आपकी इस जराके लेनेको हमारा चित्त नहीं चाहता, क्योंकि विना

इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत ॥ यदो तात प्रतीच्छेमां जरां देहि निजं वयः ॥ ३८ ॥ मातामहकृतां वत्स न तृप्तो विषयेष्वहम् ॥ वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥ ३९ ॥ यदुरुवाच ॥ नोत्सहे जरसा स्थातु-मन्तरा प्राप्तया तव ॥ अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥४०॥ तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ॥ प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥ ४१ ॥ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकम् ॥ न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ॥ ४२ ॥ पूरुरुवाच ॥ को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान् ॥ प्रतिकर्तुं क्षमो यस्य प्रसा-दाद्विन्दते परम् ॥ ४३ ॥

ग्राम्यसुखोंके भोगे कौन पुरुष उस (कामभोग) से तृष्णारहित हो सकता है ?॥ ४० ॥ हे भारत ! इसके पीछे तुर्वसु और द्रुह्यु इन दो पुत्रोंसे राजाने युवा अवस्था मांगी,परन्तु उन्होंने भी कोरा जवाब दे दिया। हे राजन् ! इन लोगोंको धर्मज्ञान नहीं था। यह अनित्य पदार्थको ही नित्य मानते थे। फिर भला इन लोगोंसे पिताकी आज्ञा मानी जानेकी क्या सम्भावना ? ॥४१॥ परंतु राजा ययातिका सबसे छोटा पुत्र यद्यपि वयसमें छोटा था, तथापि गुणोंमें सबसे श्रेष्ठ था, सबसे पीछे उसको बुलाकर राजा ययाति जरा लेनेके लिये बोले कि हे वत्स ! तुम अपने बड़े भ्राताओंके समान हमसे " नहीं " कहने योग्य नहीं हो ॥ ४२ ॥ जब इस प्रकार राजा ययातिने कहा तब पूरुने कहा कि

हे मनुष्येंद्र। इस लोकमें कोई पुरुष भी पिताका प्रत्युपकार नहीं कर सकता है। पिता क्या साधारण पुरुष हैं? क्योंकि उनसे देहका सम्बन्ध है और उनकी प्रसन्नतासे पुरुष परमगतिको प्राप्त हो जाता है॥४३॥ तो भी जो पुत्र पिताका विचारा हुआ कार्य अपने आप ही कर देता है, वह उत्तम कहलाता है और जो आज्ञा पाकर कार्य करता है वह मध्यम है और जो आज्ञा पाकर भी उस कार्यको नहीं करता है, वह पुत्र नहीं किन्तु पिताका विष्ठामात्र है और नीच कहलाता है ॥४४॥ इस प्रकार कह हर्ष प्रकट करके उसने पिताकी जरा अवस्था ग्रहण

उत्तमश्चिन्तितं कुर्यात्प्रोक्तकारी तु मध्यमः ॥ अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥ ४४ ॥ इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ॥ सोऽपि तद्वयसा कामान्यथावज्जुजुषे नृप ॥ ४५ ॥ सप्तद्वीपपतिः सम्यक् पितृवत्पालयन्प्रजाः ॥ यथोपजोषं विषयाञ्जुजुषेऽव्याहतेन्द्रियः ॥ ४६ ॥ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ॥ प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥ ४७ ॥

करली। राजा ययाति भी अपने पुत्रकी युवा अवस्था पाकर भलीभांति सुख भोगने लगा ॥४५॥ हे महाराज! राजा ययाति सप्तद्वीपका राजा था। वह भलीभांति पुत्रके समान प्रजाका पालन करने लगा इच्छानुसार विषयभोग भोगने लगा पुत्रकी युवा अवस्था पानेसे इस राजा ययातिकी सब इंद्रियाँ प्रबल और अनिवारित हो गयीं *॥४६॥ और देवयानी भी मन, वचन, कायसे व और भी सब भांति

* शंका—राजा ययाति छोटे पुत्रकी अवस्था लेकरके उसी छोटे पुत्रकी माताके संग विहार करता था, इस बातसे जान पड़ता है कि, पुत्रने ही अपनी माताके साथ रमण किया, क्योंकि राजामें रमण करनेका सामर्थ्य होता तो पुत्रकी युवावस्था क्यों लेता? इसने यह महापाप क्यों किया? यदि कोई ऐसा कहे कि पुत्रको पिताकी आज्ञा पालन करनी चाहिये, यह भगवान्‌की बनायी मर्यादा है और धर्म शास्त्रका भी यही वाक्य है, सो सत्य है। निःसन्देह वह मर्यादा पूरी करनी चाहिये, परन्तु न्याय विचारकर कार्य करना चाहिये क्योंकि जो पिताकी बुद्धि मलिन होजाय और पिता आज्ञा करें कि मेरे लिये वेश्या अथवा वारुणी, अथवा बुरी वस्तुको ला दे और वह अनेक प्रकारकी कुत्सित वस्तुपर दृष्टि करे तो पुत्रको ऐसे पिताकी आज्ञा भी नहीं माननी चाहिये फिर पुत्रने ऐसे पिताके वचन क्यों माने।

उत्तर—शर्मिष्ठाके ओष्ठ पान करके ययातिकी बुद्धि भ्रष्ट हो गयी और वह दैत्यकी कन्याका पुत्र था इसलिये दोनों पापी मिल गये इसीसे महापाप किया।

एकान्तमें दिनपर दिन अपने प्राणेश्वरको अत्यन्त प्रसन्न करती रहती थी ॥४७॥ हे राजन्! राजा ययाति भी अनेक-अनेक दक्षिणा देकर अनेक यज्ञ कर सर्ववेदमय सर्वदेवस्वरूप यज्ञपुरुष भगवान् वासुदेवका भजन करने लगे ॥४८॥ अर्थात् आकाशमण्डलमें जलदावलि (बादलोंकी पंक्ति) के समान जिससे प्रत्यक्ष परिदृश्यमान जगत् विरचित होकर यावत् इंद्रियवृत्ति तावत् विचित्र रूपसे प्रकाश पाती है और इसी इंद्रियवृत्तिके उपरममें स्वप्न और मायारहित मनोरथपाकर प्रकाशहीन होते हैं॥ ४९ ॥ राजा ययातिने विरागी होकर उन्हीं अन्तर्यामी परमसूक्ष्मरूप भगवान् वासुदेवके अनेक यज्ञ किये॥५०॥ श्रीशुकदेवजी बोले कि हे राजन्! इस प्रकार सहस्र वर्षतक अपराङ्मुख पञ्च इंद्रिय और छठे मनसे सदा विषयभोग करके भी सर्वभूमीश्वर राजा ययाति सब भांतिसे तृप्तिको नहीं प्राप्त हुआ ॥५१॥ इति श्रीम-

अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणः ॥ सर्वदेवमयं देवं सर्ववेदमयं हरिम् ॥ ४८ ॥ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ॥ नानेव भाति नाभाति स्वप्नमायामनोरथः ॥ ४९ ॥ तमेव हृदि विन्यस्य वासुदेवं गुहाशयम् ॥ नारायणमणीयांसं निराशीरयजत् प्रभुम् ॥ ५० ॥ एवं वर्षसहस्राणि मनष्षष्ठैर्मनः सुखम् ॥ विदधानोऽपि नातृप्यत्सार्वभौमः कदिन्द्रियैः ॥ ५१ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे ययातिचरितं नामाष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुक उवाच ॥ स इत्थमाचरन् कामान् स्त्रैणोपह्नवमात्मनः ॥ बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत् ॥ १ ॥ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ॥ धीरा यस्यानुशोचन्ति वने ग्रामनिवासिनः ॥२॥ बस्त एको वने कश्चिद्विचिन्वन् प्रियमात्मनः ॥ ददर्श कूपे पतितां स्वकर्मवशगामजाम्॥ ३ ॥

द्भागवते महापुराणे नवमस्कन्धे भाषाटीकायामष्टादशोऽध्यायः॥ १८ ॥ दोहा—नृप ययाति निजप्रियाको, अजसम चरित सुनाय। बहुरि मोक्षभागी भयो, उन्निसवें अध्याय ॥ श्रीशुकदेवजी कहने लगे कि हे राजा परीक्षित्! राजा ययाति इस प्रकार विषयभोगकरते-करते अकस्मात् एक दिन अपने आपको स्त्रैण समझकर अपनी आत्माका विकार जान वैराग्ययुक्त हो अपनी परम प्यारी देवयानीसे वर्णन करने लगे ॥ १ ॥ कि हे भार्गवि! हमारे समान कोई कामी एक गांवमें रहता था। वनवासी धीरगण उसके आचरणोंपर अब तब कभी-कभी शोक किया करते हैं। उस पुरुषकी अनुष्ठान की हुई गाथा मैं तुमसे वर्णन करता हूँ, श्रवण करो ॥ २ ॥ "एक छाग (पुरुष)

ने वन (संसार) में अपने प्रिय विषयको ढूँढ़ते-ढूँढ़ते अचानक एक छागीको कर्मके वश कुएँमें गिरी हुई देखा ॥३॥ इस अत्यन्त कामी छागने उस बकरीके निकालनेका उपाय सोचा और कुएँके किनारे अपने सींगसे मिट्टी खोदकर उसके निकालनेका मार्ग कर दिया ॥४॥ उस मार्गसे वह कांतियुक्त छागी कुएँसे निकल उसी छागकी अभिलाषा पूर्ण करने लगी । जब उस बकरीने इस बकरेको वरण कर लिया तो और बहुत सारी छागी भी मोटे-ताजे, रति करनेमें समर्थ, वीर्यके सींचनेवाले और मैथुन करनेमें चतुर समझकर उस छागको चाहने लगीं ॥५॥ इसलिये वह एक ही बकरा इन बहुतसी बकरियोंकी रति बढ़ाता हुआ उनके साथ केलि करने लगा । वह छाग कामरूप गृहमें ऐसा फँस गया कि अपनी आत्माको भी न जान सका ॥ ६ ॥ परन्तु जो छागी कुएँमें गिरी थी, और छागियोंको अपने से अधिक

तस्या उद्धरणोपायं बस्तः कामी विचिन्तयन् ॥ व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ॥ ४ ॥ सोत्तीर्य कूपात् सुश्रोणी तमेव चकमे किल ॥ तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः ॥ पीवानं श्मश्रुलं प्रेष्ठं मिढ्वांसं याभकोविदम् ॥५॥ स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः ॥ रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥६॥ तमेव प्रेष्ठतमया रममाणमजाऽन्यया॥ विलोक्य कूपसंलग्ना नामृष्यद् बस्तकर्म तत् ॥७॥ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् ॥ इन्द्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ॥८॥ सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम् ॥ कुर्वन्निडविडाकारं नाशक्नोत्पथि संधितुम् ॥९॥ तस्य तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा ॥ लम्बन्तं वृषणं भूयः संदधेऽर्थाय योगवित्॥१०॥

प्यारी और उनके साथ अपने प्रियतमको सदा रमण करता हुआ देख अत्यन्त क्रोधित हुई और उस छागका यह कर्म बहुत नहीं सह सकी ॥७॥ इसलिये वह सुहृदरूपी, वास्तवमें दुहृद; क्षणसौहृद, इंद्रियासक्त और कामुक उस छागको छोड़कर दुःखित हो अपने स्वामीके पास चली गई ॥ ८ ॥ वह छाग तो बहुत ही स्त्रैण था, इसलिये कातर हो शब्द करता हुआ उसको मनानेके लिये उसके पीछे-पीछे जाने लगा, परन्तु मार्गमें वह उस बकरीको किसी प्रकारसे भी प्रसन्न न कर सका ॥ ९ ॥ उस स्थानमें इस छागीके स्वामी एक ब्राह्मणने क्रोध करके इस छागके दोनों लम्बायमान अण्डकोश काट डाले अर्थात् उसको भोग करनेके योग्य न रखा, परंतु वह ब्राह्मण उपाय भी

जानता था, इस लिये अपनी बकरीके काम भोगार्थ फिर इस छागके अण्ड जोड़ दिये अर्थात् फिर उस छागको मैथुन करनेका सामर्थ्य दे दिया ॥१०॥ हे भद्रे ! इस प्रकारसे वह छाग सवृद्धवृषण अर्थात् रतिशक्तियुक्त हो कुएंसे निकाली हुई उस छागीके साथ बहुत कालतक विषयभोग करता रहा, परन्तु कामकी सेवासे अबतक उस बकरेको सन्तोष नहीं हुआ" ॥ ११ ॥ हे सुभ्रु ! इस छागके समान हम भी तुम्हारे प्रेममें बँधकर अत्यन्त दीन हो गये हैं । तुम्हारी मायासे मोहित होनेके कारण हम अपने आपको भी भूल गये हैं ॥ १२ ॥ हे भद्रे ! पृथ्वीमें जितना धान्य, सुवर्ण, जितने पशु, जितनी स्त्री और जो-जो वस्तु हैं,वे सब भी कामसे हत हुए पुरुषके मनको संतुष्ट नहीं कर सकती हैं ॥ १३ ॥ भोग विलासके द्वारा कामकी किसी प्रकार शांति नहीं होती वरन् घृतद्वारा अग्निके समान विषयभोग

संवृद्धवृषणः सोऽपि ह्यजया कूपलब्धया ॥ कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥ ११ ॥ तथाऽहं कृपणः सुभ्रूर्भवत्याः प्रेमयन्त्रितः ॥ आत्मानं नाभिजानामि मोहितस्तव मायया ॥१२॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ॥ न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते ॥ १३ ॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१४॥ यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् ॥ समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ १५ ॥ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ॥ तां तृष्णां दुखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥ मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ॥ बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ १७ ॥

बढ़ता ही जाता है, जैसे घृत डालनेसे अग्नि ॥ १४ ॥ परन्तु जिस समय पुरुष सब प्राणियोंसे अमंगल भाव अर्थात् रागद्वेषादिकी विषमताका त्याग कर देता है और सबसे समदृष्टि कर लेता है, तब उसको सब दिशायें सुखदायिनी हो जाती हैं ॥ १५ ॥ इसलिये दुर्म्मति पुरुष जिसको नहीं छोड़ सकते और प्राचीन पुरुषके पास भी जो पुरानी नहीं होती और जो दुःखकी राशिके लिये रहती है, उस तृष्णाको सुख चाहनेवाले पुरुषको चाहिये कि शीघ्र छोड़ दे ॥१६॥ और स्त्रीका सङ्ग तो सब प्रकारसे त्यागना आवश्यक है, अतः माता बहन अथवा कन्याके संग इकलेमें एक आसनपर बैठना ठीक नहीं क्योंकि इन्द्रियाँ अतिशय बलवान् हैं, विद्वान् पुरुषको भी

खींच लेती हैं ॥१७॥ हे भद्रे ! विचार करके देखो बारम्बार विषयकी सेवा करते हुए पूरे एक सहस्र वर्ष बीत गये तो भी दिन-दिन तृष्णा बढ़ती ही जाती है ॥ १८ ॥ इसलिये मैं पहले तृष्णाको छोड़कर फिर ब्रह्ममें मन लगाऊंगा, फिर सुखदुःखादि द्वन्द्वरहित और निरहंकार हो मृगगणोंके साथ घूमूंगा ॥ १९ ॥ हे प्रिये ! जो पुरुष देखे-सुने संसारको भी आत्मनाशक और असत् जानकर उसका अनुध्यान व भोग छोड़ देते हैं, वे ही देखे-सुने विषयके अनुध्यानादिमें पण्डित और आत्मदर्शी हैं ॥ २० ॥ श्रीशुकदेवजी बोले कि हे परीक्षित् ! राजा ययातिने इस प्रकार अपनी स्त्रीको समझाकर छोटे पुत्र पूरुको उसकी युवा अवस्था लौटाकर उससे अपनी जरा अवस्था

पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् ॥ तथाऽपि चानुसवनं तृष्णा तेषूपजायते ॥ १८ ॥ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ॥ निर्द्वन्द्वो निरहंकारश्चरिष्यामि मृगैः सह ॥ १९ ॥ दृष्टं श्रुतमसद्बुद्ध्वानानुध्यायेन्न संविशेत् ॥ संसृतिं चात्मनाशं च तत्र विद्वान् स आत्मदृक् ॥२०॥ इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः ॥ दत्त्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥ २१ ॥ दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुम् ॥ प्रतीच्यां तुर्वसुं चक्रे उदीच्यामनुमीश्वरम् ॥ २२ ॥ भूमण्डलस्य सर्वस्य पूरुमर्हत्तमं विशाम् ॥ अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥ २३ ॥ आसेवितं वर्षपूगान् षड्वर्गं विषयेषु सः ॥ क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥ २४ ॥

ग्रहण करली । फिर पीछे राजा ययातिको कुछ चाहना न रही ॥२१॥ पूर्वदिशा द्रुह्युको, दक्षिण दिशा यदुको, पश्चिम दिशा तुर्व्वसुको और उत्तर दिशाका अनुको राजा बनाया ॥ २२ ॥ फिर सब भूमण्डलका राज्य क्षत्रियोत्तम प्यारे पुत्र पूरुको * देकर और बड़े बेटों को इस पूरुकी आज्ञामें रखकर आप वनको चले गये ॥ २३ ॥ हे राजन् ! राजा ययातिने बहुत वर्षोंतक शब्दादि विषय समूहमें छः

* शंका—राजा ययाति बड़े बुद्धिमान् और गुणनिधान थे; तो भी ऐसा बड़ा अन्याय क्यों किया ? कि बड़े पुत्रोंको छोड़कर छोटे पुत्रको राज्य दिया, क्या कारण है ?

उत्तर—कामी, लोभी, क्रोधी, ऐसे-ऐसे जीव पृथ्वीपर हैं, परतु न्याय अन्यायका विचार नहीं करते । नित्य अपने शरीरका सुख चाहते हैं, अर्थात् न्यायमें दुःख देखेंगे तब न्यायको त्याग देंगे, अन्यायमें सुख देखेंगे तब अन्याय करेंगे । जिसमें शरीरको सुख हो उसीको पुण्य जानते है और जिसमें शरीरको कष्ट हो उसको पाप समझते हैं, सुकर्म कुछ नहीं देखते । इसीसे ययाति राजाने छोटे बड़ेका विचार नहीं किया, जिसकी देहसे सुख पाया उसीको राज्य दिया ।

इन्द्रियोंके द्वारा सुख भोगा था, परन्तु उसने इस प्रकारसे स्पृहा छोड़ एक क्षणभरमें इंद्रियोंके सुखको छोड़ दिया, जैसे पंख जम आनेपर पक्षियोंके बच्चे घोंसलेको छोड़ देते हैं ॥२४॥राजा ययाति संगको छोड़कर आत्मानुभवसे त्रिगुणात्मकरूप लिंग निरस्त कर और भली-भांति विख्यात हो निर्मल परब्रह्म वासुदेवमें शीघ्र ही भगवद्गतिको प्राप्त हो गया ॥ २५ ॥ हे महाराज ! स्त्री-पुरुषका परस्पर स्नेह हेतु परिहासके समान जो इतिहास कहा गया, देवयानी इसको सुनकर अपने प्रस्तोभ अर्थात् निवृत्तिमार्गमें उत्साहित हुई ॥ २६ ॥ और उस अबलाने प्याऊपर जानेवालोंके समान ईश्वर परतन्त्र सुहृद्गणोंका वास मायाविरचित समझा,स्वप्नके समान उपमा देकर सबको मिथ्या जान सबका संग छोड़कर भगवान्में मन लगाकर अपने शरीरको भी छोड़ दिया ॥ २७ ॥ हे राजन् ! अब यह बतलाते हैं कि देवयानीने

स तत्र निर्मुक्तसमस्तसङ्ग आत्मानुभूत्याविधुतत्रिलिङ्गः ॥ परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥२५॥ श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः ॥ स्त्रीपुंसोः स्नेहवैक्लव्यात् परिहासमिवेरितम् ॥ २६ ॥ सा सन्निवासं सुहृदां प्रपायामिव गच्छताम् ॥ विज्ञायेश्वरतन्त्राणां मायाविरचितं प्रभोः ॥२७॥ सर्वत्र सङ्गमुत्सृज्य स्वप्नौपम्येन भार्गवी ॥ कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः ॥२८॥ नमस्तुभ्यं भगवते वासुदेवाय वेधसे ॥ सर्वभूताधिवासाय शान्ताय बृहते नमः ॥२९॥ इति श्रीभागवते महापुराणे नवम० ययातिविरक्तिवर्णनं नाम एकोनविंशोऽध्यायः ॥१९॥ श्रीशुक उवाच ॥ पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत ॥ यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥१॥ जन्मेजयो ह्यभूत् पूरोः प्रचिन्वांस्तत्सुतस्ततः ॥ प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥ २ ॥

किस प्रकारसे भगवान् वासुदेवमें अपना मन लगाया था, वह तुम सुनो । भगवन् ! आप विधाता, वासुदेव, सर्वभूतोंके निवासस्थान, परमशान्त और अतिबृहत् हो, इसलिये मैं आपको नमस्कार करती हूँ । इस तरह परब्रह्म परमात्माको पुकारती हुई मुक्त हो गयी ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे भाषाटीकायांययात्युपाख्याने एकोनविंशोऽध्यायः ॥ १९ ॥ दोहा—ययातिसुत पुरु वंशमें, भये नृपति दुष्यन्त । भरत पुत्र तिनके भये, भक्त शिरोमणि संत ॥ श्रीशुकदेवजी बोले कि हे भरत ! अब पूरुके वंशका वर्णन करते हैं, वह तुम सुनो । इसी वंशमें तुमने जन्म लिया है । अनेक राजर्षि इस पूरुवंशमें उत्पन्न हुए हैं ॥ १ ॥ पूरुसे जन्मेजय उत्पन्न हुए । जन्मेजय

भा॰ न॰ का पुत्र प्राचिन्वान् और उससे प्रवीणने जन्म ग्रहण किया, उसके पुत्र नमस्यु और उससे चारुपदका जन्म हुआ, चारुपदके यहां
॥५८॥ सुद्युने जन्म ग्रहण किया, उससे बहुगव उत्पन्न हुआ, उसका पुत्र संयाति, संयातिका पुत्र अहंयाति और अहंयातिके रौद्राश्व जन्मा ॥२॥३॥ इस रौद्राश्वने घृताची अप्सरासे दश पुत्र उत्पन्न किये उनके नाम यह हैं,-ऋतेयु, कुक्षेयु, स्थंडिलेयु, कृतेयु, जलेयु, संततेयु, धर्म्मेयु, सत्येयु, व्रतेयु और सबसे छोटा वनेयु हुआ। हे राजन् ! जिस प्रकार इंद्रियगण जगत्के आत्मभूत मुख्य प्राणके वश रहते हैं, वैसे ही यह दश पुत्र रौद्राश्वके वशमें रहते थे ॥ ४ ॥ ५ ॥ उन रौद्राश्वके दश पुत्रोंमेंसे ऋतेयुके रंतिभार नामक एक पुत्र हुआ। उसके तीन पुत्र हुए, यथा-सुमति, ध्रुव और अप्रतिरथ। इन तीनोंमेंसे अप्रतिरथका पुत्र कण्व हुए ॥ ६ ॥ कण्वके मेधातिथि और उससे

तस्य सुद्युरभूत् पुत्रस्तस्माद् बहुगवस्ततः ॥ संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥ ३ ॥ ऋतेयुस्तस्य कुक्षेयुः स्थण्डिलेयुः कृतेयुकः ॥ जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥ दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ॥ घृताच्यामिन्द्रियाणीव मुख्यस्य जगदात्मनः ॥ ५ ॥ ऋतेयो रन्तिभारोऽभूत त्रयस्तस्यात्मजा नृप ॥ सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥ ६ ॥ तस्यमेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः ॥ पुत्रोऽभूत्सुमते रैभ्यो दुष्यन्तस्तत्सुतो मतः ॥ ७ ॥ दुष्यन्तो मृगयां यातः कण्वाश्रमपदं गतः ॥ तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥ विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ॥ ८ ॥ बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥ तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः ॥ ९ ॥

प्रस्कण्वादि द्विजातिगण उत्पन्न हुए। हे राजन् रंतिभार नामका बड़ा बेटा सुमति उसका पुत्र रैभ्य और इस रैभ्यके ही पुत्र राजा दुष्यन्त
भा॰ टी॰ हुए ॥ ७ ॥ एक समय यह राजा दुष्यन्त आखेट करते-करते वनमें प्रवेशकर महर्षि कण्वके आश्रममें पहुँचे, वहांपर एक स्त्री बैठी लक्ष्मीके
अ॰ २० समान अपने शरीरकी प्रभासे आश्रमको शोभायमान कर रही थी। देवमायाके समान उस तरुणीको देखते ही राजा दुष्यंत मोहित हो गया॥८॥इसके उपरांत कुछ सेनाके सिपाही लेकर निकट जाकर उस वरारोहाके साथ राजाने सम्भाषण किया।हे राजा परीक्षित ! उस सुन्दरीको देखते ही राजा दुष्यन्तको अनिर्वचनीय आनन्द प्राप्त हुआ था और मानो उसको देखकर जङ्गलमें घूमनेसे जो थकावट हुई थी

वह सब जाती रही ॥ ९ ॥ कामपीड़ित हो हँसते-हँसते मधुर वचनसे राजाने पूछा कि हे कमलपत्राक्षि ! तुम कौन हो ? किसकी कन्या हो ? ॥ १० ॥ और इस निर्जन वनमें क्या करनेकी वासना किये हुये हो ! हे सुमध्यमे ! पूरुवंशीय लोगोंका चित्त कभी अधर्ममें नहीं लगता है इसलिये स्पष्ट जान पड़ता है कि तुम किसी क्षत्रियवंशकी बेटी हो ॥११॥ यह सुनकर शकुन्तलाने उत्तर दिया कि हे राजन्! मैं विश्वामित्रकी पुत्री हूँ,मेनका नामक अपसरा मेरी माता है स्वर्गमें जानेके समय माता मुझको इस निर्जन वनमें अकेली छोड़कर चली गयी, इसलिये वास्तवमें क्षत्रियकी कन्या हूँ;इस बातको भगवान् कण्व ऋषि भलीभांति जानते हैं। हे वीर! हम आपका कौनसा कार्य करें ?

पप्रच्छ कामसंतप्तः प्रहसन् श्लक्ष्णया गिरा ॥ का त्वं कमलपत्राक्षि कस्यासि हृदयंगमे ॥ १० ॥ किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥ व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ॥ नहि चेतः पौरवाणामधर्मे रमते क्वचित् ॥११॥ शकुन्तलोवाच ॥ विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ॥ वेदैतद् भगवान् कण्वो वीर किं करवाम ते ॥१२॥ आस्यतां ह्यरविन्दाक्ष गृह्यतामर्हणं च नः ॥ भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते॥१३॥दुष्यन्य उवाच ॥ उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये ॥ स्वयं हि वृणुते राज्ञां कन्यकास्सदृशं वरम् ॥ १४ ॥ ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम् ॥ गान्धर्वविधिना राजा देशकालविभागवित् ॥ १५ ॥ अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे ॥ श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥ १६ ॥

आज्ञा कीजिये ॥ १२ ॥ हे महाराज ! आसन ग्रहण कीजिये और हमारी पूजा भी आप अंगीकार करें, यहां नीवारोंके चावल हैं, भोजन कीजिये और यदि रुचि हो तो रात्रिको यहां ही रहिये ॥ १३ ॥ राजा दुष्यन्त बोले कि हे सुन्दरी ! तुमने कुशिकके वंशमें जन्म लिया है वास्तवमें तुम्हारा आचरण ठीक है; क्योंकि राजकन्यायें समान वरको स्वयं वरण कर लेती हैं ॥१४॥ शकुन्तलाने राजाकी बात सुनकर कहा कि 'हां' तब देशकालके जाननेवाले इस राजाने शकुन्तलासे गन्धर्व विवाह किया॥१५॥ हे भारत!अमोघवीर्यवान् राजा दुष्यन्त भार्या शकुन्तलामें वीर्याधान करके दूसरे दिन अपने नगरको चले गये।तब यथायोग्य समयमें शकुन्तलाके एक कुमार उत्पन्न हुआ ॥ १६ ॥

महर्षि कण्वऋषीश्वरने वनमें ही यथायोग्य उस बालककी संस्कारादि क्रिया करा दी। हे राजन्! यह कुमार बालकपनसे ही अपने बलसे सिंह पकड़ करके उनके साथ खेला करता था ॥ १७ ॥ इसलिये महाविक्रमशाली देखकर प्रमदोत्तमा शकुंतला भगवान् हरिके अंशसे उत्पन्न उस पुत्रको ले अपने स्वामीके निकट गयी॥१८॥परन्तु राजा दुष्यन्तने अनिन्दित स्त्री और पुत्रको ग्रहण नहीं किया परन्तु जिस समय राजा दुष्यन्तने शकुंतलाका निरादर किया, तब श्रवणकारी सब प्राणियोंके सम्मुख आकाशसे अशरीरिणी वाणी प्रकट हो राजाको पुकारकर बोली कि॥१९॥ हे राजा दुष्यन्त! माता भस्त्रा अर्थात् चर्मपात्रवत् आधारमात्र पिताका ही पुत्र है, क्योंकि आत्मा ही

कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः ॥ बद्ध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः ॥१७॥ तं दुरत्ययविक्रान्तमादाय प्रमोदोत्तमा ॥ हरेरंशांशसंभूतं भर्तुरन्तिकमागमत् ॥१८॥ यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ ॥ शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥१९॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥ भरस्व पुत्रं दुष्यन्त माऽवमंस्थाः शकुन्तलाम् ॥२०॥ रेतोधाः पुत्रा नयति नरदेव यमक्षयात् ॥ त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ २१ ॥ पितर्युपरते सोऽपि चक्रवर्ती महायशाः ॥ महिमा गीयते तस्य हरेरंशभुवो भुवि ॥ २२ ॥ चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ॥ ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड् विभुः ॥ २३ ॥

पुत्ररूपसे उत्पन्न होता है, इसलिये अपने पुत्रको ग्रहण करके पालो और शकुंतलाका अपमान न करो * ॥ २० ॥ हे नरदेव! जो पुरुष वीर्य डालता है, पुत्र उसका ही यमालयसे निस्तार करता है और शकुन्तला यह सत्य कहती है, तुमने ही इस पुत्रको गर्भमें धारण किया था ॥ २१ ॥ हे भारत! आकाश वाणीको सुनते ही राजा दुष्यन्तने पुत्रसहित शकुन्तलाको अंगीकार किया। कुछ कालके पीछे महाराज दुष्यन्तके स्वर्गवासी होनेपर राजाके महायशस्वी पुत्र यही भरतजी सिंहासनपर बैठकर चक्रवर्ती राजा हुए थे। महाराज भरत श्रीभगवान् हरिके अंशसे उत्पन्न हुए थे, इसलिये उनकी महिमा समस्त भूमण्डलमें गायी जाती है ॥ २२ ॥ उनके दाहिने हाथमें चक्र

* शंका—थोड़े ही दिनोंमें राजा दुष्यन्तने अपने चरित्रको भूलकर शकुन्तला और अपने पुत्रको क्यों नही ग्रहण किया?

उत्तर—राजा दुष्यन्त बड़ा बुद्धिमान था और यह भली प्रकार जानता था कि यह हमारा ही पुत्र है और शकुन्तला हमारी स्त्री है परंतु लोकापवादसे डरकर उसको ग्रहण नहीं करता था, आकाश वाणीसे सबको विदित हो गया तो राजाने ग्रहण किया।

और दोनों चरणोंमें पद्मकोशका चिह्न विराजमान था । उन्होंने महाभिषेक कराकर राजाधिराज हो गंगाजीके किनारेपर पचपन (५५) अश्वमेध यज्ञ करके भगवान् वासुदेवजीकी पूजा की थी ये राजा भरत ममताके पुत्र मामतेय ऋषिको अपना पुरोहित बनाकर यमुनाके तटपर अश्वमेध यज्ञके अठहत्तर (७८) पवित्र अश्व (घोड़े) यथाक्रमसे बांधे । इन यज्ञोंके समय राजर्षि भरतजीने बहुतसा धन ब्राह्मणोंको दक्षिणामें दिया था ॥ २३ ॥ २४ ॥ हे राजन् ! श्रेष्ठ गुणवाले देशमें महाराज भरतजीकी अग्नि प्रणीत थी । उस अग्निप्रचयन कालमें ब्राह्मणलोग उन महाराज भरतजीकी दी हुई गायोंको एक-एक बद्धमें भाग करके ले गये थे । (एक बद्ध तेरह सहस्र चौरासी (१३०८४) का होता है ॥ २५ ॥ और महाराज भरतजीने एकबारमें ही एक सौ तैंतीस १३३ यज्ञीय घोड़े बांध राजा लोगोंके विभवको भी विस्मित

पञ्च पञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः ॥ मामतेयं पुरोधाय यमुनायामनु प्रभुः अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद्वसु ॥ २४ ॥ भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः ॥ सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे ॥२५॥ त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान् ॥ दौष्यन्तिरत्यगान्मायां देवानां गुरुमाययौ ॥२६॥ मृगाञ्छुक्लदतः कृष्णान् हिरण्येन परीवृतान् ॥ अदात् कर्मणि मष्णारे नियुतानि चतुर्दश ॥ २७ ॥ भरतस्य महत् कर्म न पूर्वे नापरे नृपाः ॥ नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ॥ २८ ॥ किरातहूणान्यवनानन्ध्रान् कङ्कान् खशाञ्छकान् ॥ अब्रह्मण्यान् नृपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान् ॥ २९ ॥ जित्वा पुराऽसुरा देवान् ये रसौकांसि भेजिरे ॥ देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ॥ ३० ॥

कर देवतालोगोंका आक्रमण किया था । उनका ऐसा कर्म करना कुछ आश्चर्यकी बात नहीं है, क्योंकि वे भगवान् हरिको प्राप्त हुए थे ॥ २६ ॥ इन महाराज भरतने मष्णारनामक कर्ममें श्वेतदन्त और कृष्ण रंगके चौदह लाख १४००००० हाथी सुवर्णसे सजे हुए दान किये ॥ २७ ॥ महाराज भरतजीने जो कर्म किये, उन कर्मोंको पहले हुए नृपतिगण भी प्राप्त नहीं कर सके और आगे जो राजा होंगे वह भी प्राप्त नहीं कर सकेंगे जैसे भुजाओंके बलसे स्वर्ग प्राप्त नहीं हो सकता ॥ २८ ॥ इन महाराज भरतजीने दिग्विजय करनेको जाकर किरात, हूण, यवन, पौंड, कंक, खग, शक,और दूसरे अब्रह्मण्य राजाओंके और सब म्लेच्छजातिका संहार कर डाला॥२९॥ पूर्व समयमें जिन दान-

वोंने देवता लोगोंको जीतकर जिन रसातलादि स्थानोंमें वास किया था और बली दानव लोग देवता लोगोंकी स्त्रियोंको भी पातालमें ले गये थे । महात्मा भरतजीने उन सब देवांगनाओंका उद्धार किया था ॥३०॥ हे महाराज ! महाराज भरतजीके समयमें स्वर्ग और पृथ्वीसे प्रजालोगोंकी सब अभिलाषा पूरी होती थी। इस राजा भरतने सत्ताईस हजार वर्षतक राज्य करके सब दिशाओंमें अपनी सेना भेजी थी ॥ ३१ ॥ इस प्रकार राज्यभोग करके पीछे महाराज भरतजीने लोकपालोंका विभव, अधिराज्यकी सम्पत्ति, अस्खलित सेना और आत्मप्राणादि मिथ्या विचार कर विषयसे मुँह मोड़ लिया ॥ ३२ ॥ इन भरतजीके विदर्भदेशके राजाकी बेटी सुसम्मत तीन स्त्रियाँ थीं । एक समय राजाने कहा कि " यह पुत्र हमारे अनुसार नहीं है " इसलिये यह तीनों ऐसी शंका करने लगीं कि वारंवार अनुहारका विचार

सर्वकामान् दुदुहतुः प्रजानां तस्य रोदसी ॥ समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत् ॥ ३१ ॥ सम्राट् लोकपालाख्यमैश्वर्यमधिराट्श्रियम् ॥ चक्रं चास्खलितं प्राणान् मृषेत्युपरराम ह ॥३२॥ तस्यासन् नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसमंताः॥ जघ्नुस्त्यागभयात् पुत्रान् नानुरूपा इतीरिते ॥ ३३ ॥ तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ॥ मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ॥३४॥ अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः॥ प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥३५॥

कर कहीं यह राजा हमपर व्यभिचारकी शंका न कर बैठे और हमको त्याग दे, इसलिये अपनी-अपनी सन्तानको मार डाला ॥ ३३ ॥ इस प्रकार वंशके व्यर्थ होनेसे महाराज भरतजीने पुत्रार्थ वायु और सोमका यज्ञ किया। उस यज्ञके मरुद्गणोंने प्रसन्न हो राजाके हाथमें भरद्वाजनामक एक पुत्र समर्पण किया ॥ ३४ ॥ हे परीक्षित् ! भरद्वाजके जन्मका वृत्तान्त और समर्प्पणकी कथा कहते हैं । अपने भ्राता उतथ्यकी स्त्री ममतासे एक दिन छिपकर बृहस्पतिजीने भोग करना चाहा था । परंतु उस समय गर्भके बीच एक और बालक था, फिर उस समय गर्भके मध्य दूसरे गर्भका स्थान कैसे हो ? इसलिये गर्भके बालकने बृहस्पतिजीको वीर्य डालनेके अर्थ निवारण किया परंतु बृहस्पतिजी कामान्ध हो रहे थे । उन्होंने क्रोधित होकर बालकको यह शाप दिया कि "तू अंधा हो जा" और अपना वीर्य ममताके पेटमें डाला

दिया॥३५॥बृहस्पतिजीके शापसे उतथ्यतनय दीर्घतमा हुए थे, परंतु उन्होंने अपनी एड़ी प्रहारसे बृहस्पतिजीके वीर्यको योनिके बाहर निकाल दिया, परंतु उस भूमिपर गिरे हुए वीर्यसे उसी समय कुमार उत्पन्न हुआ। पीछे हमको व्यभिचारिणी जान कर छोड़ न दें इस भयसे भीत होकर जब उतथ्यकी स्त्री ममताने उस कुमारको त्याग करनेकी इच्छा की, तब उस समय देवता लोगोंने बृहस्पति और ममताके विवाद रूप इस कुमारका नाम धरनेके लिये यह वचन कहे ॥ ३६ ॥ पुत्रको त्याग करके जाते हुए देख देवताओंने ममतासे कहा अरी मूढ स्त्री ! यह बालक एकके क्षेत्रमें दूसरेके वीर्यसे होनेके कारण इसका दो जनोंसे जन्म हुआ इसलिये यह तुम्हारे स्वामीका भी पुत्र है। स्वामीसे कुछ भयकी शंका नहीं, तुम इस बालकको पालो और बृहस्पतिसे भी कहा कि तुम भी इसका पालन-पोषण करो, क्यों कि तुम दोनों जनोंसे अन्यायके द्वारा यह बालक उत्पन्न हुआ है। पर पिता माता द्वाज अर्थात् बृहस्पति और ममता झगड़ा करते-करते इस बाल-

तं त्यक्तुकामां ममतां भर्तृत्यागविशिङ्किताम् ॥ नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ॥ ३६ ॥ मूढे भरद्वाजमिमं भर द्वाजं बृहस्पते ॥ यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३७ ॥ चोद्यमाना सुरैरेवं मत्वा वितथमात्मजम् ॥ व्यसृजन्मरुतोऽबिभ्रन्दत्तोऽयं वितथेऽन्वये ॥ ३८ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे शकुन्तलोपाख्याने विंशोऽध्यायः ॥ २० ॥ श्रीशुक उवाच ॥ वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः ॥ महावीर्यो नरो गर्गस्संकृतिस्तु नरात्मजः ॥ १ ॥

कको छोड़कर चले गये, इसलिये इसका नाम भरद्वाज हुआ, क्योंकि भर (पोषण) और (दोनोंसे उत्पन्न) इन दोनों शब्दोंके मिलानेमें 'भरद्वाज' नाम हुआ ॥ ३७ ॥ हे राजा परीक्षित् ! देवता लोगोंके इस प्रकार कहते रहनेपर भी व्यभिचारसे उत्पन्न हुए उस बालकको व्यर्थ समझकर उतथ्यकी भार्याने इस बालकको त्याग दिया। तब उस बालकको मरुद्गणोंने लेकर पालन किया था। जब भरतवंशके वितथ होनेका उपक्रम हुआ, तब उस समय मरुद्गणोंने इस पुत्रको लेकर महाराजाधिराज भरतजीको दे दिया ॥३८॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे भाषाटीकायां विंशोऽध्यायः ॥ २० ॥ दोहा—भरतवंश इक्कीसमें, रंतिदेव अजमीढ। तिनके कुलकी कीर्ति सब, वरणों सहित सपीढ ॥श्रीशुकदेवजी बोले—हे महाराज परीक्षित्! वंशके वितथ होने पर भरतजीको मरुद्गणोंने यह बालक दिया, इसलिये इन

भरद्वाजका नाम वितथ हुआ । इन वितथका पुत्र मन्यु, उनसे बृहत्क्षत्र, जय, महावीर्य, नर और गर्ग ये पांच पुत्र उत्पन्न हुए उनमें नरका पुत्र संकृति हुआ ॥१॥ उसका पुत्र गुरु और रंतिदेव हुआ ! हे राजन् ! रंतिदेवकी महिमा इस लोक और परलोक दोनोंमें गायी जाती है ॥ २ ॥ इस राजाका चित्त निरंतर व्ययमें नियुक्त था । वह आप भूखे रहकर भी जो कुछ मिलता था उसे तत्काल दान कर देता था । वह धीर नरपति सब कुछ दान करके निष्किञ्चन हो सपरिवार क्षुधाके मारे अत्यन्त व्याकुल हो गया ॥ ३ ॥ और विना जलपान किये राजाको अड़तालीस दिन व्यतीत हो गये । सब परिवार विना आहारके कष्ट पा रहा था और आप भी भूख-प्यासके मारे कम्पायमान हो रहे थे । उसी समय घृत, खीर और हलुआ भोजन करनेके लिये राजाको प्राप्त हुए ॥ ४ ॥ उसको पाकर राजा प्रातःकाल

गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन ॥ रन्तिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ॥ निष्किंचनस्य धीरस्य सकुटुम्बस्य सीदतः ॥ ३ ॥ व्यतीयुरष्टचत्वारिंशदहान्यपि बतः किल ॥ घृतपायसंसयावं तोयं प्रातरुपस्थितम् ॥ ४ ॥ कृच्छ्रप्राप्तकुटुम्बस्य क्षुत्तृड्भ्यां जातवेपथोः ॥ अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागतम् ॥ ५ ॥ तस्मै संव्यभजत् सोऽन्नमादृत्य श्रद्धयाऽन्वितः ॥ हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ॥६॥ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते ॥ विभक्तं व्यभजत् तस्मै वृषलाय हरिं स्मरन् ॥७॥ याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः ॥ राजन् मे दीयतामन्नं सगणाय बुभुक्षते ॥ ८ ॥

भोजन करनेको चले ही थे कि उसी समय कोई ब्राह्मण अतिथि आ गया ॥५॥ तो राजाने श्रद्धापूर्वक सर्वदेवमय भगवान् हरिको देखते हुए आदरपूर्वक उस ब्राह्मणको भी उस सब अन्नमेंसे विभाग करके दिया और वह ब्राह्मण भोजन करके चला गया ॥ ६ ॥ इसके पीछे उस बचे हुए अन्नादिको अपने सब परिवारको बांट चूंट आप स्वयं भोजन करने जा रहे थे कि उस अवसरपर एक और कोई शूद्र अपनेको अतिथि बताकर आया तो इन रंतिदेवने भगवान् हरिका स्मरण करके उस बचे हुए अन्नमेंसे उस शूद्रको भी भाग दिया ॥ ७ ॥ एक शूद्र अतिथि आकर बिदा हो चला गया कि इतनेमें ही और एक जन बहुत सारे कुत्तोंको साथ लिये अतिथि बनकर वहां आया और आकर

बोला—"मैं इन सब कुत्तोंके साथ बहुत ही भूंखा हूँ" अतः इस यूथके सहित मुझको तुम आहार दो ॥ ८॥ राजाने उसका बहुत ही आदर किया और सम्मान करके वह बचा हुआ अन्न कुत्तोंके यूथको और उनके स्वामीको खानेके लिये देकर उनको नमस्कार किया ॥ ९ ॥ उसके पीछे सब कुछ देकर एक जनकी तृप्तिके योग्य जो जल वहां बचा था, उसके ही पीनेका राजाने उद्योग किया कि इतनेमें ही एक पुल्कस (चाण्डाल) आया और करुणासहित यह वचन बोला कि हे महाराज ! मैं बहुत थक गया हूँ, मुझ अशुभ पुरुषको कुछ जल दीजिये ॥ १० ॥ इस चाण्डालके ऐसे करुणायुक्त वचन सुनकर राजा रंतिदेवको अत्यन्त दया आई और दुःखित हो यह अमृतमय वचन बोले कि ॥ ११ ॥ हम परमेश्वरसे अणिमादि अष्ट सिद्धि युक्त गति अथवा मुक्तिकी भी कामना नहीं करते। हमारी प्रार्थना है कि हम

स आदृत्यावशिष्टं यद् बहुमानपुरस्कृतम् ॥ तच्च दत्त्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥ ९ ॥ पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम् ॥ पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे ॥ १० ॥ तस्य तां करुणां वाचं निशम्य विपुलश्रमाम् ॥ कृपया भृशसंतप्त इदमाहामृतं वचः ॥ ११ ॥ न कामयेऽहं गतिमीश्वरात् परामष्टर्द्धियुक्तामपुनर्भवं वा ॥ आर्तिं प्रपद्येऽखिलदेहभाजामन्तः स्थितो येन भवन्त्यदुःखाः ॥ १२ ॥ क्षुत्तृट्च्छ्रमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविशादमोहाः ॥ सर्वे निवृत्ताः कृपणस्य जन्तोर्जिजीविषोर्जीवजलार्पणान्मे ॥ १३ ॥ एवं प्रभाष्य पानीयं म्रियमाणः पिपासया ॥ पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः ॥१४॥ तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् ॥ आत्मानं दर्शयांचक्रुर्माया विष्णुविनिर्मिताः ॥ १५ ॥

सम्पूर्ण देहधारियोंके दुःखको भोक्तारूपसे भीतर स्थिर होकर प्राप्त हों और हमसे सब प्राणियोंका दुख दूर हो जाये ॥ १२ ॥ यह दीन जन-जीवन धारण करनेकी वासना करता है, इसके जीवनके लिये जल अर्पण करते ही हमारी क्षुधा, तृष्णा, थकावट, अंगोंका घूमना, कातरता, क्रांति, खेद, विषाद,मोह सब ही निवृत्त हो गये ॥१३॥ इस प्रकार कहकर स्वभावसे ही दयालु महाराज रंतिदेवने स्वयं प्यासके मारे म्रियमाण होनेपर भी उस चाण्डालको अपने पीनेका जल दे दिया ॥ १४ ॥ हे राजन् ! त्रिभुवनाधीश जो ब्रह्मादि देवता फलाकांक्षी पुरुषोंको फलदान किया करते हैं यह सब महाराज रंतिदेवके धैर्य और धर्मकी परीक्षा करनेके लिये विष्णुकी बनायी हुई मायासे अपने-

अपने स्वरूपको दिखाते हैं ॥१५॥ परन्तु महाराज रंतिदेवने इन सब देवताओंको नमस्कार किया और निःसंग व स्पृहारहित होकर केवल भगवान् वासुदेवको अर्पण कर दिया इसलिये उन्होंने ब्रह्मादि देवताओंसे कुछ भी नहीं चाहा ॥१६॥ हे राजन् ! रंतिदेवके ईश्वरातिरिक्त और किसी फलकी इच्छा न करनेपर अपने चित्तको ईश्वरावलम्बित करनेसे उनके निकट गुणमयी माया स्वप्नके समान आत्मामें ही विलीन हुई थी ॥१७॥ उसके अनुगामी जनगण इस राजा रंतिदेवके संसर्ग प्रभावसे सब ही नारायणपरायण योगी हुये थे ॥ १८ ॥ हे कुरुश्रेष्ठ ! मन्युके पुत्र नरका वंश कहा गया, अब गर्गके वंशका वृत्तांत कहते हैं,वह तुम सुनो। गर्गसे शिनि उत्पन्न हुए, शिनिसे गार्ग्य; ये

स वै तेभ्यो नमस्कृत्य निस्सङ्गो विगतस्पृहः ॥ वासुदेवे भगवति भक्त्या चक्रे मनः परम् ॥१६॥ ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः ॥ माया गुणमयी राजन् स्वप्नवत् प्रत्यलीयत ॥ १७ ॥ तत्प्रसंगानुभावेन रन्तिदेवानुवर्तिनः ॥ अभवन् योगिनः सर्वे नारायणपरायणाः॥१८॥ गर्गाच्छिनिस्ततो गार्ग्यःक्षत्राद् ब्रह्म ह्यवर्तत ॥ दुरितक्षयो महावीर्यात् तस्य त्रय्यारुणिः कविः ॥ १९ ॥ पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ॥ बृहत्क्षत्रस्य पुत्रोऽभूद्धस्तीयद्धस्तिनापुरम् ॥ २० ॥ अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ॥ अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥२१॥ अजमीढाद् बृहदिषुस्तस्य पुत्रो बृहद्धनुः ॥ बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥ २२ ॥

ब्रह्मकुलके प्रवर्तक हुए अब महावीर्यके वंशका विवरण सुनो, महावीर्यसे दुरतिक्षय उत्पन्न हुआ। उसके पुत्र त्रय्यारुणि, कवि और पुष्करारुणि ये तीनों जन क्षत्रियवंशमें उत्पन्न होकर ब्राह्मणत्वको प्राप्त हुए थे। अब मन्युके पांच पुत्रोंमेंसे सबसे बड़ेका वंश सुनो। बृहत्क्षत्रका पुत्र हस्ती × हुआ, जिसने हस्तिनापुर बसाया ॥ १९ ॥ २० ॥ इस हस्तीके अजमीढ, ❋ द्विमीढ और पुरुमीढ यह तीन पुत्र उत्पन्न हुए। इनमें अजमीढके वंशसे प्रियमेधादि ब्राह्मणगण उत्पन्न हुए ॥ २१ ॥ और इस अज मीढसे बृहदिषु नाम और एक पुत्र जन्मा, उसका पुत्र बृहद्धनु

× इसी राजा हस्तीने "हस्तिनापुर" बसाया था जो अब तक गंगा भागीरथीके किनारेपर उपस्थित है।

❋ इसी अजमीढ़ने 'अजमेड़' नामक नगर बसाया था जो आजकल पुष्करजीके निकट 'अजमेर' नामसे विख्यात है।

हुआ । बृहद्धनुकी सन्तान बृहत्काय,इसका पुत्र जयद्रथ हुआ ॥ २२ ॥ जयद्रथका पुत्र विशद, उसका पुत्र सेनजित्, सेनजित्के पुत्र रुचिराश्व, दृढ़हनु, काश्य और वत्स ये चार पुत्र हुए ॥२३॥ उनमें रुचिराश्वके पार नामक पुत्र हुआ । उसका युत्र पृथुसेन हुआ । हे राजन् ! पारका दूसरा पुत्र नीप और नीपके सौ (१००) पुत्र हुए ॥ २४ ॥ और इसी नीपने शुककी कन्या + कृत्वीके गर्भसे ब्रह्मदत्तको उत्पन्न किया । योगी ब्रह्मदत्तने अपनी भार्या सरस्वतीके गर्भसे विष्वक्सेन नामक एक पुत्र उत्पन्न किया ॥ २५ ॥ जिसने जेगीषव्यके उप-

तत्सुतो विशदस्तस्य सेनजित् समजायत ॥ रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः ॥२३॥ रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः ॥ पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ॥ २४ ॥ स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥ स योगी गवि भार्यायां विष्वक्सेनमधात् सुतम् ॥२५॥ जैगीषव्योपदेशेन योगतन्त्रं चकार ह ॥ उदक्स्वनस्ततस्तस्माद् भल्लादो बार्हदीषवाः ॥ २६ ॥ यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ॥ नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् ॥२७॥ सुपार्श्वात् सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः ॥ कृति हिरण्यनाभाद् यो योगं प्राप्य जगौ स्म षट् ॥२८॥

देशसे योगशास्त्र प्रणयन किया था । इस विष्वक्सेनसे उदक्सेनने जन्म लिया, जिसके भल्लाद नाम पुत्र उत्पन्न हुआ । हे कुरुश्रेष्ठ राजा परीक्षित् ! ये सब महीपाल बृहदिषुके वंशमें उत्पन्न हुये थे ॥२६॥ द्विमीढका पुत्र यवीनर, यवीनरका पुत्र कृतमान, उसके यहाँ सत्यधृति नामक पुत्र जन्मा । सत्यधृतिका पुत्र दृढनेमि और दृढनेमिका पुत्र सुपार्श्व हुआ ॥ २७ ॥ सुपार्श्वसे सुमतिने जन्म लिया, उसका पुत्र सन्नति, उसका पुत्र कृति, जिसने हिरण्यनाभसे योगविद्या सीखकर प्राच्य सामकी छः संहिताओंका विभाग करके उनको पढ़ाया ॥ इस

+ शंका—राजा नीपने क्षत्रिय होकर ब्राह्मण शुकदेवजी की कन्याके साथ अपना विवाह क्यों किया ? क्षत्रियकी पुत्रीको तो ब्राह्मण सदैव विवाहते रहे, परन्तु ब्राह्मणकी कन्याके साथ क्षत्रियका विवाह हमने आज ही सुना है, कभी देवयानीकी बात तो शापसे हो गयी, परन्तु यह कैसे हुआ ?

उत्तर—तीन लोकमे शुकदेवजीकी कन्या सब ब्रह्मज्ञानियोंमें परम ब्रह्मज्ञानी थी और ब्रह्मज्ञानी हीं पुरुषको अपना पति करना चाहती थी और किसी दूसरे पुरुषको नहीं चाहती थी और राजा नीप बड़ा ब्रह्मज्ञानी था, ऐसा विचारके अपनी इच्छासे राजा नीपको उसने अपना पति बनाया, कुछ संसारकी रीतिसे यह विवाह नहीं हुआ था ।

कृतिके नीप हुआ और नीपसे उग्रायुधकी उत्पत्ति हुई । उग्रायुधके क्षेमा, उसका पुत्र सुवीर, सुवीरका पुत्र रिपुञ्जय, ॥ २८ ॥२९॥ उसका पुत्र बहुरथ हुआ । हे राजन् ! हस्तीका पुत्र पुरुमीढ निःसन्तान रहा अजमीढकी नलिनी नाम जो भार्या थी उससे नीलनाम एक पुत्र उत्पन्न हुआ और नीलका पुत्र शान्ति जन्मा ॥ ३० ॥ शान्तिका बेटा सुशान्ति, सुशान्तिका पुत्र उरुज और उससे अर्कने जन्म ग्रहण किया,अर्कका पुत्र भर्म्याश्व और उसके मुद्गलादि पांच पुत्र उत्पन्न हुए ॥ ३१ ॥ अर्थात् मुद्गल, यवीनर, बृहदश्व, काम्पिल्य और संजय

संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः ॥ तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुञ्जयः ॥ २९ ॥ ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् ॥ नलिन्यामजमीढस्य नीलः शान्तिस्सुतस्ततः ॥ ३० ॥ शान्तेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् ॥ भर्म्याश्वस्तनयस्तस्य पञ्चासन्मुद्गलादयः ॥ ३१ ॥ यवीनरो बृहदिषुः काम्पिल्यः सञ्जयः सुताः ॥ भर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि ॥ ३२ ॥ विषयाणामलमिमे इति पञ्चालसंज्ञिताः ॥ मुद्गलाद् ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ॥ ३३ ॥ मिथुनं मुद्गलाद् भार्म्याद्दिवोदासः पुमानभूत् ॥ अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात ॥ ३४ ॥ तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ॥ शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ॥ ३५ ॥

ये पाँच पुत्र जन्मे । भर्म्याश्वने इन पुत्रोंको देखकर एक समय कहा था कि हमारे ये पाँच पुत्र पाँच विषयके रक्षा करनेमें समर्थ हैं ये पाञ्चाल देशका पालन कर सकते हैं । इसी कारण इन पुत्रोंकी पाञ्चाल संज्ञा हुई और पाञ्चाल देश इनके ही नामसे प्रसिद्ध हुआ और मुद्गलसे मौद्गल्य गोत्री ब्रह्मकुल हुआ ॥ ३२ ॥ ३३ ॥ भर्म्याश्वके पुत्र मुद्गलसे शुभनर-मिथुनने जन्म लिया । इनमें दिवोदास नर और अहल्या नाम नारी हुई थी । उसी समय अहल्यामें गौतमजीसे शतानन्दकी उत्पत्ति हुई॥३४॥शतानन्दका पुत्र सत्यधृति हुआ, यह धनुर्वेदको

भलीभांतिसे जानता था, उसका पुत्र शरद्वान हुआ, जिसका वीर्य उर्वशीके दर्शनसे शरकण्डेके समूहमें गिरा था। और फिर इसीं वीर्यसे एक शुभ जोड़ा उत्पन्न हुआजब शन्तनु राजा मृगया करनेको गया तब उसने दैवात् इस जोड़ेको देखा और दयाके वश हो अपने घरपर ले आया, उस नर-मिथुनमेंसे बालकका नाम कृप और बालिकाका नाम कृपी हुआ जो कि द्रोणाचार्य की स्त्री हुई॥३५॥ ३६॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे भाषाटीकायां सोमवंशानुवर्णने एकविंशोऽध्यायः ॥२१॥ दोहा–दिवोदासको वंश कह्, ऋक्षवंश बाईस। जरासन्ध औ धर्मसुत, दुर्योधन धनईस ॥ श्रीशुकदेवजी राजा परीक्षित्से बोले कि हे नृपश्रेष्ठ! दिवोदासका पुत्र मित्रायु, उसका पुत्र च्यवन,च्यवनका पुत्र सुदास, सुदासका पुत्र सहदेव और उसकी सन्तान सोमक हुआ। इस सोमकके सौ १०० पुत्र थे, उनमें जन्तु

शरस्तम्बेऽपतद्रेतो मिथुनं तदभूच्छुभम् ॥ तद् दृष्ट्वा कृपयाऽगृह्णाच्छन्तनुर्मृगयां चरन् ॥ कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ॥ ३६ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे भरतरन्तिदेवाजमीढादिचरितं नामैकविंशोऽध्यायः ॥ २१ ॥ श्रीशुक उवाच ॥ मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप ॥ सुदासः सहदेवोऽथ सोमको जन्तुजन्मकृत् ॥ १ ॥ तस्य पुत्रशतं तेषां यवीयान् पृषतः सुतः ॥ द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥२॥ धृष्टद्युम्नाद् धृष्टकेतुर्भार्म्याः पाञ्चालका इमे ॥ योऽजमीढसुतो ह्यन्य ऋक्ष संवरणस्ततः ॥ ३ ॥ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्वः कुरोस्सुताः ॥ ४ ॥ सुहोत्रोऽभूत् सुधनुषश्च्यवनोऽथ ततः कृती ॥ वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ॥ ५ ॥

बड़ा था॥१॥और पृषत छोटा हुआ। इस पृषतसे सर्व सम्पद् युक्त राजा द्रुपदने जन्म लिया। इन्हीं राजा द्रुपदसे द्रौपदीका जन्म हुआ ॥ २ ॥ और इनके पुत्र धृष्टद्युम्नादि हुए धृष्टद्युम्नका पुत्र धृष्टकेतु हुआ। यह सब भर्म्याश्वके पाञ्चाल वंशमें हुए और पंजाबके राजा थे ॥ ३ ॥ हे राजा परीक्षित्! अब अजमीढके वंशका वृत्तांत कहते हैं, वह आप सुनिये अजमीढका दूसरा पुत्र जो ऋक्ष था, उसका पुत्र संवरण हुआ; इस संवरणसे सूर्यकी कन्या तपतीके गर्भसे कुरुक्षेत्रपति कुरुने जन्म ग्रहण किया, इन कुरुके परीक्षित, सुधनु, जह्नु, और निषधाश्व ये चार पुत्र उत्पन्न हुए ॥ ४ ॥ इनमें सुधनुका पुत्र सुहोत्र, सुहोत्रका पुत्र च्यवन और इनके कृती हुआ, कृतीका पुत्र उपरि-

चर नामकवसु हुआ, उससे बृहद्रथ प्रभृति उत्पन्न हुए ॥ ५ ॥ और पुत्रोंके यह नाम हैं, यथा—कुशाम्ब, मत्स्य, प्रत्यग्र और चेदिप इत्यादि । यह सबही चेदिप अर्थात् चन्देलीके राजा थे ॥ ६ ॥ बृहद्रथ से कुशाग्रका जन्म हुआ उसका पुत्र ऋषभ, उसका सुत सत्यहित, सत्यहितका पुत्र पुण्यवान् और उसका बेटा जह्नु हुआ, हे राजन्! बृहद्रथकी दूसरी भार्यासे एक पुत्र दो खण्ड होकर जन्मा था ॥ ७ ॥ उसकी माताने उस बालकको ऐसा देखकर बाहर फेंकवा दिया । फिर जरा राक्षसीने उसको देख "जीवित हो जीवित हो" यह वाक्य उच्चारणपूर्वक क्रीड़ा करते उन दोनों खण्डोंको जोड़ दिया था उससे ही यह बालक सर्वावयव सम्पन्न हो जरासन्ध नामक हुआ ॥ ८ ॥ इस जरा-

कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ॥ बृहद्रथाद्कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ॥ ६ ॥ जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जह्नुः ॥ अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ॥ ७ ॥ ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥ जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुतः ॥ ८ ॥ ततश्च सहदेवोऽभूत् सोमापिर्यच्छ्रुतश्रवाः ॥ परीक्षिदनपत्योऽभूत् सुरथो नाम जाह्नवः ॥ ९ ॥ ततोविदूरथस्तस्मात् सार्वभौमस्ततोऽभवत् ॥ जयसेनस्तत्तनयो राधिकोऽतोऽयुतो ह्यभूत् ॥ १० ॥ ततश्च क्रोधनस्तस्माद्देवातिथिरमुष्य च ॥ ऋष्यस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ॥ ११ ॥ देवापिश्शन्तनुस्तस्य बाह्लीक इति चात्मजाः ॥ पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥१२॥ अभवच्छन्तनू राजा प्राङ्महाभिषसंज्ञितः ॥ यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥१३ ॥

सन्धका पुत्र सहदेव, उसका पुत्र सोमापि, उससे श्रुतश्रवाकी उत्पत्ति हुई । हे राजन् ! कुरुपुत्र परीक्षितके सन्तान नहीं थी । जह्नुका पुत्र सुरथ ॥ ९ ॥ इससे विदूरथका जन्म हुआ । उसका पुत्र सार्वभौम, उसका पुत्र जयसेन, जयसेनका पुत्र राधिक, राधिकसे आयुतायुने जन्म लिया ॥ १० ॥ आयुतायुके क्रोधन, क्रोधनके देवातिथि, उनके ऋक्ष और ऋक्षसे दिलीपने जन्म ग्रहण किया और दिलीपके प्रदीप नाम पुत्र उत्पन्न हुआ ॥ ११ ॥ इन प्रदीपके देवापि, शन्तनु और बाल्हीक नामक तीन पुत्र हुए । उनमें बड़ा पुत्र देवापि पितृराज्यको छोड़कर वनमें चला गया था ॥ १२ ॥ इसलिये मध्यम पुत्र शन्तनु राजा हुए । पूर्वजन्ममें इनका नाम महाभिष था । यह शन्तनु अपने

हाथसे जिस किसी वृद्ध पुरुषको स्पर्श करते थे वही युवा हो जाता था ॥ १३ ॥ और शांति प्राप्त कर लेता था, इस कर्मके ही करनेसे इनका नाम शन्तनु हुआ इन शन्तनुजीके राजा होनेपर देवराज इन्द्रने बारह वर्षतक पानी नहीं वर्षाया ॥ १४ ॥ तब राजाने उद्विग्न होकर ब्राह्मणोंसे इसका कारण पूछा, ब्राह्मणोंने इस विषयमें केवल इतना ही कहा कि महाराज ! बड़े भाईके रहते हुए जो पुरुष—राज सिंहासन पर बैठता है, वह अपने समान पुरुष होने पर भी परिवेत्ता ही हो जाता है आप परिवेदन दोषसे दूषित हुए हैं। इस दोषको दूर करनेके लिये शीघ्र अपने बड़े भाईको बुलाकर उनको राज्यभार दे दो। तब देवता जल वर्षायेंगे और राष्ट्रोंकी वृद्धि होगी ॥ १५ ॥ ब्राह्मणोंके यह वचन सुनकर राजा शंतनु उसी समय वनको चले गये और "प्रजा पालन करना ही राजाका परमधर्म है, अतः आप राज्यको स्वीकार

शान्तिमाप्नोति चैवाग्र्यां कर्मणा तेन शन्तनुः ॥ समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥ १४ ॥ शन्तनुर्ब्राह्मणै-रुक्तः परिवेत्ता त्वमग्रभुक् ॥ राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥१५॥ एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत् ॥ तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥१६॥ वेदवादातिवादान्वै तदा देवो ववर्ष ह ॥ देवापिर्योगमास्थाय कलापग्राम-माश्रितः ॥ १७॥ सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥ १८ ॥ शलश्च शन्तनोरासीद्गङ्गायां भीष्म आत्मवान् ॥सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥१९॥ वीरयूथाग्रणीर्येन रामो-ऽपि युधि तोषितः ॥ शन्तनोर्दाशकन्यायां जज्ञे चित्रांगदः सुतः ॥ २० ॥

कीजिये" यह कहकर अपने बड़े भ्रातासे राज्य ग्रहण करनेके लिये विनय करने लगे। परन्तु इससे पहले शंतनुके मन्त्री अश्ववारने देवापिको पाखण्ड करके राज्यके अयोग्य करनेके लिये उनके पास कुछेक ब्राह्मणोंको भेज दिया था। ब्राह्मणलोगोंकी पाखण्डमतानुयायी कथाके द्वारा जब देवापि वेदमार्गसे परिभ्रष्ट हुए तब उन्होंने शन्तनुकी प्रार्थना न मानी और वेदशास्त्रकी निंदा करने लगे, तब वेदोंकी निंदा करनेसे नीचता पानेके कारण राज्यके योग्य देवापि न रहे, फिर उसके उपरांत शंतनुके राज्य भोग करनेमें और कोई दोष नहीं रहा। फिर यथाकालमें वर्षा होने लगी। तबसे देवापि योगमार्गका अवलम्बन कर कलाप ग्राममें रहते हैं ॥ १६ ॥ १७ ॥ जब कलियुगमें चन्द्र-वंशका नाश हो जायगा, तब सत्ययुगके पहले वह देवापि फिर चन्द्रवंशको स्थापित करेंगे शंतनुके पुत्र बाह्लीकसे सोमदत्तकी उत्पत्ति हुई।

भा० न०
॥६९॥

इस सोमदत्तके भूरि, भूरिश्रवा और शल यह तीन पुत्र उत्पन्न हुए। हे परीक्षित्! इन शंतनुके गंगाजीके गर्भसे भीष्मजीका जन्म हुआ था। यह भीष्मजी धर्मके जाननेवालोंमें श्रेष्ठ महाभागवत विद्वान् और वीरगणोंमें अग्रगण्य थे, उन्होंने संग्राममें * परशुरामजीको भी प्रसन्न किया था। हे राजन्! इन शंतनुसे दास (धीवर) कन्यामें चित्रांगद और विचित्रवीर्य नामक दो पुत्र जन्में * ॥१८॥१९॥२०॥ उनमें छोटा विचित्रवीर्य हुआ और बड़ा पुत्र चित्रांगद, जिसको किसी गन्धर्वने मार डाला था। शंतनु राजाके ग्रहण करनेसे पहले इस दाशकन्या (सत्यवती) में महर्षि पराशरसे साक्षात् भगवान् हरिके अंशसे कृष्णद्वैपायन मुनि (श्रीव्यासजी) का अवतार हुआ ॥२१॥

विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः ॥ यस्यां पराशरात्साक्षादवतीर्णो हरेः कला ॥ २१ ॥ वेदगुप्तो मुनि कृष्णो यतोऽहमिदमध्यगाम् ॥ हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः ॥ २२ ॥ मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ॥ विचित्रवीर्योऽथोवाह काशिराजसुते बलात् ॥ २३ ॥ स्वयंवरादुपानीते अंबिकाम्बालिके उभे ॥ तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ॥ २४ ॥

रङ्गद्वारं समासाद्य तस्मिन्नागमवस्थितम् ॥ अपश्यत् कुवलयापीडं कृष्णोऽम्बष्ठप्रचोदितम् ॥२॥ बद्ध्वा परिकरं शौरिः समुह्य कुटिलालकान् ॥ उवाच हस्तिपं वाचा मेघनादगभीरया ॥ ३ ॥ अम्बष्ठाम्बष्ठ मार्गं नौ देह्यपक्रम मा चिरम् ॥ नो चेत् सकुञ्जरं त्वाद्य नयामि यमसादनम् ॥४॥ एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं गजम् ॥ चोदयामास कृष्णाय कालान्तकयमोपमम् ॥ ५ ॥ करीन्द्रस्तमभिद्रुत्य करेण तरसाऽग्रहीत् ॥ कराद् विगलितः सोऽमुं निहत्यांघ्रिष्वलीयत ॥६॥ सङ्क्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवम् ॥ परामृशत् पुष्करेण स प्रसह्य विनिर्गतः ॥ ७ ॥ पुच्छे प्रगृह्यातिबलं धनुषः पञ्चविंशतिम् ॥ विचकर्ष यथा नागं सुपर्ण इव लीलया ॥ ८ ॥ स पर्यावर्तमानेन सव्यदक्षिणतोऽच्युतः ॥ बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ॥ ९ ॥

(मृत्यु) के समान क्रोधित हो महावतने हाथीको भगवान् श्रीकृष्णचन्द्रके ऊपर हूल लिया ॥ ५ ॥ हाथीने अत्यन्त शीघ्रतासे आते ही भगवान् श्रीकृष्णचन्द्रको अपनी सूँड़में पकड़ लिया, परंतु श्रीकृष्णचन्द्र भी उसकी सूँड़मेंसे फिसल और उसके मस्तकमें मुष्टिक मार पिछले पावोंमें छिप गये ॥ ६ ॥ और फिर जिस समय श्रीकृष्णको देख क्रोधित हो सूँघा सांघीकी दृष्टिवाले हाथीने इनके पकड़नेको सूँड चलायी, उस समय सूँड पकड़ भगवान् श्रीकृष्णचन्द्र उसके पिछले पावोंसे निकल गये ॥७॥ अत्यन्त बलवान भगवान् श्रीकृष्णचन्द्रने हाथीकी पूँछ पकड़ जैसे गरुड़ सर्पको घसीटता है, उसी प्रकार पच्चीस धनुषतक लीलापूर्वक ही घसीटा ॥८॥ पूंछ पकड़े हुए श्रीकृष्णचंद्रको

पकड़नेके लिए जब दाहिनी ओर हाथी आता, तब श्रीकृष्ण उसे बांई ओर ले जाते और बांई ओर आता तो दाहिनी ओर ले जाते, अधिक क्या कहें ! जैसे गायोंके बछड़ोंके संग बालक फिरते हैं, उसी प्रकार भगवान् श्रीकृष्णचन्द्र हाथीके पीछे फिर रहे थे ॥९॥ इसके उपरांत भगवान् श्रीकृष्णचन्द्रने सम्मुख आकर थप्पड़ मार दौड़कर उस हाथीको पटक दिया ॥ १० ॥ जब उसे गिरा दिया श्रीकृष्णचन्द्र भी लीलापूर्वक पृथ्वीपर गिरके अत्यन्त शीघ्रतासे खड़े हो गये, तब श्रीकृष्णचन्द्रको गिरा जान वह हाथी दांतोंसे पृथ्वीको खोदने लगा॥ ११॥ हे नृपश्रेष्ठ ! जब हाथीका बल घट गया तब हाथीको महाक्रोध उत्पन्न हुआ और महावतने जिस समय अंकुश मारा तब वह हाथी श्रीकृ-

ततोऽभिमुखमभ्येत्य पाणिनाऽऽहत्य वारणम् ॥ प्राद्रवन् पातयामास स्पृश्यमानः पदेपदे ॥ १० ॥ स धावन् क्रीडया भूमौ पतित्वा सहसोत्थितः ॥ तं मत्वा पतितं क्रुद्धो दन्ताभ्यां सोऽहनत् क्षितिम् ॥ ११ ॥ स्वविक्रमे प्रतिहते कुञ्जरेन्द्रोऽत्यमर्षितः ॥ चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद् रुषा ॥ १२ ॥ तमापतन्तमासाद्य भगवान् मधुसूदनः ॥ निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥ पतितस्य पदाक्रम्य मृगेन्द्र इव लीलया ॥ दन्तमुत्पाटय तेनेभं हस्तिपांश्चाहनद्धरिः ॥ १४ ॥ मृतकं द्विपमुत्सृज्य दन्तपाणिः समाविशत् ॥ असंन्यस्तविषाणोऽसृङ्मदबिन्दुभिरङ्कितः ॥ विरूढस्वेदकणिकावदनाम्बुरुहो बभौ ॥ १५ ॥ वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ ॥ रंगं विविशतू राजन् गजदंतवरायुधौ ॥ १६ ॥

ष्णचन्द्रपर फिर झपटा ॥ १२ ॥ मधु दैत्यके मारनेवाले भगवान् श्रीकृष्णचन्द्रने सम्मुख आते ही हाथीकी सूँड़ पकड़ पृथ्वीमें पटक दिया ॥ १३ ॥ और सिंहके समान गर्जते हुए हाथीको पावोंके नीचे दाब लीलापूर्वक उसके दांत उखाड़ भगवान् श्रीकृष्णचन्द्रने उन दांतोंसे महावतको मारा ॥ १४ ॥ जब हाथी मर गया, तब श्रीकृष्णबलदेवजी उसे वहीं छोड़ हाथमें हाथीके दांत ले कन्धेपर धारण कर वहांसे आगे चले, उस समय रुधिर और मदकी बूँदे उनके लग रही थीं ॥ १५ ॥ और हे राजन् ! कुछेक पसीना भी उनके

* शंका—जो कोई दरिद्री भी राजाकी सभामें जाता है, तव अपने वित्तानुसार वस्त्राभूषण पहिर जाता है और शास्त्रमें तथा लोकमें इसको भी बहुत निन्दित कर्म कहते हैं कि, रक्त देहमें लगा राजाकी सभामें जाना, सो श्रीकृष्ण जगत्के ईश्वर होकर अपने देहमें रक्तके विन्दु लगाकर कंसकी सभामें क्यों आये ?

मुखकमलपर आ रहा था, इस प्रकार शोभायमान भगवान् श्रीकृष्णचन्द्र गोप ग्वालोंको संग लिये हाथी दांतके शोभायमान शस्त्र धारण किये कृष्ण बलदेव दोनों भाई रंगभूमिमें पहुँचे ॥ १६ ॥ उस समय भगवान् श्रीकृष्णचंद्र मल्लोंको मल्लोंके समान दृष्टि आये, मनुष्योंको अत्यंत सुंदर जान पड़े और स्त्रियोंने साक्षात् कामदेव स्वरूप समझा, दुष्ट राजाओंको कालके समान दिखायी दिये, वसुदेव देवकीने पुत्रके समान देखा, भोजपति कंसने तो यही देखा कि साक्षात् मेरी मृत्यु चली आती है, अज्ञानियोंको भयङ्कर रूप दृष्टि पड़े और ज्ञानियोंको परमतत्त्वरूप दृष्टि आये यादवोंको परम देवतारूप जान पड़े, अधिक क्या कहें जैसी जिसकी भावना थी, उसे उसी प्रकार

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥ मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः॥१७॥ हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ॥ कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ॥१८॥ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगम्बरौ ॥ यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षताम् ॥ १९ ॥ निरीक्ष्य तावुत्तमपूरुषौ जना मञ्चस्थिता नागरराष्ट्रका नृप ॥ प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननम्॥ २० ॥

दिखायी दिये ॥ इस प्रकार भगवान् श्रीकृष्णचन्द्र बलरामजीको संग लेकर रंगभूमि पहुँचे ॥१७॥ हे राजा परीक्षित् ! कुवलयापीड हाथीको मरा देख जो किसीके जीतनेमें न आवें, ऐसे कृष्ण बलदेवको देख अत्यन्त धैर्यवान् राजा कंस भी डर गया ॥१८॥ बड़ी भुजा, विचित्र वेष, आभूषण,माला इत्यादि वस्त्रोंको धारण किये भगवान् कृष्ण बलदेव रंगभूमिमें जाकर ऐसे शोभायमान लगने लगे जैसे उत्तम रूप धारण करनेवाला नट शोभायमान लगता है, इस प्रकार अपनी कांतिसे देखनेवाले पुरुषोंके मनको चुराते थे॥१९॥ हे राजन् ! मञ्चानोंके ऊपर बैठे पुरवासी देशवासी जन पुरुषोंमें श्रेष्ठ श्रीकृष्ण बलदेवको देख आनन्दके वेगसे प्रफुल्लितमुख हो गये और अपने नेत्रोंसे उनके मुखकी शोभा

उत्तर–सत्य है कि जिसके शरीरमें रक्त लगा रहता है, उस पुरुषको लोकमें; शास्त्रमें और वेदमें भ्रष्ट कहते हैं,परंतु श्रीकृष्ण कंसका नाश करनेसे लिये विचारके उन्मत्त प्रमत्तकी नाई मथुराको चले गये और शूरवीरोंका शरीरमें रक्त लगाकर सभामें जाना कुछ दोष नहीं है इसलिये जगदीश्वर शरीरमें रक्त लगाकर सभामें गये ।

देखकर तृप्त न हुए ॥ २० ॥ इस प्रकार नेत्र चलाने लगे कि मानो रूपको पी जायँगे, जीभ ऐसी चलाते थे मानो चाट जायँगे, नासिका ऐसी चलाते हैं मानो सूँघ लेंगे, भुजा ऐसी चलाते हैं मानो लिपट जायँगे । जैसा श्रीकृष्णचन्द्रका रूप कानोंसे सुना था, उसी प्रकार आंखोंसे देखकर उनके रूप, गुण, माधुर्य्य, ढिठाईसे बुद्धि जिनके हो गयी, ऐसे पुरुष जैसा सुने वैसा ही आपसमें कहने लगे ॥२१॥२२॥ कि ये जो कृष्ण बलदेव हैं सो साक्षात् भगवान् हरि नारायण हैं और अपने अंश सहित इस संसारमें वसुदेवके घर अवतार लिया है॥२३॥ देखो, यह जो सांवरा बालक है, इसने देवकीसे जन्म लिया था और अबतक छिपा रहा, क्योंकि पिताने गोकुल पहुँचा दिया था, इस

पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया ॥ जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः ॥ २१ ॥ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतम् ॥ तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥२२॥ एतौ भगवतः साक्षाद् हरेर्नारायणस्य हि ॥ अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥२३॥ एष वै किल देवक्यां जातो नीतश्च गोकुलम् ॥ कालमेतं वसन् गूढो ववृधे नन्दवेश्मनि॥२४॥पूतनाऽनेन नीतान्तं चक्रवातश्च दानव ॥ अर्जुनौ गुह्यकः केशी धेनुकोऽन्ये च तद्विधाः ॥२५॥ गावः सपाला एतेन दावाग्नेः परिमोचिताः ॥ कालियो दमितः सर्प इन्द्रश्च विमदः कृतः ॥ २६ ॥ सप्ताहमेकहस्तेन धृतोऽद्रिप्रवरोऽमुना ॥ वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥२७॥ गोप्योऽस्य नित्यमुदितहसित प्रेक्षणं मुखम् ॥ पश्यन्त्यो विविधांस्तापांस्तरन्ति स्माश्रमं मुदा ॥२८॥ वदन्त्यनेन वंशोऽयं यदोः सुबहुविश्रुतः ॥ श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः ॥ २९ ॥

लिए नन्दजीके घर वृद्धिको प्राप्त हुआ है ॥ २४ ॥ इसी कृष्णने पूतना मारी और बगलेका स्वरूप धरे हुए बकासुर दैत्यको मारा, यमलार्जुन वृक्ष उखाड़े और केशी, अघासुर इत्यादिक बहुतसे दानव मारे ॥ २५ ॥ देखो जब वनमें अग्नि लगी थी, तब इसी कृष्णने गौ, ग्वाल बचाये थे, काली सर्पको दण्ड दिया और इन्द्रका मद दूर किया ॥ २६ ॥ यही सात दिनतक गोवर्द्धन पर्वतको हाथमें लिए रहा, वर्षा, पवन, वज्रपातसे गोकुलकी रक्षाकी ॥ २७ ॥ गोपियें इस कृष्णका नित्य प्रसन्न हँसन चितवनयुक्त श्रमरहित मुख देखकर अनेक तापोंको दूर करती हैं ॥ २८ ॥ अधिक क्या कहें, इस कृष्णसे यह यदुवंश बहुत विख्यात हो सम्पत्ति, यश, बड़ाई पावेगा और इसी

कृष्णसे सज्जनोंकी रक्षा होगी, इस प्रकार वे मनुष्य परस्पर बातचीत करने लगे ॥ २९ ॥ कमलके समान नेत्र स्वरूपवान् इस कृष्णके बड़े भाई बलरामजीने प्रलम्बासुर धेनुकासुर मारे। क्यों जी! मारे तो कृष्णने, बलदेवका नाम क्यों लेते हो? देखी सुनी बातोंमें भी भेद हो जाता है ॥३०॥ हे महाराज! सब मनुष्य इस प्रकार कह रहे थे और नगाड़े बज ही रहे थे कि इतनेमें चाणूर नामक बलवान् श्रीकृष्ण बलदेवको सम्बोधन देकर बोला ॥३१॥ कि हे नन्दके पुत्र! हे राम! तुममें बल अधिक है और कुस्ती लड़ना भी भले प्रकार जानते हो यही सुनकर राजा कंसने तुम्हें बुलाया है ॥ ३२ ॥ क्योंकि प्रजा मन, कर्म, वचनसे राजाका प्रिय करे तो कल्याण प्राप्त होता है और

अयं चास्याग्रजः श्रीमान् रामः कमललोचनः ॥ प्रलम्बो निहतो येनवत्सको ये बकादयः ॥ ३० ॥ जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च ॥ कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥३१॥ हे नन्दसूनो हे राम भवन्तौ वीरसंमतौ॥ नियुद्धकुशलौ श्रुत्वा राज्ञाऽऽहूतौ दिदृक्षुणा ॥ ३२ ॥ प्रियं राज्ञः प्रकुर्वन्त्यश्श्रेयो विन्दन्ति वै प्रजाः ॥ मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥ ३३ ॥ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटम् ॥ वनेषु मल्लयुद्धेन क्रीडन्तश्चारयन्ति गाः ॥ ३४ ॥ तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे ॥ भूतानि नः प्रसीदन्ति सर्वभूतमयो नृपः ॥ ३५ ॥ तन्निशम्याब्रवीत् कृष्णो देशकालोचितं वचः ॥ नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनन्द्य च ॥ ३६ ॥ प्रजा भोजपतेरस्य वयं चापि वनेचराः ॥ करवाम प्रियं नित्यं तन्न परमनुग्रहः ॥ ॥ ३७ ॥ बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् ॥ भवेन्नियुद्धं माऽधर्मः स्पृशेन्मल्लसभासदः ॥ ३८ ॥

जो विपरीत करते हैं उनका कल्याण नहीं होता ॥ ३३ ॥ और यह बात भी प्रकट है कि प्रतिदिन बछड़ोंके चरानेवाले गोप प्रसन्न होकर ब्रजमें कुन्तीका खेल करके गाय चराते हैं ॥ ३४ ॥ इस कारण हम तुम कुस्ती लड़कर राजा कंसका प्रिय करें तो राजा कंस प्रसन्न होंगे और फिर सब प्राणी हमारे ऊपर प्रसन्न होंगे॥ ३५ ॥ इस प्रकार भगवान् श्रीकृष्णचन्द्र चाणूरका वचन सुनकर और कुस्ती लड़ना अपने योग्य जान बड़ाई करके उस समयके उचित वाक्य कहने लगे ॥ ३६ ॥ कि जिस कंसकी तुम प्रजा हो, उसी कंसकी हम वनमें रहनेवाली प्रजा हैं, इसलिए राजा कंसका नित्य प्रिय करे इसीमें हमारा कल्याण है ॥ ३७ ॥ परंतु देखो हम बालक हैं इसलिए हम अपने

समानके बालकोंसे कुस्ती लड़ेंगे, जैसा उचित हो उसी रीतिसे कुस्ती लड़ो; क्योंकि मल्लोकी सभामें अधर्म नहीं होना चाहिए ॥३८॥ इस प्रकार भगवान् श्रीकृष्णचन्द्रका वचन सुनकर चाणूर बोला कि तुम बालक नहीं हो और बलियोंमें बलवान् हो, बलदेव भी बालक नहीं हैं, किशोर नहीं हो क्योंकि हजार हाथियोंका बल रखनेवाला कुवलयापीड हाथी तुमने लीलापूर्वक ही मार डाला ॥३९॥ इसलिए हमारे संग तुम कुस्ती लड़ो, यह अनीति नहीं है। हे वृष्णिवंशमें जन्मे कृष्ण! मेरी तुम्हारी और बलराम मुष्टिककी कुस्ती हो ॥४०॥ इति श्रीमद्भागवते महापुराणे दशम० पूर्वार्द्धे भाषाटीकायां कुवलयापीडवधो, रंगभूमिप्रवेशनिरूपणं नाम त्रिचत्वारिंशोऽध्यायः॥४३॥दोहा—कंसादिकको वध कियो, माइन

चाणूर उवाच ॥ न बालो न किशोरस्त्वं बलश्च बलिनां वरः ॥ लीलयेभो हतो येन सहस्रद्विपसत्त्वभृत् ॥ ३९ ॥ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै ॥ मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे कुवलयापीडवधो नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥ श्रीशुक उवाच ॥ एवं चर्चित संकल्पो भगवान् मधुसूदनः ॥ आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः ॥ १ ॥ हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ॥ विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया ॥ २ ॥ अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी ॥ शिरःशीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ॥ ३ ॥ परिभ्रामणविक्षेपपरिरम्भावपातनैः ॥ उत्सर्पणापसर्पणैश्चान्योन्यं प्रत्यरुन्धताम् ॥ ४ ॥

ज्ञान बताय। दश किये पितु मातुको, चौंवालिस अध्याय ॥ श्रीशुकदेवजी बोले कि हे भरतवंशावतंस राजा परीक्षित्! इस प्रकार निश्चय संकल्प कर नीलाम्बर पीतांबरके कच्चे नांध, खम्भे ठोंककर खड़े हो गये। इसके उपरांत मधु दैत्यके मारनेवाले भगवान् श्रीकृष्ण जो चाणूरके सम्मुख हुए और रोहिणीनन्दन बलरामजी मुष्टिकसे जुटे ॥ १ ॥ हाथोंसे हाथ, पांवसे पांव मिलाय परस्पर जीतनेकी इच्छासे एक एकको बलात्कार खैंचने लगे ॥२॥ अरत्निमें अरत्नि[1] मिलाय, घुटुंएसे घुटुएं मिलाय, शिरसे शिर, छातीसे छाती मिलाकर कृष्ण और चाणूर दोनों परस्पर कुस्ती लड़ने लगे ॥ ३ ॥ चारों और घूमना, धक्का देना, परिरम्भण अर्थात् हाथसे बिडारना, अपवातन अर्थात्

१ अरत्ति–समुष्टि हस्त अर्थात् कोहनीसे बीच की अंगुलीतक।

नीचे पटक देना, उत्सर्पण अर्थात् छोड़कर पीछेसे आगे जाना, अपसर्पण अर्थात् पीछे जाकर खड़ा होना, इस प्रकार दाव पेंच कर करके लड़ने लगे ॥ ४ ॥ उत्थापन अर्थात् पांव और घुटुएं मिलाकर गिरते हैं, उनका उखाड़ देना, चालन अर्थात् बँधे दावको दूर करना, स्थापन अर्थात् हाथ पांव पकड़कर मिला देना, इस प्रकार परस्पर देहको पीड़ा देने लगे ॥ ५ ॥ इस प्रकार इनका युद्ध देखकर वहांकी बैठी हुई स्त्रियें परस्पर कहने लगीं कि देखो यह कृष्ण तो निर्बल है और चाणूर सबल है, यह विचार वे स्त्रियें अत्यन्त दयाको प्राप्त हुईं ॥ ६ ॥ इन राजसभामें बैठनेवालोंको बड़ा अधर्म होगा क्योंकि राजाके देखनेको कहीं निर्बल सबलकी कुस्ती कराई जाती है ! ॥ ७ ॥

उत्थांपनैरुन्नयनैश्चालनैः स्थापनैरपि ॥ परस्परं जिगिषन्तावपचक्रतुरात्मनः ॥ ५ ॥ तद्बलाबलवद् युद्धं समेताः सर्वयोषितः ॥ ऊचुः परस्परं राजन् सानुकम्पा वरूथशः ॥ ६ ॥ महानयं बताऽधर्म एषां राजसभासदाम् ॥ ये बलाबलवद् युद्धं राज्ञोऽन्विच्छन्ति पश्यतः ॥ ७ ॥ क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ॥ क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥ ८ ॥ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ॥ यत्राधर्मस्समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥९॥ न सभां प्रविशेत् प्राज्ञः सभ्यदोषाननुस्मरन् ॥ अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥ वल्गतः शत्रुमभितः कृष्णस्य वदनाम्बुजम् ॥ वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवाम्बुभिः ॥ ११ ॥

भला विचारो तो सही, कि कहां तो वज्रसे कठोर अङ्गवाले पर्वतके समान ऊँचे ऊँचे सब मल्ल और कहां अति सुकुमार कोमल अङ्ग जिनकी यौवन अवस्था भी अभी प्राप्त नहीं हुई ऐसे श्रीकृष्णचन्द्र ? ॥ ८ ॥ इस सभामें इस समय निश्चय धर्मनाश हो रहा है, इस कारण इस सभामें बैठना उचित नहीं क्योंकि जहां धर्मका नाश हो वहां कभी न बैठे ॥९॥ विवेकी पुरुषको ऐसी सभामें जाना योग्य नहीं है, क्योंकि दोषोंको स्मरण कर बातको जानकर जो चुप बैठा रहे तो दोष लगे और किसीकी झूठी सच्ची कहे तो दोष लगे, अथवा हम किसीकी भली जाने न बुरी ऐसे कहे तो भी दोषका भागी हो इस कारण सभामें जाना योग्य नहीं है॥१०॥ सत्य बोलनेवालेको दुःख नहीं होता, सत्ययुक्त

पुरुषको कोई विघ्न दोष नहीं सता सकते * शत्रुके चारों ओर दौड़ धूप करते श्रीकृष्णके मुखकी शोभा देखो, कुस्तीमें जोर करनेसे इनके मुखपर पसीनेकी बूँदें आ रही हैं, जैसे कमलकोशके ऊपर ओसकी बूँदें पड़ती हैं ॥ ११ ॥ अरुण नेत्र बलदेवजीके मुखकी शोभा देखो, मुष्टिकके ऊपर क्रोध आ रहा है तो भी मुसकान सहित है इसलिए सुन्दर लगते हैं ॥१२॥ भूमिमें व्रजभूमि परमपवित्र है, क्योंकि जिसके वनके चित्र विचित्र फूलोंको धारण किये पुराणपुरुष भगवान श्रीकृष्णचन्द्र बलदेवजीके सहित मनुष्यरूपमें छिपकर गौवोंको चराते

कि न पश्यत रामस्य मुखमाताम्रलोचनम् ॥ मुष्टिकं प्रतिसामर्ष हाससंरम्भशोभितम् ॥ १२ ॥ पुण्या बत व्रजभुवो यदयं नृलिंगगूढः पुराणपुरुषो वनचित्रमाल्यः ॥ गाः पालयन् सहबलः क्वणयंश्च वेणुं विक्रीडयाञ्चति गिरित्ररमार्चिताङ्घ्रिः ॥ १३ ॥ गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ॥ दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ऐश्वरस्य ॥ १४ ॥ या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ ॥ गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ॥ १५ ॥

समय बांसुरी बजाते खेलते फिरते हैं, जिनके चरणोंका महादेव और लक्ष्मीजी भी पूजन करती हैं ॥ १३ ॥ बड़ा आश्चर्य है, गोपियोंने ऐसा क्या तप किया है, जिस कारण जिससे श्रेष्ठ कोई नहीं, और जिसके समान कोई नहीं जिससे अधिक कोई नहीं, एवं जो आभूषण वस्त्र विना ही सुन्दर लगता है, यश लक्ष्मी ऐश्वर्य इनका एकान्त स्थान, अर्थात् सर्वदा जिसमें बास करें ऐसे प्यारेके स्वरूपको दृष्टिसे देखती हैं ॥ १४ ॥ हे सखियो ! ब्रजबालायें धन्य हैं ! जो गोपी गाय दुहाने के समय, धान छरते समय, दूध बिलोते समय, बालकोंको झुलाते

* दृष्टांत—एक राजाने एक बाजार बनवाया और कहा कि जो वस्तु यहां वेचनेको लावेगा और सन्ध्यातक न विकेगी उसे में स्वयं ले लूंगा। इस प्रकार वह बाजार विख्यात हो गया। एक दिन एक लुहार लोहेकी शनैश्चरकी मूर्ति वनाकर लाया, एक लाख रुपया उसका मोल मांगा और कहा कि जिसके यहां यह मूर्ति रहेगी उसके यहां द्रव्यादिकुछ न रहेगा। अब उस अनिष्ट कारक मूर्तिको किसीने न लिया। सन्ध्या समय राजाने देखा कि बड़ी भीड़ हो रही है, कारण पूछते ही राजाने विचारकर उस मूर्तिको ले लिया और लाख रुपये दे दिये। जब राजाने घरमें मूर्ति रक्खी तो पहले लक्ष्मी राजासे बोली—महाराज ! मैं जाती हूँ। राजा बोला क्यों ? लक्ष्मी बोली— जहां शनैश्चर देव रहते हैं वहां हमारा क्या काम ? राजाने कहा—जाओ। इसी प्रकार नीति, साम, दान, दण्ड, भेद सब रूप धर कर आये और राजाने जाने दिया। पीछेसे जब सत्यदेव आये तो राजासे कहकर जब जाने लगे तब राजाने हाथ पकड़कर कहा—कि आपके रखनेको तो हम शनैश्चर देवको लाये हैं, तुम कैसे जाते हो ? सत्यदेवसे कुछ उत्तर न बन पड़ा और रह गये, अतः सत्यके रहनेसे नीति, लक्ष्मी आदि सब लौट आये और सत्यके प्रभावसे शनैश्चर राजाका कुछ भी बिगाड़ न कर सके।

समय और चुपाते समय, घरोंका काम काज करते समय भगवान् श्रीकृष्णचन्द्रमें आसक्त होकर उनके गुण गाती हैं, उस समय उनका मन भगवान् श्रीकृष्णचन्द्रमें ही लग जाता है और प्रेमानंदसे उनके नेत्रोंमें आंसू आ जाते हैं ॥१५॥ प्रातःकाल जब ब्रजसे गौ चरानेको जाते हैं और सन्ध्या समय जब गायोंको ले बांसुरी बजाते हुए आते हैं, उस समय वे महाभाग्यवती गोपियें बांसुरीका शब्द सुन शीघ्र अपने घरसे निकल मार्गमें आये, सुन्दर मुसकान दयापूर्वक चितवनयुक्त श्रीकृष्णचन्द्रके मुखका दर्शन करती हैं ॥ १६ ॥ हे भरत

प्रातर्व्रजाद् व्रजत आविशतश्च सायं गोभिस्समं क्वणयतोऽस्य निशाम्य वेणुम् ॥ निर्गम्य तूर्णमबलाः पथि भूरि पुण्याः पश्यन्ति सस्मितमुखं सदयावलोकम् ॥१६॥ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ॥ शत्रुं हन्तुं मनश्चक्रे भगवान् भरतर्षभ ॥ १७ ॥ सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ ॥ पितरावन्वतप्येतां पुत्रयोरबुधौ बलम् ॥ १८ ॥ तैस्तैर्नियुद्धविधिभिर्विविधैरच्युततरौ ॥ युयुधाते यथान्योन्यं तथैव बलमुष्टिकौ ॥ १९ ॥ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह ॥ २० ॥

वंशावतंस परीक्षित् ! इधर तो स्त्रियें परस्पर इस प्रकार बातें कर रही थीं और उधर योगके ईश्वर सबका दुःख हरनेवाले भगवान् श्रीकृष्णचन्द्र शत्रुओंके मारनेका विचार करने लगे ॥ १७ ॥ भयसहित स्त्रियोंकी बातें सुनकर पुत्रोंमें स्नेहके शोकसे व्याकुल और पुत्रोंके बलको नहीं जाननेवाले माता पिता वसुदेव देवकी अत्यन्त दुःखित हुए ॥ १८ ॥ अनेक प्रकार कुस्तीके दांव पेचोंसे जैसे श्रीकृष्ण और चाणूर लड़ते थे उसी प्रकार महात्मा बलदेव और मुष्टिक लड़ने लगे ॥ १९ ॥ वज्रपातके समान कठोर भगवान्के अंगके प्रहारसे

शंका—जिस समय भगवान् श्रीकृष्णचन्द्र प्रकट हुए उसी समय वसुदेव देवकीको ज्ञान दिया और वसुदेव देवकी श्रीकृष्णके समुद्र सरीखे चरित्र और कर्मोंको जानते थे और सुन भी रक्खा था, फिर वसुदेव देवकी जानबूझकर क्यों अज्ञानी हो गये ?

उत्तर—श्रीकृष्णके माता पिता अज्ञानी-नहीं हुए, पुत्रके मोहमें व्याकुल हो गये, पुत्र की मोहरूप अग्निसे भस्म हो गये; इसलिये अज्ञानियोंकी नाईं हो गये क्योंकि संसारमें पुत्रका मोह बड़ा भारी है, पुत्रके मोहमें बुद्धि ठिकाने नहीं रहती ।

चाणूरका अंग चुरकुट हो गया जिससे वह बहुत दुःखित हुआ ॥ २० ॥ इसके उपरांत शिकरेके वेगके सामान चाणूरने दोनों हाथकी मुष्टि बांध क्रोधमें भर, ऊपरको उछल भगवान् वासुदेवकी छातीमें एक घूँसा मारा ॥ २१ ॥ हे राजन्! जिस प्रकार हाथी फूलोंकी मालाके लगनेसे नहीं चलायमान होता, वैसे ही श्रीकृष्णचन्द्र उसकी मुष्टिकसे चलायमान न हुए, इसके उपरांत अत्यन्त क्रोधित हो भगवान् श्रीकृष्णचन्द्रने चाणूरके दोनों हाथ पकड़ अनेक वार घुमाकर बड़े वेगमे पृथ्वीपर पटक दिया, गिरते ही उसके प्राण निकल गये और गहने, केश माला इत्यादि सब बिखर गये। गिरते समय ऐसा शब्द हुआ कि मानो इन्द्रध्वज गिरा ॥ २२ ॥ २३ ॥ इसी प्रकार मुष्टिक, कि जिसने पहले बलदेवके मुष्टिक प्रहार किया था, उसे बलदेवजीने थाप मारकर गिरा दिया ॥२४॥ मुष्टिक, कंपित हो मुखसे रुधिरको

स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ ॥ भगवन्तं वासुदेवं क्रुद्धो वक्षस्यबाधत ॥ २१ ॥ नाचलत् तत्प्रहारेण मालाहत इव द्विपः ॥ बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन् हरिः ॥ २२ ॥ भूपृष्ठे पोथयामास तरसा क्षीणजीवितम् ॥ विस्रस्ताऽऽकल्पकेशस्रगिंद्रध्वज इवापतत् ॥ २३ ॥ तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहतेन वै ॥ बलभद्रेण बलिना तलेनाभिहतो भृशम् ॥ २४ ॥ प्रवेपितः स रुधिरमुद्वमन्मुखतोऽर्दित ॥ व्यसुः पपातोर्व्युपस्थे वाताहत इवाङ्घ्रिपः ॥ २५ ॥ ततः कूटमनुप्राप्तो रामः प्रहरतां वर ॥ अवधील्लीलया राजन् सावज्ञं वाममुष्टिना ॥ २६ ॥ तर्ह्येव हि शलः कृष्णप्रपदाहतशीर्षकः ॥ द्विधा विदीर्णस्तोशलक उभावपि निपेततुः ॥२७॥ चाणूरे मुष्टिके कूटे शले तोशलके हते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥ २८ ॥

वमन करता पीड़ित हो प्राण निकल जानेसे जैसे पवनका मारा वृक्ष उखड़कर गिर पड़ता है, उसी प्रकार गिर गया ॥ २५ ॥ हे राजा परीक्षित! इसके उपरांत दौड़ते हुए कूट मल्लको मारनेवालोंमें श्रेष्ठ बलदेवजीने लीलापूर्वक तिरस्कार कर बाई मुष्टिसे मार डाला ॥२६॥ शल, तोशलने अपने मनमें विचार किया कि दण्डवत्‌के बहाने चरण पकड़कर पटक देंगे, परंतु भगवान् तो सबके बाहर भीतरकी जाननेवाले हैं, यह जिस समय दण्डवत् करनेको आये; उस समय बलवान् श्रीकृष्णचन्द्रने एक लात ऐसी मारी जिसके लगनेसे शिर फट गया, इस प्रकार शल, तोशल दो खण्ड विदीर्ण होकर दोनों पृथ्वीपर गिर गये ॥ २७ ॥ चाणूर, मुष्टिक, कूट, शल, तोशल, इत्यादि मुख्य

मुख्य मल्ल जब मारे गये, तब वहां और जो मल्ल उपस्थित थे, वे अपना प्राण बचानेके लिए भाग गये ॥२८॥ बराबरके गोपोंको अखाड़ेमें खैंच श्रीकृष्ण बलदेव उनके सङ्ग विहार करने लगे, उस समय बाजे बज रहे थे और श्रीकृष्णचन्द्रने नूपुर नृत्य करनेसे परम सुहावन बन रहे थे ॥२९॥ भगवान् श्रीकृष्णचन्द्र और बलदेवजीके चरित्र देख कंसके विना सब मथुरावासी प्रसन्न हो गये, मुख्य मुख्य ब्राह्मण तथा सज्जन पुरुष "साधु साधु" ऐसे कहकर स्तुति करने लगे ॥ ३० ॥ जब बड़े बड़े मल्ल मर गये, और कितने ही भाग गये तब भोजवंशियोंके-राजा कंसने नगाड़े बन्द करा दिये ॥ ३१ ॥ और क्रोधित होकर कहने लगा कि कुटिलकर्मा वसुदेवके पुत्रोंको पुरसे निकाल दो और

गोपान्वयस्यानाकृष्य तैः संसृज्य विजह्रतुः ॥ वाद्यमानेषु तूर्येषु वल्गन्तौ रुतनूपुरौ ॥ २९ ॥ जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ॥ ऋते कंसं विप्रमुख्याः साधवः साधुसाध्विति ॥३०॥ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ॥ न्यवारयत् स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ ३१ ॥ निस्सारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ॥ धनं हरत गोपानां नन्दं बध्नीत दुर्मतिम् ॥ ३२ ॥ वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ॥ उग्रसेनः पिता चापि सानुगः परपक्षगः ॥ ३३ ॥ एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ॥ लघिम्नोत्पत्य तरसा मञ्चमुत्तुङ्गमारुहत् ॥ ३४ ॥ तमाविशन्तमालोक्य मृत्युमात्मन आसनात् ॥ मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥३५॥ तं खड्गपाणिं विचरन्तमाशु श्येनं यथा दक्षिणसव्यमम्बरे ॥ समग्रहीद् दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥ ३६ ॥

इनका धन छीन लो, कुटिलबुद्धि वसुदेवको बांध लो ॥३२॥ खोटी बुद्धिवाले वसुदेवको जल्दी मारो और इसके उपरांत शत्रुसे मिलनेवाले पिता उग्रसेनको भी अनुचरोंसहित बांध लो ॥३३॥ इस प्रकार जब राजा कंस बकने लगा, तब अत्यन्त क्रोधित हो अव्यय भगवान् श्रीकृष्णचन्द्र धीरेसे उछल ऊँचे मञ्चानपर चढ़ गये॥३४॥तब धैर्यवान् अत्यन्त अभिमानी राजा कंसने अपने मृत्युस्वरूपको आता हुआ देख आसनसे उठकर ढाल तलवार ग्रहण की ॥३५॥ तलवार हाथमें ले आकाशमें जैसे शिकरा पक्षी फिरता है, उसी प्रकार दाईं बाईं ओर जल्दी जल्दी फिरनेवाले कंसको असह्य और उग्र तेजवाले भगवान् श्रीकृष्णचन्द्रने, तार्क्ष्यका पुत्र गरुड़ जैसे सर्पको पकड़ लेता है उसी प्रकार पकड़

लिया ॥३६॥ फिर उसकी फेंट तथा केश पकड़ ऊँचे मञ्चानपरसे रंगभूमिमें पटक दिया और इसके ऊपर सब जगत्के आश्रय और स्वतन्त्र कमलनाभ भगवान् स्वयं कूद पड़े ! केश पकड़नेका कारण यह है कि कंसने देवकीके केश पकड़े थे, इसलिए उसका बदला लिया (हे राजा परीक्षित् ! तीनों लोकोंका एक मात्र निवासस्थान और स्वाधीन श्रीकृष्णजीके द्वारा नीचे गिरा कर दबाये जानेपर कंसने भी निमेषमात्रमें प्राण त्याग दिये) ॥ ३७ ॥ इसके उपरांत सिंह जैसे हाथीको खींचता है, उसी प्रकार जब जगत्के देखते मृतक हुए कंसको पृथ्वीमें घसीटने लगे। हे नरेंद्र ! उस समय समस्त प्रजामें बड़ा भारी हाहाकार शब्द हुआ ॥३८॥ कंस प्रतिदिन चलायमान

प्रगृह्य केशेषु चलत्किरीटं निपात्य रंगोपरि तुङ्गमञ्चात् ॥ तस्योपरिष्टात् स्वयमब्जनाभः पपात विश्वाश्रय आत्मतन्त्रः ॥ ३७ ॥ (कंसोऽपि कृष्णेन जगत्त्रयैकनिवासभूतेन निपात्य सोऽधः ॥ तेनात्मतन्त्रेण निपीडितोऽसुं तत्याज राजन्निमिषान्तरेण ॥) तं संपरेतं विचकर्ष भूमौ हरिर्यथेमं जगतो विपश्यतः ॥ हाहेति शब्दः सुमहांस्तदाऽभूदुदीरितः सर्वजनैर्नरेन्द्र ॥ ३८ ॥ स नित्यदोद्विग्नधिया तमीश्वरं पिबन् वदन् वा विचरन् स्वपञ्श्वसन् ॥ ददर्श चक्रायुधमग्रतो यतो तदेव रूपं दुरवापमाप ॥ ३९ ॥ तस्याऽनुजा भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः ॥ अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्वेशकारिणः ॥ ४० ॥ तथाऽतिरभसांस्तांस्तु संयत्तान्रोहिणीसुतः ॥ अहन्परिघमुद्यम्य पशूनिव मृगाधिपः ॥ ४१ ॥ नेदुर्दुन्दुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः ॥ पुष्पैः किरन्तस्तं प्रीत्या शशंसुर्ननृतुः स्त्रियः ॥ ४२ ॥

चित्तसे जल पीते, बात कहते, चलते, सोते, और श्वास लेते चक्र आयुधवाले भगवान्का शत्रु भावसे ध्यान करता था, इसलिये श्रीकृष्णचन्द्रके स्वरूपको प्राप्त हुआ ॥ ३९ ॥ इसके उपरांत उस कंसके कंक, न्यग्रोधस आदि लेकर छोटे आठ भाई अत्यन्त क्रोधित हो कंसका बदला लेनेके लिए दौड़कर आये ॥४०॥ उसी समय रोहिणीके सुत बलरामजीने क्रोधित हुए हाथोंमें शस्त्र लेकर आये हुए कंसके भाइयोंको सिंह जैसे पशुओंको मारता है उसी प्रकार परिघ उठाकर मार डाला ॥ ४१ ॥ उस समय आकाशमें नगाड़े बजने लगे और भगवान्की विभूति जो ब्रह्मा महादेवादिक देवता हैं, सो प्रसन्न होकर भगवान् श्रीकृष्णचन्द्रके ऊपर फूलोंकी वर्षा करने लगे, स्त्रियें

नृत्य करने लगीं ॥ ४२ ॥ हे महाराज ! इसके उपरांत पतिके मरणसे अत्यन्त दुःखित हो नेत्रोंमें आंसू भर कंसकी स्त्रियें शिर पीटती जहां उसकी लोथ पड़ी थी, वहां आयीं ॥४३॥ वीरशय्यामें पड़े पतिका आलिंगन कर शोकातुर स्त्रियें बारंबार नेत्रोंसे आंसू बहाय बहाय पुकार पुकारकर विलाप करने लगीं ॥४४॥ हा नाथ ! हे प्राणपति ! हे धर्मके जाननेवाले ! हे करुणानाथ ! हा दीन वत्सल ! तुम आप मरकर घर बारसहित और बालकों सहित हमको क्यों मार गये ॥४५॥ हे पुरुषोंमें श्रेष्ठ ! जैसे तुम विना हम विधवा होकर शोभायमान नहीं लगतीं उसी प्रकार तुम्हारे विना मथुरापुरी भी शोभा नहीं पाती, क्योंकि सम्पूर्ण मङ्गल उत्सव इसमेंसे दूर हो गये ॥४६॥ निरपराध प्राणियोंसे तुमने

तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः ॥ तत्राभीयुर्विनिघ्नन्त्यः शीर्षाण्यश्रुविलोचनाः ॥ ४३ ॥ शयानान् वीरशय्यायां पतीनालिङ्ग्य शोचतीः ॥ विलेपुः सुस्वरं नार्यो विसृजन्त्यो मुहुः शुचः ॥ ४४ ॥ हा नाथ प्रिय धर्मज्ञ करुणानाथ वत्सल ॥ त्वया हतेन निहता वयं ते सगृहप्रजाः ॥ ४५ ॥ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ ॥ न शोभते वयमिव निवृत्तोत्सवमङ्गला ॥ ४६ ॥ अनागसां त्वं भूतानां कृतवान् द्रोहमुल्बणम् ॥ तेनेमां भो दशां नीतो भूतध्रुक् को लभेत शम् ॥४७॥ सर्वेषामिह भूतानामेष हि प्रभवाप्ययः ॥ गोप्ता च तदवध्यायी न क्वचित् सुखमेधते ॥४८॥ श्रीशुक उवाच ॥ राजयोषित आश्वास्य भगवाँल्लोकभावनः ॥ यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ॥ ४९ ॥ मातरं पितरं चैव मोचयित्वाऽथ बंधनात् ॥ कृष्णरामौ ववन्दाते शिरसाऽऽस्पृश्य पादयोः ॥ ५० ॥

बड़ा द्रोह किया, इसीसे तुम्हारी यह दशा हुई जो मरे पड़े हो। प्राणियोंसे वैर करके कौन पुरुष सुख पाता है ? ॥ ४७ ॥ क्योंकि इस संसारमें समस्त प्राणियोंके उत्पत्ति, पालन और नाशकर्ता भगवान् श्रीकृष्णचन्द्र ही हैं, इसलिए जो इनकी अवज्ञा करता है; वह कभी सुख नहीं पाता ॥ ४८ ॥ श्रीशुकदेवजी बोले कि हे राजा परीक्षित् ! लोकोंके पालन करनेवाले भगवान् श्रीकृष्णचन्द्रने राजा कंसकी स्त्रियोंका समाधान कर कंसकी दाहादिक क्रिया करायी ॥ ४९ ॥ इसके उपरांत माता पिता देवकी वसुदेवको कंसके बन्दीखानेसे छुड़ाया

और रामकृष्ण दोनों भाइयोंने माता पिताके चरणोंमें शिर लगा कर प्रणाम किया ॥५०॥ माता पिता, देवकी वसुदेव प्रणाम करते पुत्रोंको जगत्के ईश्वर जान भयभीत होकर उनसे नहीं मिले ॥५१॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे भाषाटीकायां कंसादिवधवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥ दोहा–पितु नन्दादिक शान्तकर, उग्रसेन दियो राज। बहुरि गये गुरुके भवन, पैंतालिस सुखसाज ॥ श्रीशुकदेवजी बोले कि हे नृप श्रेष्ठ परीक्षित्! पुरुषोत्तम भगवान् श्रीकृष्णचन्द्रने माता पिताको ज्ञान प्राप्त हुआ जान विचारा कि यह ज्ञान अभी ठीक नहीं, इसलिए सब लोगोंको मोहित करनेवाली अपनी माया फिर फैलायी॥१॥यादव श्रेष्ठ भगवान् श्रीकृष्णचन्द्र बलदेवजी को

देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ॥ कृतसंवन्दनौ पुत्रौ सस्वजाते न शंकितौ ॥ ५१ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे कंसवधो नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥ श्रीशुक उवाच ॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ॥ माभूदिति निजां मायां ततान जनमोहिनीम् ॥ १ ॥ उवाच पितरावेत्य साग्रजः सात्वतर्षभः ॥ प्रश्रयावनतः प्रीणन्नम्ब तातेति सादरम् ॥२॥ नास्मत्तो युवयोस्तात नित्योत्कण्ठितयोरपि ॥ बाल्यपौगण्डकैशोराः पुत्राभ्यामभवन् क्वचित् ॥३॥ न लब्धो दैवहतयोर्वासो नौ भवदंतिके ॥ यां बालाः पितृगेहस्था विदन्ते ललिता मुदम् ॥ ४ ॥ सर्वार्थसंभवो देहो जनितः पोषितो यतः ॥ न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥ यस्तयोरात्मजः कल्प आत्मना च धनेन च ॥ वृत्तिं न दद्यात् तं प्रेत्य स्वमांसं खादयन्ति हि ॥ ६ ॥

संग लेकर माता पिताके पास आये और विनयपूर्वक नम्र हो, हे माता! हे पिता! इस प्रकार आदरपूर्वक प्रसन्न होकर कहने लगे ॥२॥ हे पिता! सर्वदा तुम्हें चाहना ही बनी रही और हम पुत्रोंसे बाल्य अवस्था, पौगण्ड अवस्था तथा किशोर अवस्थाका सुख कभी तुमको न हुआ ॥३॥ दैवके मारे तुम्हारे निकट वास भी न कर सके, पिताके घर बालक रहते हैं और उनका लालन पालन होता है, आनन्द पाते हैं, हमको कुछ भी प्राप्त न हुआ ॥४॥ धर्म, अर्थ, काम,मोक्ष सर्व पदार्थ जिससे हों ऐसा यह देह जिन माता पिताने उत्पन्न किया उनकी यह मरणधर्मा मनुष्य सौ वर्षतक सेवा करे, तो भी उनसे उऋण नहीं हो सकता ॥ ५ ॥ जो पुत्र समर्थ होकर देहसे अथवा धनसे माता, पिताको जीविका

नहीं देता, उसे परलोकमें यमके दूत उसका मांस उसे ही काट काटकर भक्षण कराते हैं ॥६॥ माता, पिता, वृद्ध, सुशीला स्त्री, पुत्र, बालक, गुरु, ब्राह्मण अथवा और कोई शरण आवे इनका जो मनुष्य भरण पोषण न करे, तो वह मृतकके समान है ❋ ॥ ७ ॥ असमर्थ और कंसके भयके मारे नित्य चंचल मन होनेके कारण तुम्हारी सेवा बिना किये हमारे दिन व्यर्थ बीत गये ॥ ८ ॥ हे पिता ! हे माता ! पराये अधीन होनेके कारण हमसे तुम्हारी सेवा न बनी और दुष्ट हृदय कंससे अत्यन्त दुःखित रहे इसलिये अब हमपर तुम क्षमा करनेके योग्य

मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् ॥ गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन् मृतः ॥ ७ ॥ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ॥ मोघमेते व्यतिक्रान्ता दिवसाः वामनर्चतोः ॥ ८ ॥ तत् क्षंतुमर्हथस्तात मातर्नो परतन्त्रयोः ॥ अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुहृदा भृशम् ॥९॥ श्रीशुक उवाच ॥ इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ॥ मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुदम् ॥ १० ॥ सिञ्चन्तावश्रुधाराभिः स्नेहपाशेन चावृतौ ॥ न किंचिद्रूचतू राजन् बाष्पकण्ठौ विमोहितौ ॥ ११ ॥ एवमाश्वास्य पितरौ भगवान् देवकीसुतः ॥ मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥

हो, सो क्षमा कीजिये ॥९॥ इस प्रकार मायासे मनुष्य रूपधारी विश्वके आत्मा हरिके वचनसे मोहित होकर देवकी, वसुदेव पुत्रोंको गोदमें बैठाय परमानन्दको प्राप्त हुए ॥१०॥ हे राजा परीक्षित ! स्नेहके पाशसे बँधे (मोहित) देवकी वसुदेव आंसूकी धाराओंसे कृष्ण बलदेवको भिजोते हुए कुछ भी न बोले ॥११॥ देवकीके पुत्र भगवान् श्रीकृष्णचन्द्रने इस प्रकार माता पिताको सावधान कर नाना उग्रसेनको याद-

---

शंका—श्रीकृष्णने कहा कि, वृद्ध पिताकी सेवा करना चाहिये, परंतु शास्त्रमें ऐसा कहीं नियम नहीं है कि, वृद्धपिताकी सेवा करना और युवक पिताकी सेवा न करना, श्रीकृष्णके वचनसे ऐसा जान पड़ता है कि, समर्थ भी हो तो भी युवा पिताकी सेवा न करना, समर्थ हो व असमर्थ हो वृद्ध पिताका सेवा करना ऐसा भगवान्के वचनसे विदित होता है, फिर भगवान्ने ऐसा क्यों कहा ?

उत्तर—"मातरं पितरं वृद्धम्" इस श्लोकमें वृद्धका अर्थ बूढ़ेपनका नहीं है, वृद्ध बूढ़ेका नाम है, वृद्धका अर्थ श्रीकृष्णने ऐसा किया है कि, सर्वधर्मसे पिता वृद्ध कहिये श्रेष्ठ अथवा पंडित और धर्मशास्त्र भी धर्मोंसे पिताको बड़ा कहते हैं, पितासे माता बड़ी है, ऐसा धर्मशास्त्रका मत जानकर श्रीकृष्णचन्द्रने वृद्ध पिताका पूजन करनेके लिये कहा था, यह नहीं कहा था कि, बूढ़े पिताका सेवन करना और युवा पिताका सेवन न करना।

वोंका राजा बनाया ॥ १२ ॥ श्रीकृष्ण बोले कि हे महाराज ! हम तुम्हारी प्रजा हैं, सो हमें तुम आज्ञा करनेके योग्य हो और यदुवंशियोंको ययातिका शाप है, इस कारण यादवोंका सिंहासन पर बैठना और राज्य करना योग्य नहीं है ॥ १३ ॥ मैं सेवकके समान तुम्हारे निकट सदा उपस्थित रहूँगा, बड़े बड़े देवादिक तुमको भेंट देंगे और राज्य देंगे, इसमें कहना ही क्या है ॥ १४ ॥ और कंसके डरके मारे जो अपनी जातिके यदु, वृष्णि, अधक, मधु दाशार्ह कुकुरादिक भाग गये ॥ १५ ॥ उनको बुलाकर और विदेशमें वसनेके कारण जो यादव कृश हो रहे थे, उनका सत्कार कर बहुतसा धन दे तृप्त कर सब विश्वके कर्त्ता भगवान् श्रीकृष्णचन्द्रने अपने अपने घरोंमें बसाया ॥ १६ ॥ कृष्ण

आह चास्मान् महाराज प्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नाऽऽसितव्यं नृपासने ॥१३॥ मयि भृत्य उपासीने भवतो विबुधादयः ॥ बलिं हरन्त्यवनताः किमुतान्ये नराधिपाः ॥ १४ ॥ सर्वान्स्वज्ञातिसंबन्धान् दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यन्धकमधुदाशार्हकुकुरादिकान् ॥ १५ ॥ सभाजितान् समाश्वास्य विदेशावासकर्शितान् ॥ न्यवासयत् स्वगेहेषुवित्तैः सन्तर्प्य विश्वकृत् ॥ १६ ॥ कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः ॥ गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ १७ ॥ वीक्षन्तोऽहरहः प्रीता मुकुन्दवदनाम्बुजम् ॥ नित्यं प्रमुदितं श्रीमत् सदयस्मितवीक्षणम् ॥ १८ ॥ तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः ॥ पिबन्तोऽक्षमुकुन्दस्य मुखाम्बुजसुधां मुहुः ॥ १९ ॥ अथ नन्दं समासाद्य भगवान् देवकीसुतः ॥ संकर्षणश्च राजेन्द्र परिष्वज्येदमूचतुः ॥ २० ॥ पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् ॥ पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ २१ ॥

बलदेवकी भुजासे रक्षित हो पूर्ण मनोरथ पाके पापोंको दूर कर वे यादव घरोंमें निवास करने लगे ॥ १७ ॥ और नित्य आनन्दसे पूर्ण शोभायुक्त दयासहित मंदहास्यपूर्वक चितवनयुक्त भगवान् श्रीकृष्णचन्द्रके मुखकमलका दर्शन करके परमानन्दित होते थे ॥१८॥ हे राजन् ! भगवान् मुकुन्दके मुखकमलके अमृतको पीकर उस समय वृद्ध भी तरुणावस्थाको प्राप्त हो अत्यन्त बलवान् हो गये ॥ १९ ॥ हे राजन् ! इसके उपरांत भगवान् देवकीनन्दन श्रीकृष्णचन्द्र और बलदेवजी नन्दरायके पास आकर मिले और यह वचन बोले ॥ २० ॥ हे पिता ! तुम स्नेहियोंने हमारा पोषण किया, बहुत लाड़ प्यार किया अधिक क्या कहें, माता पिताकी अपने पुत्रोंमें अधिक प्रीति होती है, सो

तुमने उनसे भी अधिक प्रीति की॥ २१ ॥ वही पिता है, वही माता है, जो पराये पुत्रको अपने पुत्रके समान पोषण करे और पोषण करनेमें जिनका सामर्थ्य न हुआ ऐसे हमारे माता पिताने हमको बालकपनसे ही छोड़ दिया ॥ २२ ॥ हे पिता ! अब तुम ब्रजको जाओ, हम भी बन्धु बांधवोंका प्रिय करके स्नेहसे दुःखी जातिवाले और तुम्हारे देखनेको पीछेसे आवेंगे ॥ २३ ॥ इस प्रकार अच्युत भगवान् श्रीकृष्ण चन्द्रने ब्रजवासियोंसहित नन्दरायजीको समझाकर और अनेक भांतिके वस्त्र आभूषण तथा सोने, चांदीके वर्त्तन देकर बड़े आदरपूर्वक उनका पूजन किया ॥ २४ ॥ इस प्रकार भगवान् श्रीकृष्णका वचन सुन नन्दरायजी कृष्ण बलदेवको छातीसे लगा, प्रेमसे व्याकुल

स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून् बन्धुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ २२ ॥ यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन् द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ २३ ॥ एवं सान्त्वय्य भगवान् नन्दं सव्रजमच्युतः ॥ वासोऽलंकारकुप्याद्यैरर्हयामास सादरम् ॥ २४ ॥ इत्युक्तस्तौ परिष्वज्य नन्दः प्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥२५॥ अथ शूरसुतो राजन् पुत्रयोः समकारयत् ॥ पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिम् ॥२६॥ तेभ्योऽदाद्दक्षिणा गावो रुक्ममालाः स्वलंकृताः ॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौम मालिनीः ॥ २७ ॥ या कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ॥ ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ २८ ॥ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ॥ गर्गाद्यदुकुलाचार्याद् गायत्रं व्रतमास्थितौ ॥ २९ ॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ॥ नान्यसिद्धामलज्ञानं गूहमानौ नरेहितैः ॥ ३० ॥

हो, नेत्रोंमें आंसू भर, सम्पूर्ण ब्रजवासियोंको सङ्ग ले ब्रजको चले ॥ २५ ॥ इसके उपरांत हे राजन् ! शूरसेनके पुत्र वसुदेवजीने ब्राह्मण पुरोहितको बुलाकर पुत्रोंका यथायोग्य द्विजन्मा संस्कार कराया ॥२६॥ फिर श्रृंगार की हुई रेशमी झूल व सुवर्णकी माला पहने अनेक गायें बछड़ों सहित ब्राह्मणोंको दान कीं ॥ २७ ॥ अत्यन्त बुद्धिमान् वसुदेवजीने राम कृष्णके जन्म नक्षत्रके समय जिन गायोंका मनमें संकल्प किया था और कंसने अधर्मसे हर ली थीं उतनी ही गौ स्मरण करके ब्राह्मणोंको दान कीं ॥ २८ ॥ और सुव्रती कृष्ण बलदेव द्विजन्मा संस्कार पाकर यदुकुलके पुरोहित गर्गाचार्यसे गायत्रीका उपदेश ले ब्रह्मचर्य व्रतमें रहने लगे ॥ २९ ॥ यद्यपि

सम्पूर्ण विद्या जाननेवाले सर्वज्ञ अर्थात् सब बातके जाननेवाले कृष्ण बलदेव सब जगत्के ईश्वर थे परन्तु तो भी स्वतःसिद्ध निर्मल ज्ञानको मनुष्योंके समान चेष्टा करनेके कारण गुप्त रखते थे ॥ ३० ॥ इसके उपरांत कृष्ण बलदेव गुरुकुलमें वास करनेकी इच्छासे कश्यप गोत्री उज्जैनपुरीके वासी सांदीपनि गुरुके पास गये, जो प्रकाश्य नामसे भी प्रसिद्ध थे ॥ ३१ ॥ जितेंद्रिय कृष्ण बलदेव भले प्रकार गुरुके पास आकर बड़े आदर सत्कारसे भक्तिपूर्वक जैसे नारायणकी सेवा करते हैं, उसी प्रकार गुरुकी सेवा करने लगे ॥ ३२ ॥ शुद्ध भक्तिपूर्वक सेवासे सन्तुष्ट हुए द्विजन्माओंमें श्रेष्ठ गुरुजीने श्रीकृष्ण बलदेवको शिक्षादिक छः अंग और उपनिषदोंसहित समस्त वेद पढ़ाये ॥ ३३ ॥ तथा मन्त्र

अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः ॥ काश्यं सान्दीपनिं नाम ह्यवन्तिपुरवासिनम् ॥ ३१ ॥ यथोपसाद्य तौ दान्तौ गुरौ वृत्तिमनिन्दिताम् ॥ ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ॥ प्रोवाच वेदानखिलान् सांगोपनिषदो गुरुः ॥ ३३ ॥ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ॥ तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥ ३४ ॥ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ॥ सकृन्निगदमात्रेण तौ सञ्जगृहतुर्नृप ॥ ३५ ॥ अहोरात्रैश्चतुष्षष्ट्या संयत्तौ तावतीः कलाः ॥ गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप ॥ ३६ ॥ द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिम् ॥ संमन्त्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयां बभूव ह ॥ ३७ ॥

और देवताके ज्ञानसहित शस्त्र चलाना, धनुर्वेद और धर्मशास्त्र, राजनीति, मीमांसादिक, तर्कविद्या तथा शत्रुसे मिलाप करना, युद्ध करना, उसके ऊपर चढ़ जाना, निकट जाकर रहना, अपनी ओर तोड़ लेना, मेल करना यह छः प्रकारकी राजनीति पढ़ायीं ॥ ३४ ॥ हे राजन् ! सब मनुष्योंमें तथा उत्तमोंमें उत्तम सब विद्याओंके चलानेवाले सावधान कृष्ण बलदेवने गुरुके विना बताये ही सम्पूर्ण विद्या सीख ली ॥ ३५ ॥ चौंसठ रात्रियोंमें गाना, बजाना, नृत्य करना आदि चौंसठ कला सीखीं । हे राजन् ! जब विद्या पढ़ चुके तब कृष्ण बलदेव दोनों भाई गुरुजीसे "गुरुदक्षिणाकी आज्ञा करो" इस प्रकार कहने लगे ॥ ३६ ॥ तब सांदीपनिने कृष्ण बलदेवकी अद्भुत महिमा देख, कि

मनुष्योंमें ऐसी चमत्कारी कहां ? स्त्रीसे परामर्श कर प्रभासक्षेत्रके समुद्रमें डूबकर जो पुत्र मर गये थे, सो स्त्रीके कहनेसे उनको ही मांगा ॥ ३७ ॥ " तथास्तु " इस प्रकार कह अत्यन्त पराक्रमी, बड़े रथी कृष्ण बलदेव रथमें बैठ प्रभासक्षेत्रमें पहुँच समुद्रके किनारे जाकर एक क्षण बैठ रहे, तब समुद्र कृष्ण बलदेवको आया जान उनकी पूजा लेकर आया ॥ ३८ ॥ तब भगवान् श्रीकृष्णचन्द्र उस समुद्रसे कहने लगे कि जो हमारे गुरुके बालक तूने यहां बड़ी लहरोंसे डुबा लिये हैं, वे गुरुके पुत्र लादे ॥ ३९ ॥ तब समुद्र बोला कि हे देव ! मैंने तो तुम्हारे गुरुके पुत्र नहीं डुबाये, वरन् मेरे भीतर रहनेवाला शत्रुरूप धारण किये एक बड़ा दैत्य है ॥

तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ ॥ वेलामुपव्रज्य निषीदतुः क्षणं सिन्धुर्विदित्वाऽर्हणमाहरत्तयोः ॥ ३८ ॥ तमाह भगवानाशु गुरुपुत्रः प्रदीयताम् ॥ योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥ समुद्र उवाच ॥ नैवाहार्षमहं देव दैत्यः पञ्चजनो महान् ॥ अन्तर्जलचरः कृष्ण शंखरूपधरोऽसुरः ॥४०॥ आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः ॥ जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकम् ॥ ४१ ॥ तदङ्गप्रभवं शंखमादाय रथमागमत् ॥ ततः संयमिनीं नाम यमस्य दयितां पुरीम् ॥ ४२ ॥ गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ॥ शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ॥ ४३ ॥ तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहिताम् ॥ उवाचावनतः कृष्णं सर्वभूताशयालयम् ॥ लीला मनुष्य हे विष्णो युवयोः करवाम किम् ॥ ४४ ॥

॥ ४० वह हर ले गया है और निश्चय उसके पास है । यह सुनते ही भगवान् श्रीकृष्णचन्द्रने अत्यन्त शीघ्रतासे जलमें घुस पञ्चजन दैत्यको मार डाला, परन्तु उसके पेटमें बालक नहीं देखा ॥ ४१ ॥ इसके उपरांत उस दैत्यके अंगमेंसे शङ्ख ले श्रीकृष्णचन्द्र रथपर आये और वहांसे यमराजकी अति प्यारी संयमनीपुरीमें आये ॥ ४२ ॥ और वहां जाकर बलदेवजीसहित भगवान् श्रीकृष्णचन्द्रने शङ्ख बजाया, तब प्रजाका दण्ड देनेवाला धर्मराज शङ्खका शब्द सुन ॥ ४३ ॥ कृष्ण बलदेवकी भक्तिपूर्वक पूजा करने लगा और सब प्राणियोंके हृदयमें विराजमान भगवान् श्रीकृष्णचन्द्रजीसे हाथ जोड़कर बोला कि हे विष्णु भगवन् ! लीलापूर्वक आपने मनुष्यका रूप

धारण किया है, सो तुम्हारी क्या सेवा करूँ ? ॥ ४४ ॥ तब श्रीभगवान् बोले कि हे महाराज ! यहां जो आप गुरुपुत्र ले आये हैं सो ला दीजिये । तब यमराजने कहा कि वह अपने कर्मोंसे बँधे पड़े हैं, कैसे लाऊँ ? तब श्रीकृष्णचन्द्र बोले कि उन्हें मेरी आज्ञा हुई है कुछ मेरी आज्ञासे कर्म बलवान् नहीं है ॥ ४५ ॥ तब 'जो आज्ञा' ऐसा कहकर यमराजने गुरुपुत्र ला दिये; इसके पीछे यादवोंमें उत्तम श्रीकृष्ण बलदेव उन्हें ले अपने गुरुको देकर बोले कि और वर मांगो ॥४६॥ तब गुरु कहने लगे कि हे पुत्र ! तुमने गुरुसेवा भलीभांति की और तुम सरीखों का जब मैं गुरु हुआ तब मेरे कौन बातकी चाहना शेष रही ? ॥४७॥ हे वीर ! अब तुम अपने घरको जाओ, इस लोक और

श्रीभगवानुवाच ॥ गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम् ॥ आनयस्व महाराज मच्छासनपुरस्कृतः ॥ ४५ ॥ तथेति तेनोपनीतं गुरुपुत्रं यदूत्तमौ ॥ दत्त्वास्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४६ ॥ सम्यक् संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः ॥ को नु युष्मद्विधगुरोः कामानामवशिष्यते ॥४७॥ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ छन्दांस्ययया तयामानि भवन्त्विह परत्र च ॥ ४८ ॥ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ॥ आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ॥ ४९ ॥ समनन्दन्प्रजा सर्वा दृष्ट्वा रामजनार्दनौ ॥ अपश्यन्त्यो बह्वहानि नेष्टलब्धधना इव ॥ ५० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे नन्दादिसान्त्वनोग्रसेनाभिषेकगुरुकुलवासगुरुपुत्रानयनं नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ श्रीशुक उवाच ॥ वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥

परलोकमें तुम्हारी पवित्र कीर्ति हो, तुम्हारे वेद नवीन पढ़े हुएके समान बने रहें ॥४८॥ हे नृप श्रेष्ठ परीक्षित् ! इस प्रकार गुरुसे आज्ञा पाकर भगवान् श्रीकृष्णचन्द्र और बलदेव दोनों भाई पवनके समान शीघ्रगामी मेघके तुल्य गर्जनेवाले रथमें बैठ अपने घरको आये ॥ ४९ ॥ बहुत दिनोंसे नहीं देखनेके कारण राम कृष्णका दर्शन कर प्रजा बड़े आनन्दको प्राप्त हुई, जैसे गया हुआ धन मिलनेसे आनन्द होता है ॥५०॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे भाषाटीकायां गुरुपुत्रानयनं नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ दोहा—छियालीस अध्यायमें उद्धव ब्रजहि पठाय । शोक यशोदा नन्दको, मेटो ज्ञान सिखाय ॥ श्रीशुकदेवजी बोले कि हे राजा परीक्षित ! यादवोंमें श्रेष्ठ

श्रीकृष्णके प्रिय मन्त्री सखा अर्थात बृहस्पतिके शिष्य बुद्धिमानोंमें श्रेष्ठ जो उद्धवजी थे ॥ १ ॥ उन्हें शरणागतोंका दुःख दूर करनेवाले भगवान् श्रीकृष्णचन्द्रने एकांतमें बुला हाथ पकड़कर कहा ॥ २ ॥ हे उद्धव हे साधु ! तुम व्रजको जाओ, हमारे माता पिताको प्रसन्न करो और गोपियोंको जो मेरे बिछुड़नेमें कष्ट हुआ है सो उसे मेरा सन्देशा ले जाकर दूर करो ॥ ३ ॥ मुझमें जिनके मन और प्राण लग रहे हैं, मेरे लिये पति पुत्रादिक त्याग दिये हैं, मैं ही प्यारा जिनके आत्मा हूँ सो मुझमें मन लगाकर रहती हैं, मेरे लिये जिन्होंने इस

तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित् ॥ गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह ॥ गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय ॥ ३ ॥ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ॥ ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहम् ॥ ४ ॥ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥ स्मरन्त्योऽङ्ग विमुह्यन्ति विरहोत्कण्ठ्यविह्वलाः ॥ ५ ॥ धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथंचन ॥ प्रत्यागमन संदेशैर्बल्लव्यो मे मदात्मिकाः ॥ ६ ॥

लोक तथा परलोकके जितने सुखके उपाय हैं, सब त्याग दिये हैं, सो उनको मैं सुख देता हूँ ॥ ४ ॥ हे उद्धव ! उनका प्यारा मैं जबसे दूर आया तबसे वह गोकुलकी स्त्रियें मेरी सुधि करके बिरहसे मेरी चाहके कारण विवश हो मोहित हो जाती हैं * ॥ ५ ॥ क्योंकि जब मैंने उनसे कह दिया था कि मैं शीघ्र ही आऊँगा, इस कारणसे उसी प्रकार वे गोपियें प्राण धारण किये रहीं सो भी महाकष्टसे, यदि उनका

* शंका—व्रजसे गोकुलसे मथुरापुरीका चार कोशका अन्तर है और मथुरासे व्रज भी चारही कोश है, परन्तु व्रजको श्रीकृष्ण कभी नहीं गये और गोपी भी मथुराको कभी नहीं गई गोपियें दही, छांछ, माखन बेचनेको भी मथुरा पुरीको कभी नहीं गई। छाछ बेचनेको आती तो भी मोहन प्यारेकी मुलाकात हो जाती, हे स्वामिन् ! परस्पर मित्रसे मिलनेके लिये स्त्री या पुरुष हजारों कोश चले जाते हैं और कृष्ण और गोपियोंकी ऐसी परम मित्रता थी फिर चार कोशके अन्तर मिल भेंटें क्यों नहीं ? इसका क्या कारण ! इधर तो कृष्णके मनमें मोहकी ज्वाला भड़क रही थी और उधर गोपियोंके हृदय में मोहकी ज्वाला भड़क रही थी फिर क्या कारण जो कोई न तो मथुरासे गया, न कोई गोकुलसे आया ! यह बड़ा सन्देह है ?

उत्तर—श्रीकृष्ण लोकनिन्दासे डरे। व्रजमें जो लीला हमने करी तब हम बालक थे। अब हमारी युवा अवस्था हुई जो गोपी व्रजसे हमारे पास आवेंगी अथवा व्रजको हम जायंगे तो पहिले के समान चरित्र मथुरामें तथा व्रजमें करने पड़ेंगे और वह चरित्र हम यहां करें तो संसार में निंदा होगी, इस बातका डर करके मायासे गोपियोंको मोहित कर दिया। जब गोपी मोहको प्राप्त हो गईं तो मनही मनमें विना कृष्ण प्यारेके मनमें परिताप तो किया पर मथुराकी ओरको पांव न रक्खा और भगवान् लोकलाजसे गोकुलको नहीं गये ।

आत्मा उनके शरीरमें रहता तो दग्ध हो जाता, वह तो मुझमें लीन है इसी लिये वह प्राण धारण कर रही है ॥ ६ ॥ श्रीशुकदेवजी बोले कि हे राजन्! इस प्रकार जब भगवान् श्रीकृष्णचन्द्रने कहा तब उद्धवजी बड़े आदरपूर्वक स्वामीके सन्देशेको ले रथमें बैठ नन्दरायजीके गोकुल को चले ॥ ७ ॥ और सूर्यके छिपते ही शोभायमान नन्दरायजीके गोकुलमें पहुँचे, तब सन्ध्या समय आती हुई गायोंके खुरोंकी रेणुसे उद्धवजीका रथ ढक गया ॥ ८ ॥ पुष्पवती गायोंके लिये चारों ओरसे मतवाले बैलोंके युद्धका शब्द वहां हो रहा था और ऐनोंके भारसे व्यायी हुई गायें दौड़ दौड़कर अपने बछड़ोंके पास आती थीं ॥ ९ ॥ जहां तहां सफेद गायें, गायोंके बछड़े कूदते फांदते फिरते हैं, गायोंके दुहनेका शब्द जहां तहां हो रहा है, कोई कहता था "लाओ" कोई कहता था "देओ" ऐसा कोलाहल जहां तहां मच रहा

श्रीशुक उवाच ॥ इत्युक्त उद्धवो राजन् संदेशं भर्तुराहृतः ॥ आदाय रथमारुह्य प्रययौ नन्दगोकुलम् ॥ ७ ॥ प्राप्तो नन्दव्रजं श्रीमान् निम्लोचति विभावसौ ॥ छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ८ ॥ वासितार्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः ॥ धावन्तीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ॥ ९ ॥ इतस्ततो विलङ्घद्भिर्गोवत्सैर्मण्डितं सितैः ॥ गोदोहशब्दाभिरवं वेणूनां निस्स्वनेन च ॥ १० ॥ गायन्तीभिश्च कर्माणि शुभानि बलकृष्णयोः ॥ स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितम् ॥ ११ ॥ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ॥ धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ॥ १२ ॥ सर्वतः पुष्पितवनं द्विजालिकुलनादितम् ॥ हंसकारण्डवाकीर्णैः पद्मखण्डैश्च मंण्डितम् ॥ १३ ॥ तमागतं समागम्य कृष्णस्यानुचरं प्रियम् ॥ नन्दः प्रीतः परिष्वज्य वासुदेवधियाऽर्चयत् ॥ १४ ॥

था और बांसुरी बजानेका भी शोर हो रहा था ॥ १० ॥ भगवान् श्रीकृष्णचन्द्र और बलदेवजीके मंगलरूप कर्मोंको बनी ठनी गोपियें गाती हुई अत्यन्त शोभायमान लगती थीं ॥ ११ ॥ अग्नि, सूर्य, अभ्यागत, गौ, ब्राह्मण, पितर, देवता इनके पूजनकी सामग्री जहां तहां धरी थी, धूप हो रही थी, दीपक जल रहे थे, फूल धरे थे, गोपोंके घरोंमें पूजा होनेसे यह व्रज मनोहर हो रहा था ॥ १२ ॥ सब ओरसे फुलवारी फूल रही थी, पक्षी बोल रहे थे, भौंरे गुञ्जार रहे थे, राजहंस और कारण्डव पक्षी जहां तहां बैठे थे, ऐसे कमलोंके समूहसे वह व्रज शोभायमान हो रहा था ॥ १३ ॥ श्रीकृष्णचन्द्रके प्रिय मित्र उद्धवजीको आया जान नन्दरायजी अत्यन्त प्रसन्नतापूर्वक

मिले और श्रीकृष्णचन्द्रके पाससे आये हैं यह जानकर ईश्वरबुद्धिसे पूजन किया ॥ १४ ॥ इसके उपरांत अत्यन्त श्रेष्ठ सामग्रियोंका भोजन कराके शय्यापर सुखपूर्वक पौढ़ाय चरण दाब मार्गका खेद मिटाय उद्धवजीसे नन्दरायजी बोले ॥ १५ ॥ हे बड़भागी उद्धव ! कहो शूरसेनके पुत्र, हमारे सखा वसुदेवजी पुत्रोंसहित कुशलपूर्वक हैं ? कंसके बन्दीखानेसे छूटे हैं ? भाई बन्धु हितकारियोंसहित प्रसन्न हैं ? ॥ १६ ॥ और पापी कंस समस्त सेवकोंसहित मारा गया यह बड़ा ही मङ्गल हुआ, क्योंकि वह कंस धर्म स्वभाववाले यादवोंसे सदा वैर करता था ॥ १७ ॥ हे उद्धवजी ! और यह भी कहो कि वे कृष्ण भी कभी हमारी और अपनी माताकी सुधि करते हैं तथा सुहृद्, सखा,

भोजितं परमान्नेन संविष्टं कशिपौ सुखम् ॥ गतश्रमं पर्यपृच्छत् पादसंवाहनादिभिः ॥१५॥ कच्चिदंग महाभाग सखा नः शूरनंदनः ॥ आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥१६॥ दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना॥ साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा ॥ १७ ॥ अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ॥ गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिम् ॥१८॥ अप्यायास्यति गोविन्दः स्वजनान् सकृदीक्षितुम ॥ तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणम् ॥ १९ ॥ दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः ॥ दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥२०॥ स्मरतां कृष्णवीर्याणि लीलापाङ्गनिरीक्षितम् ॥ हसितं भाषितं चाङ्ग सर्वा नः शिथिलाः क्रियाः॥२१॥सरिच्छैलवनोद्देशान् मुकुन्दपदभूषितान् ॥ आक्रीडानीक्षमाणानां मनो याति तदात्मताम् ॥ २२ ॥

एवं गोपियोंकी सुध करते हैं और जिसके आप ही रक्षक हैं ऐसे ब्रजकी भी कभी सुध करते हैं ? और गौ, ब्राह्मण, गोवर्द्धनपर्वतकी भी कभी सुध करते हैं ? ॥ १८ ॥ गायोंके हित करनेवाले श्रीकृष्ण जब कभी अपने भाई बन्धुके देखनेके लिये आवेंगे तब सुन्दर नासिका सुन्दर मुस्कान चितवनयुक्त उनके मुखका दर्शन करेंगे ॥१९॥ दावाग्निसे, पवनसे, इन्द्रकी वर्षासे, विषयुक्त सर्पसे, अघासुरसे एवं बड़े बड़े मृत्युओंसे महात्मा श्रीकृष्णचन्द्रने हमारी रक्षा की ॥ २० ॥ हे उद्धवजी ! भगवान् श्रीकृष्णचन्द्रके पराक्रम और लीलापूर्वक कटाक्षभरी चितवन, हँसन और बोलने की सुध करते हैं, तब हमारी सम्पूर्ण क्रिया शिथिल हो जाती हैं ॥२१॥ मुकुन्दके चरणोंके चिह्नयुक्त पर्वत, नदी, वन और

उनके खेलनेके स्थानोंको जब देखते हैं तब हमारा मन कृष्णमय हो जाता है ॥ २२ ॥ देवताओंका कार्य करनेके लिये इस संसारमें कृष्ण अवतार लेकर आये हैं, उन्हें मैं देवताओंमें उत्तम मानता हूँ और मैंने बड़ा गम्भीर गर्गाचार्यका वचन भी ऐसे ही सुना है ॥२३॥ दश हजार हाथियोंका बल रखनेवाले कंस और मल्लोंको वैसे ही कुवलयापीड हाथीको सिंह जैसे पशुओंको मारता है, उसी प्रकार भगवान् श्रीकृष्णचन्द्रने लीलापूर्वक ही मार डाला ॥ २४ ॥ फिर बड़ा भारी तीन तालके समान धनुष एक हाथसे उठाकर जैसे हाथी लठियाको तोड़ डालता है उसी प्रकार तोड़ डाला और सात दिनतक गोवर्द्धन पर्वतको बायें हाथकी अँगुलीपर धारण किया ॥ २५ ॥ प्रलम्बा-

मध्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा ॥ २३ ॥ कंसं नागायुतप्राणं मल्लौ गजपतिं तथा ॥ अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥ २४ ॥ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ॥ बभञ्जैकेन हस्तेन सप्ताहमदधाद्गिरिम् ॥ २५ ॥ प्रलम्बो धेनुकोऽरिष्टस्तृणावर्तो बकादयः ॥ दैत्याः सुरासुरजितो हता येनेह लीलया ॥ २६ ॥ श्रीशुक उवाच ॥ इति संस्मृत्य संस्मृत्य नन्दः कृष्णानुरक्तधीः ॥ अत्युत्कण्ठोऽभवत् तूष्णीं प्रेमप्रसरविह्वलः ॥ २७ ॥ यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ॥ शृण्वन्त्यश्रूण्यवास्राक्षीत् स्नेहस्नुतपयोधरा ॥ २८ ॥ तयोरित्थं भगवति कृष्णे नन्दयशोदयोः ॥ वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा ॥ २९ ॥ उद्धव उवाच ॥ युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ॥ ३० ॥

सुर, धेनुकासुर, तृणावर्त्त, बकासुर आदि और भी जो जो सुर असुरोंके जीतनेवाले दैत्य थे; उन्हें श्रीकृष्णचन्द्रने लीलापूर्वक ही मार डाले ॥ २६ ॥ श्रीशुकदेवजी बोले कि हे राजन् ! कृष्णमें प्रेमबुद्धिवाले नन्दरायजी इस प्रकार भगवान् श्रीकृष्णचन्द्रकी सुधि करके आंखोंमें आंसू भर गद्गदकण्ठ प्रेमके भावमें व्याकुल होकर चुप हो गये ॥ २७ ॥ यशोदाने जो ऐसे वर्णन किये जाते श्रीकृष्णके सुन्दर चरित्र श्रवण किये तो स्नेह स्तनोंमें दूध उमड़ आया और नेत्रोंसे आंसू बहने लगे ॥ २८ ॥ इस प्रकार नन्दराय और यशोदाका भगवान् श्रीकृष्णचन्द्रमें परम अनुराग देख उद्धवजी नन्दजीसे बोले ॥ २९ ॥ कि हे मान देनेवाले नन्दजी ! इस संसारमें देहधारि-

योंके मध्यमें निश्चय तुम प्रशंसाके योग्य हो, क्योंकि जो सबके गुरू नारायण हैं, उनमें ऐसी बुद्धि लगायी है ॥३०॥ यह जो कृष्ण बलदेव हैं सो विश्वके लिये उपादान कारण हैं; इसीसे पुरुष प्रकृतिरूप हैं, सब प्राणियोंमें प्रवेश करके अनेक प्राणियोंके अनेक प्रकारके ज्ञानके साक्षी और अनादि हैं ॥ ३१ ॥ प्राण छूटते समय यह पुरुष क्षणभर शुद्ध मनको जिन भगवान् श्रीकृष्णचन्द्रमें लगा शीघ्र ही कर्मोंकी वासनाओंको छोड़ सूर्यके समान प्रकाशवान ब्रह्मरूप होकर परमगतिको प्राप्त होता है ॥ ३२ ॥ जब सबके आत्मा कार्य और कारणसे मनुष्यरूप धरे परिपूर्ण नारायणमें अतिशय करके तुम भक्ति करते हो, तो फिर तुमको क्या करना शेष रहा ? ॥ ३३ ॥ अच्युत भग-

एतौ हि विश्वस्य च बीजयोनी रामो मुकुन्दः पुरुषः प्रधानम् ॥ अन्वीय भूतेषुः विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ॥ ३१ ॥ यस्मिञ्जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धम् ॥ निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ॥३२॥ तस्मिन् भवन्तावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ ॥ भावं विधत्तां नितरां महात्मन् किं वाऽवशिष्टं युवयोः सुकृत्यम् ॥ ३३ ॥ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ॥ प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः ॥३४॥ हत्वा कंसं रङ्गमध्ये प्रदीपं सर्वसात्वताम् ॥ यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ ३५ ॥ मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमन्तिके ॥ अन्तर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३६ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वाऽस्त्यमानिनः ॥ नोत्तमो नाधमो वाऽपि स मानस्यासमोऽपि वा ॥ ३७ ॥ न माता न पिता तस्य न भार्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥३८॥

वान् श्रीकृष्णचन्द्र शीघ्र ही व्रजको आवेंगे, क्योंकि वे भक्तोंका पालन करनेवाले हैं इस लिये तुम्हें और यशोदाको वे थोड़े ही दिनोंमें आकर आनंद देंगे ॥३४॥ सब यादवोंके वैरी कंसको रंगभूमिमें मार तुम्हारे पास आकर श्रीकृष्णचन्द्रने जो वचन कहा था, उसे अवश्य सत्य करेंगे ॥३५॥ हे बड़भागियो ! अब तुम कुछ खेद मत करो, कृष्णको अपने पास ही देखोगे, क्योंकि जैसे लकड़ीमें ज्योति रहती है उसी प्रकार सब प्राणियोंके हृदयमें भगवान् श्रीकृष्णचन्द्र रहते हैं ॥३६॥ श्रीकृष्णचन्द्रको न कोई प्यारा है, न कोई कुप्यारा है, न कोई उत्तम है, न कोई अधम है, न कोई समान है, न विषम है और न उन्हें अभिमान है किन्तु वे तो समदृष्टि हैं ॥३७॥ न उनके माता है, न पिता है, न स्त्री है,

भा. द. पू. न पुत्रादिक हैं; न उनके देह हैं और उनका जन्म भी नहीं है ॥३८॥ इन भगवान् श्रीकृष्णचन्द्रके कर्म भी नहीं हैं, क्योंकि वह तो संसा-
॥१६६॥ रमें देव, मनुष्य, नृसिंहादिकोंकी जो जोनि हैं, उनमें खेलनेके लिये और साधु पुरुषोंकी रक्षा करनेके लिये प्रकट होते हैं॥ ३९ ॥ निर्गुण भगवान् सत्त्वगुण, रजोगुण, तमोगुण इन तीन मायाके गुणोंको अंगीकार करते हैं और निर्गुणसे अलग अजन्मा भगवान् क्रीड़ा करके विश्व को उत्पन्न, पालन तथा संहार करते हैं ॥ ४० ॥ जैसे बालक चाईं माईं खेलता फिरता है तब उसकी दृष्टि फिरती है और उससे पृथ्वी फिरती सी दिखलाई देती हैं इसी प्रकार चित्त जो कर्त्ता है उनमें अहंकारसे आत्मा भी कर्त्तासा दिखाई देता है ॥४१॥ यह भगवान् श्रीकृष्ण-

य एतां प्रातरुत्थाय कृष्णस्य पदवीं पराम् ॥ प्रयतः कीर्त्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमाम् ॥ १४ ॥ दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः ॥ पतित्वा चरणावस्रैर्न्यषिञ्चत्कृष्णविच्युतः ॥ १५ ॥ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप ॥ तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्च्छिताः ॥ १६ ॥ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः ॥ व्यसवः शेरते यत्र ज्ञातयो घ्नन्त आननम् ॥ १७ ॥ देवकी रोहिणी चैव वसुदेवस्तथा सुतौ ॥ कृष्णरामावपश्यन्तः शोकार्ता विजहुः स्मृतिम् ॥ १८ ॥ प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः ॥ उपगुह्य पतींस्तात चितामारुरुहुः स्त्रियः ॥ १९ ॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ॥ वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः ॥ कृष्णपत्न्योऽविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ २० ॥

थे ॥१७॥ देवकी, रोहिणी और वसुदेव, श्रीकृष्ण और बलदेव अपने पुत्रोंके विना देखे शोकसे आतुर हो बेसुध हो गये ॥ १८ ॥ और भगवान् श्रीकृष्णचन्द्रके वियोगसे अत्यन्त आतुर हो वहां ही प्राण छोड़ दिये और, अपनी अपनी पत्नियोंसे मिलकर स्त्रियां चितामें प्रवेश कर गयीं ॥ १९ ॥ बलदेवजीकी स्त्री बलदेवजीके देहको आलिंगन कर चितामें प्रवेश कर गयी और वसुदेवकी स्त्री वसुदेवसे, श्रीकृष्णकी पुत्रवधू प्रद्युम्न आदि अपने अपने पतियोंसे मिलकर, रुक्मिणी आदि श्रीकृष्णकी स्त्री श्रीकृष्णमय हो अग्निमें प्रवेश कर गयीं ॥ २० ॥

अर्जुनने अपने परमप्रिय सखा श्रीकृष्णचन्द्रके विरहसे आतुर होनेपर भी सच्ची सुक्ति देनेवाले भगवान्‌के वचनोंका स्मरण करके उसने अपने आत्माको सांत्वना दी ॥ २१ ॥ जिनकी सम्पत्ति नाशको प्राप्त हुइ, और आप भी नाशको प्राप्त हुए, उन बांधवोंका अर्जुनने पिंडदान, तर्पण आदि कार्य विधिपूर्वक क्रमसे किया ॥२२॥ हे महाराज परीक्षित् ! इसके उपरान्त श्रीयुत भगवान श्रीकृष्णचन्द्रके मंदिरको छोड़ कर श्रीकृष्णचन्द्रसे त्यागी सम्पूर्ण द्वारकाको समुद्रने क्षणभरमें डुबा दिया ॥ २३ ॥ मंदिर बचानेका कारण यह है कि भगवान् मधुसूदन

अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः ॥ आत्मानं सान्त्वयामास कृष्णगीतैः सदुक्तिभिः ॥ २१ ॥ बन्धूनां नष्टगोत्राणामर्जुनः सांपरायिकम् ॥ हतानां कारयामास यथावदनुपूर्वशः ॥ २२ ॥ द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् ॥ वर्जयित्वा महाराज श्रीमद्भागवदालयम् ॥ २३ ॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलम् ॥ २४ ॥ स्त्रीबालवृद्धानादाय हतशेषान् धनञ्जयः ॥ इन्द्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् ॥२५॥ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः ॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथम् ॥ २६ ॥ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥ कीर्त्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २७ ॥

वहां नित्य विराजते हैं और वह मंदिर कैसा है कि जिसका स्मरणमात्र करनेसे ही सम्पूर्ण अमङ्गल नाशको प्राप्त हो जाते हैं ॥ २४ ॥ मरनेसे बचे हुए स्त्री, बालक, वृद्धको अर्जुनने लेकर इंद्रप्रस्थमें प्रवेश कराकर वहां वज्रनामको अभिषेक किया ॥ २५ ॥ इतनी कथा कह श्रीशुकदेवजी बोले कि हे परमभागवत परीक्षित् ! तुम्हारे पितामह पांडव अर्जुनके मुखसे सुहृदोंका वध सुनकर तुमको वंशधारी समझ महाप्रस्थको चले गये ॥ २६ ॥ जो मनुष्य श्रद्धासहित देवदेव भगवान् विष्णुके जन्म और कर्मोंको सुनेंगे अथवा कहेंगे वे सम्पूर्ण पापोंसे

छूट जायँगे ॥ २७ ॥ इस प्रकार इस ग्रन्थमें और दूसरे ग्रन्थोंमें वर्णन किये हुये परममंगल भगवान् वासुदेवके सुन्दर अवतारोंके चरित्र जो मनुष्य कहेंगे वे परमहंसोंके शरणदायक भगवान् श्रीकृष्णचन्द्रमें परमभक्तिको प्राप्त होंगे * ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे

इत्थं हरेर्भगवतो रुचि रावतारवीर्याणि बालचरितानि च शन्तमानि ॥ अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत् ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे भगवदन्तर्द्धानं नामैकत्रिंशत्तमोऽध्यायः ॥३१॥ समाप्तोऽयमेकादशः स्कन्धः ॥

अष्टादशसाहस्र्यां संहितायामेकादशस्कन्धे भाषाटीकायां श्रीकृष्णपरिवारनिर्यापणं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ छ ॥

---

* भजन–जनप्रतिपाल दयाल दयानिधि क्यों चितवत नहि ओर हमारी । कीजे कृपा जान जन हमपर हे ब्रजेश गोपाल मुरारी । जबसे सत शिक्षा हम त्यागी । बुधिबल आरु सुख संपति भागी । पीछे विपति अविद्या लागी । निशिदिन देत रहत सुध भारी ॥१॥ कुमति कलह घट घटमें छाई । शुभगण सुमति समूल नसाई । करत परस्पर द्वेष बुराई । हानि लाभ नहिं तनक विचारी ॥२॥ हम सब तुम्हरी ओर निहारें । त्राहि-त्राहि दिन रात पुकारें । तुम विन काको जाय जुहारें । ऐसो को भक्तन हितकारी ॥३॥ वेग जननकी ओर निहारो । कलह कुमतिकी मूल उखारो । दारिद दुर्गुण दुर्ग उदारो । दुष्टदलन दीनन दुखहारी ॥४॥ नाथ विनय मम स्वीकृत कीजै । विद्यादान दया कर दीजै । चरण शरण में हमको लीजै । लाग रही दृढ़ आश तुम्हारी ।

॥ इति श्रीमद्भागवते भाषाटीकायुते एकादशस्कन्धः समाप्तः ॥

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.

॥ अथ श्रीमद्भागवते भाषाटीकायुते द्वादशस्कन्धप्रारंभः ॥

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.

द्वादशस्कंधः

शुकः
परीक्षितः
शिष्यसमुदायः
श्रीव्यासः
परीक्षितः
ऋषिः
कश्यपः
तक्षकः
श्रीव्यासः
नरनारायण.
मार्कंडेय.
बालमुकुंद
श्रीधरस्वामीः

श्रीगणेशाय नमः । दोहा—आदि ब्रह्म अद्वैत अज, अविनाशी अविकार । श्रीमुकुन्द गोविन्दपद, भज मन वारंवार ॥ कवित्त—काहूको सहारो है भवानी राजरानीजूको, काहूको सहारो नीको गिरजाके प्यारेको । काहूको सहारो पुनि काली विकरालीजूको, काहूको सहारो भूतनाथ बैलवारेको ॥ काहूको सहारो भलो भैरो हनुमानजीको, काहूको सहारो नीको पूर्ण नाथद्वारेको । जाने गिरिधारो औ उबारो ब्रज शालिग्राम, मोहिं तो सहारो वाहि नन्दके दुलारेको ॥१॥ काहूकी है उमा रमा शारदामें बड़ी प्रीति, काहूको भवानी और लक्ष्मीमें मन है । काहूको गणेश और महेशमाहिं लागो चित्त, काहूको तो इष्टदेव पानी रूप पवन है ॥ काहूको है ध्यान हनुमान और भैरवको, काहूको सुपूज्य शम्भुपुत्र गजानन है। शालिग्राम काहूको राम—नाम अमरमूल, मेरे तो केवल एक राधिका ही धन हैं ॥ सोरठा—जय ब्रज चन्द मुकुन्द, आनन्द—निधि ऋषि—सिद्धिभवन । जय वृन्दावन चन्द, नन्दसुवन त्रिभुवनपति ॥ दोहा—अहै प्रथम अध्यायमें, भावी

ॐ श्रीकृष्णाय नमः ॥ राजोवाच ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥ कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥ १ ॥ श्रीशुक उवाच ॥ योऽन्त्यः पुरंजयो नाम भाव्यो बार्हद्रथो नृप ॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजम् ॥ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः ॥ २ ॥ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ नन्दिवर्धनस्तत्पुत्रः पञ्च प्रद्योतना इमे ॥ ३ ॥ अष्टत्रिंशोत्तरशतं भोक्ष्यन्ति पृथिवीं नृपाः ॥ शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः ॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥ ४ ॥

मागध वंश । धरा भोग करिहै सविधि, सो वर्णब विनशंस ॥१॥ राजा परीक्षित्ने पूछा कि हे मुने ! यदुकुलके भूषणरूप श्रीकृष्णचन्द्र आनन्दकन्द जब अपने परमधामको चले गये तब पृथ्वीपर आगेको किसका वंश चला ? यह मुझको समझाकर कहो ॥ १ ॥ श्रीशुकदेवजी बोले कि हे राजन् ! बृहद्रथके कुलके अन्तमें पुरंजय नाम राजा होगा, जिसका वर्णन प्रथम नवम स्कन्धमें आपको सुना चुका हूं । उसका मन्त्री शुनक पुरंजयको मारकर प्रद्योतनाम अपने पुत्रको राजसिंहासनपर बैठा लेगा, उसके पालक नामक पुत्र होगा ॥ २ ॥ उसके विशाखयूप नामक पुत्र होगा, उसके राजक नाम एक पुत्र होगा, राजकके नन्दिवर्द्धन नाम पुत्र होगा । पांच राजा प्रद्योतन नामसे प्रसिद्ध होंगे ॥ ३ ॥ और एक सौ अड़तीस (१३८) वर्ष तक पृथ्वीकी रक्षा करेंगे । उनके पीछे शिशुनाग नाम राजा होगा,

उसके पीछे काकवर्ण राजा होगा, काकवर्णके क्षत्रधर्मा नाम पुत्र होगा, उसके क्षेत्रज्ञ नाम पुत्र होगा ॥ ४ ॥ क्षेत्रज्ञके विधिसार नाम पुत्र उत्पन्न होगा, उसके अजात शत्रु नामक पुत्र होगा, उसके दर्भक नाम पुत्र होगा उसके अजय नाम पुत्र होगा ॥५॥ अजयके नन्दिवर्द्धन नाम पुत्र होगा, उसके महानन्द नाम पुत्र होगा। हे कुरुवंशभूषण ! यह शिशुनागादिवंशी दस राजा तीन सौ साठ (३६०) वर्षतक कलियुगमें राज्य भोग करेंगे हे महाराज ! महानन्दका पुत्र शूद्रीके गर्भसे बड़ा तेजस्वी और पराक्रमी ॥ ६ ॥ ७ ॥ महापद्म सेनाका पति, नन्दनाम क्षत्रियवंशका विध्वंस करनेवाला होगा, इस नन्दराजासे लेकर आगेको शूद्रके तुल्य अधर्मी राजा होंगे ॥ ८ ॥ सो-यह नन्द

विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥ ५ ॥ नन्दिवर्धन आजेयो महानन्दिः सुतस्ततः ॥ शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयम् ॥ ६ ॥ समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ महानन्दि सुतो राजञ्छूद्रीगर्भोद्भवो बली ॥ ७ ॥ महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् ॥ ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः ॥ ८ ॥ एकच्छत्रां स पृथिवीमनुल्लङ्घितशासनः ॥ शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥ ९ ॥ तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः ॥ य इमां भोक्ष्यन्ति महीं राजानः स्म शतं समाः ॥ १० ॥ नव नन्दान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यन्ति वै कलौ ॥ ११ ॥ स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥ तत्पुत्रो वारिसारस्तु ततश्चाशोकवर्धनः ॥ १२ ॥ सुयशा भविता तस्य सङ्गतः सुयशः सुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ १३ ॥

पृथ्वीपर एक महाछत्रधारी राजा होगा और कोई संसारमें उसकी आज्ञाको उल्लंघन न करेगा, मानो क्षत्रियोंका मानभङ्ग करनेमें दूसरा परशुराम होगा ॥९॥ उस नन्दराजाके सुमाल्यादिक आठ पुत्र होंगे, वे सब राजा होकर सौ १०० वर्षतक पृथ्वीकी रक्षा करेंगे ॥ १० ॥ अपने अनुगत उन नवों नन्दराजाओंको कोई एक चाणक्य नाम ब्राह्मण मारेगा, उनके मारणोपरांत कलियुगमें मौर्य नाम राजा पृथ्वीका राज्य करेगा ॥ ११ ॥ फिर वही नवनन्दका मारनेवाला चाणक्य नाम ब्राह्मण चन्द्रगुप्त मौर्यको राजसिंहासनपर बैठा लेगा, उस चन्द्रगुप्तके वारिसार नाम पुत्र होगा, उसके अशोकवर्द्धन नाम पुत्र होगा ॥ १२ ॥ अशोकवर्द्धनके सुयशा नाम पुत्र होगा, उसके संगत

नाम पुत्र होगा, संगतके शालिशूक नाम पुत्र होगा, उसके सोमशर्मा नाम पुत्र होगा ॥१३॥ सोमशर्माके शतधन्वा पुत्र होगा, उसके दूसरा वृहद्रथ पुत्र होगा। यह दश मौर्यवंशी राजा कलियुगमें एकसौ तैंतिस १३३ वर्षतक पृथ्वीपर आनन्द भोगेंगे। हे कौरवकुलमार्त्तण्ड ! इन सब मौर्योंमें पहले एकसे दश मौर्य होंगे, यह जानने योग्य बात है॥१४॥ (फिर मौर्य वंशके राजा वृहद्रथका सेनापति पुष्पमित्र जिसका दूसरा नाम शुङ्ग भी है वह अपने स्वामीको मारकर स्वयं सिंहासनपर बैठेगा) उसका पुत्र अग्निमित्र राजा होगा, उसका सुज्येष्ठ नाम पुत्र होगा, सुज्येष्ठका पुत्र वसुमित्र होगा, वसुमित्रके भद्रक नाम पुत्र होगा, भद्रकका पुत्र पुलिन्द होगा ॥१५॥ पुलिन्दका पुत्र घोष होगा, घोषका

शतधन्वा ततस्तस्य भविता तद्बृहद्रथः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरम् ॥ समा भोक्ष्यन्ति पृथिवीं कलौ कुरुकुलोद्वह ॥१४॥ (हत्वा बृहद्रथं मौर्यं तस्य सेनापतिः कलौ ॥ पुष्पमित्रस्तु शुंगाह्वः स्वयं राज्यं करिष्यति ॥) अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोऽथ भविष्यति ॥ वसुमित्रो भद्रकश्च पुलिन्दो भविता सुतः ॥१५॥ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ ततो भागवतस्तस्माद्देवभूतिरिति श्रुतः ॥१६॥ शुङ्गा दशैते भोक्ष्यन्ति भूमिं वर्षशताधिकम् ॥ ततः काण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप ॥ १७ ॥ शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥१८॥ नारायणस्य भविता सुशर्मा नाम विश्रुतः ॥ काण्वायना इमे भूमिं चत्वारिंशच्च पञ्च च ॥ शतानि त्रीणि भोक्ष्यन्ति वर्षाणां च कलौ युगे ॥१९॥

पुत्र बज्रमित्र होगा, बज्रमित्रका पुत्र भागवत होगा, भागवतका पुत्र देवभूत होगा ॥ १६ ॥ यह दश शुंगराजा कहाये जायँगे और दशों राजा एक सौ बारह ११२ वर्षतक पृथ्वीका राज्य करेंगे। हे कुरुकुलभूषण ! इन सबमें शुंगा नाम राजा पहले होगा। हे नरेन्द्र ! फिर यह भूमि अल्पगुणवाले कण्व नाम राजाओंके अधीन रहेगी ॥ १७ ॥ देवभूमि नाम शुंगाका मन्त्री बड़ा बुद्धिमान् वसुदेव नाम होगा, सो परस्त्रीगामी देवभूति शुङ्गाको मारकर आप ही राज्य करेगा, उसके भूमित्र पुत्र होगा, भूमित्रके नारायण नाम पुत्र होगा ॥ १८ ॥ नारायणके सुशर्मा नाम पुत्र होगा। यह कण्ववंशी चार राजा कलियुगमें तीनसौ पैंतालीस ३४५ वर्षतक पृथ्वीका राज्य करेंगे ॥ १९ ॥

भा० द्वा० ॥ २ ॥

सुशर्माका कोई चाकर महानीच शूद्र जाति असत्तम बली नाम कण्ववंशी सुशर्माको मारकर कुछ वर्षतक आप पृथ्वीका राज्य करेगा ॥ २० ॥ फिर उसके पीछे उस बलीनाम राजाका भ्राता कृष्णनाम पृथ्वीका पति होगा, श्रीशांतकर्ण नाम पुत्र होगा, श्रीशांतकर्णके पौर्णमास नाम पुत्र होगा ॥ २१ ॥ उसके लम्बोदर नाम पुत्र होगा, लम्बोदरका पुत्र विलक होगा, विलकके मेघस्वाति नाम पुत्र होगा, उसके अटमान नाम पुत्र होगा ॥२२॥ अटमानके अनिष्टकर्मा नाम पुत्र होगा, उसके हालेय नाम पुत्र होगा, हालेयके तलक नाम पुत्र होगा, तलकके पुरीषभीरु नाम पुत्र होगा, उसके सुनंदन नाम पुत्र होगा ॥२३॥ सुनंदनके चकोर नाम तनय होगा, चकोरके नवम, उसके शिव-

हत्वा कण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यन्ध्रजातीयः कंचित्कालमसत्तमः ॥ २० ॥ कृष्णनामाऽथ तद्भ्राता भविता पृथिवीपतिः ॥ श्रीशान्तकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥२१॥ लम्बोदरस्तु तत्पुत्रस्तस्माद्विलको नृपः ॥ मेघस्वातिश्च विलकादटमानस्तु तस्य च ॥ २२ ॥ अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनन्दनः ॥ २३ ॥ चकोरो नवमो यत्र शिवस्वातिररिन्दमः ॥ तस्यापि गोमती पुत्रः पुरीमान् भविता ततः ॥ २४ ॥ मेदः शिराः शिवस्कन्दो यज्ञश्रीस्तत्सुतस्ततः ॥ विजयस्तत्सुतो भाव्यश्चन्द्रविज्ञः स लोमधिः ॥ २५ ॥ एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च ॥ षट्पञ्चाशच्च पृथिवीं भोक्ष्यन्ति कुरुनन्दन ॥ २६ ॥ सप्ताभीरा आवभृत्या दश गर्दभिनो नृपाः ॥ कङ्काः षोडश भूपाला भविष्यन्ति च लोलुपाः ॥२७॥ ततोऽष्टौ यवना भाव्याश्चतुर्दश च तुरुष्ककाः ॥ भूयो दश गुरुण्डाश्च मौना एकादशैव तु ॥ २८ ॥

भा० टी० अ० १

स्वाति नाम पुत्र होगा । हे रिपुदमन ! उसके गोमती नाम पुत्र होगा, गोमतीके पुरीमान् नाम पुत्र होगा ॥ २४ ॥ उसके मेदशिरा नाम पुत्र होगा, मेदशिराके शिवस्कन्दनाम पुत्र होगा, उसके यज्ञश्री नाम पुत्र होगा, यज्ञश्रीके विजय नाम पुत्र होगा, उसके चंद्रविज्ञ नाम पुत्र होगा और उसके सलोमधि नाम पुत्र होगा ॥ २५ ॥ हे कुरुनंदन ! ये तीस राजा चारसौ छप्पन (४५६) वर्षतक पृथ्वीपर राज्य करेंगे ॥ २६ ॥ इसके उपरांत आवभृति नाम नगरीमें सात आभीर जातिके राजा होंगे, उनके फिर दश गर्दभ नाम राजा होंगे, उनके उपरांत कंकजातिके सोलह राजा महालोभी होंगे ॥ २७ ॥ उनके पीछे आठ यवन राजा होंगे, उनके पीछे चौदह तुरुष्क (तुरक, तुरकिस्तानके

वासी राजा) होंगे, फिर दश गुरण्ड (अँगरेज, इंग्लिस्ताननिवासी) राजा होंगे, उनके पीछे ग्यारह मौन राजा होंगे ॥ २८ ॥ यह सब राजा एक सहस्र निन्यानवे १०९९ वर्षतक पृथ्वीपर राज्य करेंगे ॥ २९ ॥ हे राजन् ! ग्यारह मौन राजा तीन सौ ३०० वर्षतक पृथ्वी का भोग करेंगे, उनके मरनेके पीछे किलकिला नगरमें भूतनंद नाम राजा होगा, उसके पीछे वंगिरि नाम राजा होगा ॥३०॥ फिर उसके पीछे उसका भाई शिशुनंदि और शिशुनंदिके पीछे यशोनदि, यशोनंदिके पीछे प्रवीरक, यह सब राजा एकसौ छः १०६ वर्षतक पृथ्वीपर राज्य करेंगे ॥ ३१ ॥ उस शिशुनंदिके तेरह पुत्र होंगे और वह सब बाल्हीक ही कहलावेंगे और आनंदपूर्वक पृथ्वीका राज्य

एते भोक्ष्यन्ति पृथिवीं दशवर्षशतानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिम् ॥ २९ ॥ भोक्ष्यन्त्यब्दशतान्यङ्ग त्रीणि तैः संस्थिते ततः ॥ किलकिलायां नृपतयो भूतनन्दोऽथ वङ्गिरिः ॥ ३० ॥ शिशुनन्दिश्च तद्भ्राता यशोनन्दिः प्रवीरकः ॥ इत्येते वै वर्षशतं भविष्यन्त्यधिकानि षट् ॥३१॥ तेषां त्रयोदश सुता भवितारश्च बाह्लिकाः ॥ पुष्यमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च ॥ ३२ ॥ एककाला इमे भूपाः सप्तान्ध्राः सप्त कौशलाः ॥ विदूरपतयो भाव्या निषधास्तत एव हि ॥ ३३ ॥ मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यत्यपरो वर्णान् पुलिन्दयदुमद्रकान् ॥ ३४ ॥ प्रजाश्च ब्रह्मभूयिष्ठा स्थापयिष्यति दुर्मतिः ॥ वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अनुगङ्गामाप्रयागं गुप्तां भोक्ष्यति मेदिनीम् ॥ ३५ ॥ सौराष्ट्रावन्त्याभीराश्च शूद्रा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ॥ ३६ ॥

करेंगे, फिर और एक दूसरा पुष्पमित्र नामराजा होगा, उसके दुर्मित्र नाम पुत्र होगा ॥३२॥ फिर सात तो अन्ध्र, सात कौशल और एक वैदूर्य नगरका नरेश नैषध यह सब खण्डमण्डलेश्वर राजा तकही समयमें होंगे ॥३३॥ फिर मगधदेशमें विश्वस्फूर्जित पुरंजय नाम राजा होगा, सो बड़ापराक्रमी दुर्मति होगा और ब्राह्मण आदि चारों वर्णोंको धर्मसे भ्रष्ट करके पुलिंद, यदु और मद्रक म्लेच्छके तुल्य कर देगा ॥३४॥ और जिसमें ब्राह्मण, क्षत्रिय, वैश्य न हों ऐसी नीच प्रजाको स्थापित करेगा, यह वीर्यवान् पुरंजय क्षत्रियोंका विध्वंस करके पद्मावती नाम पुरीमें बसकर हरद्वारसे लेकर प्रयागतक राज्य करेगा ॥ ३५ ॥ सौराष्ट्र देश, उज्जैन, आभीर, शूर, अर्बुद, माल-

वादेशनिवासी द्विज अर्थात् तीनों वर्ण यज्ञोपवीत क्रिया न करके संस्कार हीन हो जायँगे और राजा भी शूद्रके समान काम करने लगेंगे ॥ ३६ ॥ सिंधु नदीसे लेकर चंद्रभागा नदीके किनारे तक और कौंतीपुरी काश्मीर आदि सब देशोंमें शूद्र क्रियाहीन म्लेच्छप्राय वेदमर्यादारहित तेजहीन राजा होंगे ॥ ३७ ॥ हे राजन् ! यह सब एक ही कालमें म्लेच्छप्राय, अधर्मी, असत्यपरायण, अल्पदाता, महा-क्रोधी ॥ ३८ ॥ स्त्री, बालक, गौ, ब्राह्मणको मारनेवाले, परनारी, पराये द्रव्यके हरनेवाले उत्पन्न होंगे और मरेंगे, अल्पपराक्रम, अल्प आयुबलवाले होंगे ॥ ३९ ॥ गर्भाधान आदिक संस्कारोंसे रहित सन्ध्या तर्पणादि क्रियाओंसे हीन, रजोगुण, तमोगुणसे आवृत्त, म्लेच्छ राजाओंका रूप धारण किये, प्रजाको अनेक अनेक प्रकारके दुःख देनेवाले होंगे ॥ ४० ॥ इन पालनेवाले राजाओंके सब देश उन राजा-

सिन्धोस्तटे चन्द्रभागां कौन्तीं काश्मीरमण्डलम् ॥ भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥ ३७ ॥ तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ॥ एतऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ३८ ॥ स्त्रीबालगोद्विज-घ्नाश्च परदारधनादृताः ॥ उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः ॥३९॥ असंस्कृताः क्रियाहीना रजसा तमसा-वृताः ॥ प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः ॥ ४० ॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योऽन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः ॥४१॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे कलौ भाविनृपान्वय० प्रथमोऽध्यायः ॥१॥ श्रीशुक उवाच ॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया ॥ कालेन बलिना राजन्नङ्क्ष्य-त्यायुर्बलं स्मृतिः ॥ १ ॥ वित्तमेव कलौ नृणां जन्माचारगुणोदयः ॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥ २ ॥

ओंके भाव और आचरणको और अपवाद करनेवाले लोगोंको परस्परके क्लेशोंसे और राजाओंके किये हुए दुष्टकर्मोंसे दुःखी होकर क्षयको प्राप्त होंगे ॥ ४१ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भाषाटीकायां राजवंशवर्णन नाम प्रथमोऽध्यायः ॥ १ ॥ दोहा—दूसरे जब कलिकालको, बढ़ै दोष अत्यंत । तब हरि कल्की रूप धरि, मारहिं दुष्ट असन्त ॥ श्रीशुकदेवजी बोले कि हे राजन् ! इसके उपरांत फिर महाबलवान् कालके प्रभावसे दिनपर दिन धर्म, सत्य, शौच, क्षमा, दया, आयु, बल, स्मरण आदि घटता चला जायगा ॥ १ ॥ कलि-युगके विषे जिस पुरुषके पास धन होगा वही बलवान् गुणनिधान, आचारवान् और बुद्धिमान् कहलावेगा और जो महा बलवान् होगा

वही धर्माध्यक्ष और न्यायशाली हो सबको जीतेगा ॥ २ ॥ रीति प्रीति केवल एक स्त्री और पुत्रमें ही रहेगी और सुहृद्, मित्र, कुल, गोत्रादिकमें कपट व्यवहार रह जायगा। स्त्री, पुरुष होनेमें कुछ श्रेष्ठ कुल आचार विचार न होगा, केवल रति करनेमें कुशल देख लेंगे और ब्राह्मणपनमें केवल जनेऊमात्र ही रह जायगा ॥३॥ आश्रम चिह्नमात्र ही करके पहचाने जायँगे, परस्पर स्नेह कहीं नहीं रहेगा, धनहीन न्यायमें नित्यप्रति हारते ही रहा करेंगे, क्योंकि न्यायाध्यक्ष जबतक धनपात्रोंसे द्रव्य पाते रहेंगे तबतक धनहीनको हराते ही रहा करेंगे और अधिक बोलनेवालेको ही लोग पंडित कहेंगे ॥४॥ निर्धनोंका नाम लोग असाधु रखेंगे, दम्भवान् और कपटीको ही लोग साधु कहेंगे, विवाह स्वीकारमात्र ही समझा जायगा और स्नान मात्र ही सब शृङ्गार होगा ॥ ५ ॥ जो तालाब वा सरोवर दूर होगा, वही तीर्थ माना

दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥ ३ ॥ लिङ्गमेवाश्रमख्यातावन्योऽन्यापत्तिकारणम् ॥ अवृत्त्या न्यायदौर्बल्यं पाण्डित्ये चापलं वचः ॥ ४ ॥ अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव तु ॥ स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम् ॥ ५ ॥ दूरे वार्ययनं तीर्थं लावण्ये केशधारणम् ॥ उदरम्भरिता स्वार्थः सत्यत्वे धाष्टर्यमेव हि ॥ ६ ॥ दाक्ष्यं कुटुम्बभरणं यशोऽर्थे धर्मसेवनम् ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ॥ ७ ॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥ प्रजा हि लुब्धे राजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥ ८ ॥ आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम् ॥ शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ॥ ९ ॥

जायगा, माता, पिता और गुरुको कोई तीर्थ नहीं मानेंगे, शिरपर बाल रखना यही सब सुन्दरता कहावेगी, जैसे तैसे पेट भर लेना परम चतुरता और पराक्रम गिना जायगा, और ढ़ीठ पुरुष ही सत्यवादी कहलावेंगे ॥६॥ कुटुम्बका उदरपूर्ण करना ही सयान और चतुराईका मूल समझा जायगा, धर्मका सेवन केवल इसीलिये किया जायगा जिससे संसारमें यश हो, इस प्रकार जब सर्वत्र भूमण्डल प्रजाओंसे व्याप्त हो जायगा ॥७॥ तब ब्राह्मण, क्षत्रिय, वैश्य, शूद्र, इनमें जो बली होगा वही भूपाल कहा जायगा, लोभी, निर्दयी, लुटेरोंसे और राजाओंसे ॥८॥ अपना स्त्री, धन छीन लेनेके भयसे सब प्रजा भागकर पर्वतोंमें, वनोंमें जा छिपेगी और वहां शाक, कन्द, मूल, फल, मधु, मांस, पुष्प,

बीज इनसे अपना उदर पूर्ण करेगी ॥ ९ ॥ अकाल और राजाओंके दण्डसे कष्ट पाकर अनावृष्टि, शीत, वायु, धूप, वर्षा और हिमसे परस्पर अत्यंत पीड़ित हो क्लेश पाकर सम्पूर्ण नष्ट हो जायगा ॥१०॥ भूख, प्यास, रोग, सन्ताप और चिंतासे प्रजा अत्यंत पीड़ित हो जायगा और मनुष्योंकी पूर्ण अवस्था कलियुगमें २० अथवा ३० वर्षकी हुआ करेगी ॥ ११ ॥ जब कलियुगका महादोष बढ़ेगा तब प्राणी तनु क्षीण और महामलीन हो जायँगे । धर्मके बदलेमें पाखण्ड ही पाखण्ड रह जायगा, राजा लुटेरे होंगे, वृथा हिंसा और बात बातमें झूंठ बोलकर नाना प्रकारकी वृत्तियोंको करेंगे और सदा बुरे कामोंमें निष्ठा रहेगी॥१२॥१३॥ सब वर्णाश्रम शूद्रके सदृश हो जायँगे

अनावृष्टया विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः ॥ शीतवातातपप्रावृड्ढिमैरन्योऽन्यतः प्रजाः ॥ १० ॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया ॥ त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम् ॥ ११ ॥ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः ॥ वणाश्रमवतां धर्मे नष्टे वेदपथे नृणाम् ॥ १२ ॥ पाषण्डप्रचुरे धर्मे दस्युप्रायेषु राजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥ १३ ॥ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु ॥ गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु ॥ १४ ॥ अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु ॥ विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥ १५ ॥ इत्थं कलौ गतप्राये जने तु खरधर्मणि ॥ धमत्राणाय सत्त्वेन भगवानवतरिष्यति ॥ १६ ॥ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्मकर्मापनुत्तये ॥ १७ ॥

और गायें बकरीके समान छोटी-छोटी होंगी, चारों आश्रम गृहस्थप्राय हो जायँगे और स्त्रीके भाइयोंसे लोग प्यार करेंगे और घरको सम्बन्धमात्र मानेंगे ॥१४॥ अन्न और ओषधियें सब क्षीण हो जायँगी, केवल वृक्षोंमें शमी (उदड़) के वृक्ष ही रह जायँगे, वर्षाकालमें बिजली अधिक चमकेगी, वर्षा बहुत थोड़ी हुआ करेगी, गृहस्थियोंके घर धर्मकर्मसे शून्य हो जायँगे ॥ १५ ॥ इस प्रकार कलियुगमें सब मनुष्य अधर्मी हो गधेके समान हो जायँगे और जब महाभयंकर कलियुगके अन्तका समय आवेगा तब धर्मकी रक्षा करनेके लिये आदिपुरुष भगवान् शुद्ध सत्त्वगुण मूर्ति धारण करके निष्कलंकरूपसे प्रकट होंगे ॥ १६ ॥ चराचरके गुरु सबके आत्मा ईश्वर विष्णुका अवतार महात्मा

पुरुषोंके धर्मकी रक्षा और उनके कर्मोंके प्रचारके लिये होगा॥१७॥ उस विष्णुयशी ब्राह्मणके घरमें चैत्र शुक्ला द्वादशीको विष्णु भगवान् कल्कि अवतार धारण करेंगे ॥ १८ ॥ उसी समय देवता लोग अत्यन्त शीघ्रगामी देवदत्त नाम एक घोड़ा लेकर उनके सम्मुख उपस्थित होंगे, भगवान् उस घोड़ेपर चढ़कर खड्ग हाथमें ले दुष्टोंके दमनकर्त्ता अणिमादिक अष्टसिद्धियोंसे संयुक्त ॥१९॥ जगदीश्वर अनुपम कांतिवाले महातेजस्वी कल्कीरूपसे राजाओंकासा वेष धारण किये उस घोड़ेपर चढ़ करोड़ों चोरोंका विध्वंस करेंगे ॥२०॥ जब सब चोरोंका संहार हो जायगा, तब देश देशांतरोंके मनुष्योंके अतिपुण्यरूप सुगंधयुक्त पवनके लगनेसे उन मनुष्योंके मन उज्ज्वल हो जायँगे ॥२१॥ और

शम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥ १८ ॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिनाऽसाधुदमनमष्टैश्वर्यगुणान्वितः ॥ १९ ॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिङ्गच्छदो दस्यून्कोटिशो निहनिष्यति ॥ २० ॥ अथ तेषां भविष्यन्ति मनांसि विशदानि वै ॥ वासुदेवाङ्ग-रागातिपुण्यगन्धानिलस्पृशाम् ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥ २१ ॥ तेषां प्रजाविसर्गश्च स्थविष्ठः संभ-विष्यति ॥ वासुदेवे भगवति सत्त्वमूर्तौ हृदि स्थिते ॥ २२ ॥ यदाऽवतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः ॥ कृतं भवि-ष्यति तदा प्रजासूतिश्च सात्त्विकी॥ २३ ॥ यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती॥ एकराशौ समेष्यन्ति तदा भवति तत्कृतम् ॥ २४ ॥ येऽतीता वर्तमाना ये भविष्यन्ति च पार्थिवाः ॥ ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥ २५ ॥ आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम् ॥ एतद्वर्षसहस्रं तु शतं पञ्चदशोत्तरम् ॥ २६ ॥

उन नगर निवासियोंके हृदयमें शुद्ध चैतन्य सत्त्वमूर्ति भगवान् वासुदेव स्थित होंगे तो उन प्रजाओंके पुत्रादिक उत्तम और पुष्ट होंगे॥२२॥ जब धर्मके पालनेवाले कल्किभगवान् प्रकट होंगे तब सत्ययुग वर्त्तने लगेगा और प्रजाकी संतानसात्त्विकी होगी ॥ २३ ॥ जब चंद्र, सूर्य, वृहस्पति सब पुष्यनक्षत्रके योग करके एक राशिमें आवेंगे तब सत्ययुग होगा ॥ २४ ॥ जो चंद्रवंशी और सूर्यवंशी राजा हो चुके हैं और जो इस समय विद्यमान हैं तथा आगेको होंगे, उन सबके नाम संक्षेपसे भिन्न भिन्न मैंने आपको सुनाये ॥ २५ ॥ तुम्हारे जन्मसे लेकर

नंदके राज्यतक पंद्रह सौ दश १५१० वर्ष बीत गये ॥ २६ ॥ आकाशमें सप्त ऋषियोंके मध्य जो दो तारे पुलह और ऋतु पहले दीखते हैं उन दोनोंके मध्यमें रात्रिके समय दोनोंको समान देखनेवाले ॥ २७ ॥ अरुंधतीके नक्षत्र सहित सप्तऋषि मनुष्योंके १०० वर्षतक प्रत्येक नक्षत्रपर रहा करते हैं,अर्थात् जैसे चंद्रमा एक नक्षत्रपर एक दिवस रहता है उसी प्रकार सप्तऋषि सौ १०० वर्षके अनुमान एक नक्षत्रपर रहते हैं, यही सप्तऋषि तुम्हारे जन्मके समय मघा नक्षत्रपर थे और इस समय भी मघा नक्षत्रपर स्थित हैं ॥२८॥ कलियुगके आनेका समय ठीक ठीक इस प्रकार निश्चय किया है कि जब महातेजस्वी शुद्ध सत्त्वमूर्ति श्रीकृष्ण भगवान् अपने परम धामको सिधारे, उसी समय कलियुगने इस लोकमें अपना प्रवेश किया, जिस कलियुगके आते ही मनुष्योंकी पापमें रुचि हुई ॥ २९ ॥ हे राजन् ! जबतक रमापति

सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ २७ ॥ तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतानि च ॥ ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः ॥२८॥ विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ॥ तदाऽविशत्कलिर्लोकं पापे यद्रमते जनः ॥ २९ ॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ॥ तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत् ॥ ३० ॥ यदा देवर्षयः सप्त मघासु विचरन्ति हि ॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥ ३१ ॥ यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः ॥ तदा नन्दात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ ३२ ॥ यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ॥ ३३ ॥ दिव्याब्दानां सहस्रान्ते चतुर्थे तु पुनः कृतम् ॥ भविष्यति यदा नृणां मम आत्मप्रकाशकम् ॥ ३४ ॥

भगवान् अपने चरणारविंदोंसे पृथ्वीका स्पर्श करते हुए इसपर विराजमान रहे, तबतक कलियुग पृथ्वीपर अपना कुछ कर्तव्य न कर सका ॥३०॥ जबसे मघा नक्षत्रमें सप्तऋषि वर्तमान होते हैं तभीसे प्रवृत्त होकर देवताओंके बारह सौ १२०० वर्षतक कलियुग रहता है ॥३१॥ अब सप्तऋषि मघा नक्षत्रसे निकल पूर्वाषाढा नक्षत्रपर जायेंगे तब नन्दका राज्य वर्तेगा और उसी नन्दके राज्यसे कलियुगका अत्यन्त प्रताप बढ़ेगा ॥ ३२ ॥ जिस दिनसे, जिस मुहूर्तसे, जिस क्षणसे श्रीकृष्णभगवान् अपने परमधामको सिधारे उसी दिन और उसी समय कलियुगने इस लोकमें अपना प्रवेश किया, ऐसे भूतकालके जाननेवाले ऋषि लोग कहते हैं ॥३३॥ जब देवताओंके एक सहस्र १००० वर्ष

व्यतीत हो जायँगे, जो कलियुगका प्रमाण है, तो फिर पीछे सत्ययुगका प्रवेश होगा और सत्ययुगके आनेका यही लक्षण दिखाई देगा कि मनुष्योंके मनमें आपसे आप आत्माका प्रकाश हो जायगा ॥३४॥ हे राजन्! जिस प्रकार पृथ्वीपर मनुका वंश हुआ और आपसे कहा, उसी प्रकार ब्राह्मण, क्षत्रिय, वैश्य, शूद्रोंका वंश युग-युगमें जानना योग्य है ॥ ३५ ॥ जो आजतक नाममात्रसे ही जाने जाते हैं, उन जाननेवालोंकी केवल कथामात्र ही कहनेको रह गयी है, ऐसे महात्मा पुरुषोंकी कीर्ति ही संसारमें आजतक चली आती है, वे लोग पृथ्वी पर न रहे इसलिये प्राणियोंको चाहिये कि राज्य और पुत्रादिकी मोह ममताको त्यागकर अपने धर्म कर्ममें तत्पर रहे ॥ ३६ ॥ चन्द्रवंशी शन्तनुका भ्राता देवापि और इक्ष्वाकुवंशमें उत्पन्न हुआ सूर्यवंशी राजा मरु ये दोनों राजा अत्यन्त योगबलके प्रतापसे कलाप

इत्येष मानवो वंशो यथा संख्यायते भुवि ॥ तथा विट्छूद्रविप्राणां तास्ता ज्ञेया युगे युगे ॥ ३५ ॥ एतेषां नामलिङ्गानां पुरुषाणां महात्मनाम् ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥ ॥ ३६ ॥ देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ॥ कलापग्राम आसाते महायोगबलान्वितौ ॥ ३७ ॥ ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ॥ ३८ ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ अनेन क्रमयोगेन भुवि प्राणिषु वर्त्तते ॥ ३९ ॥ राजन्नेते मया प्रोक्ता नरदेवास्तथाऽपरे ॥ भूमौ ममत्वं कृत्वान्ते हित्वेमां निधनं गताः ॥४०॥ कृमिविड्भस्मसंज्ञाऽन्ते राजानाम्नोऽपि यस्य च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ ४१ ॥

ग्राममें वास करते हैं ॥ ३७ ॥ ये दोनों राजा कलियुगके अन्तमें भगवान्‌की शिक्षा पाकर पहलेके समान सब वर्णाश्रम धर्मोंका विस्तार करेंगे ॥३८॥ सत्ययुग, त्रेता, द्वापर, कलियुग ये चारों युग इसी क्रमसे पृथ्वीपर मनुष्योंके विषे वर्त्तते रहते हैं ॥३९॥ हे राजन्! यह जो राजा मैंने आपके आगे वर्णन किये, इनके सिवाय और भी जो हुए सो सब इस भूमिमें ममता करके और इसकी यहीं छोड़कर आप रीते हाथों नाशको प्राप्त हुए ॥४०॥ जिस देहका नाम राजा था उसी देहके अन्तसमय कृमि, विष्ठा, खाक ये नाम हुए, ऐसे शरीरसे जो कोई शरीरधारी दूसरेसे द्रोह करते हैं उनका कौनसा स्वार्थ सिद्ध होता है? नरकमें वास करनेके सिवाय कोई स्वार्थ सिद्ध नहीं होता ॥ ४१ ॥

किस प्रकारसे अखण्ड भूमिको हमारे पूर्वपुरुषोंने पाली थी और अब किस प्रकार हमारे पुत्र पौत्रों और वंशजोंके पास स्थिर रहेगी ? ॥४२॥ वे मूर्खलोग पञ्चभूतमय इस देहको अपना मानकर भूमिमें ममता कर अन्तसमय दोनोंको छोड़कर आप अकेले ही गये ॥४३॥ हे राजन् ! जो जो भूपति हुए, अपने पराक्रमसे भूमिका भोग करते रहे, इस महाविकराल कालने उन सबकी भी कथामात्र ही शेष रखी ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भाषाटीकायां कल्क्यवतारवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ दोहा–तिसरेमें वसुधावचन, राज्य दोष गुणग्राम । कुलकलंक कलिकालके, मेटन हरिका नाम ॥ श्रीशुकदेवजी बोले कि हे राजन् ! यह पृथ्वी अपने जीतनेको परिश्रम करते

कथं सेयमखण्डा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य च ॥ ४२ ॥ तेजोऽबन्नमयं कायं गृहीत्वात्मतयाऽबुधाः ॥ महीं ममतया चोभौ हित्वान्तेऽदर्शनं गताः ॥ ४३ ॥ ये ये भूपतयो राजन्भुञ्जन्ति भुव-मोजसा ॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥ ४४ ॥ इति श्रीभा० म० द्वा० कल्क्यवतारादि० द्वितीयोऽ-ध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ दृष्ट्वाऽऽत्मनि जये व्यग्रान्नृपान्हसति भूरियम् ॥ अहो मां विजिगीषन्ति मृत्योः क्रीडनका नृपाः ॥ १ ॥ काम एष नरेन्द्राणां मोहः स्याद्विदुषामपि ॥ येन फेनोपमे पिण्डे येऽतिविश्राम्भिता नृपाः ॥ २ ॥ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमन्त्रिणः ॥ ततः सचिवपौराप्तकरीन्द्रानस्य कण्टकान् ॥ ३ ॥ एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलाम् ॥ इत्याशाबद्धहृदया न पश्यन्त्यन्तिकेऽन्तकम् ॥ ४ ॥

हुए राजाओंको देखकर मन ही मन ठट्ठे मार हँसती है कि अहो ! यह सब मृत्युके खिलौने राजा मुझको जीतना चाहते हैं, यह नहीं जानते कि तेरे समान अनन्त राजा मरकर खप गये ॥ १ ॥ जिस कामनाने बुद्बुदके समान इस देहविषे जिन राजाओंको विश्वास उपजाया, उनकी भी कामना निष्फल हुई ॥ २ ॥ मुख्य तो राजाओंका यह विचार है कि पहले पांचों इंद्रिय और छटे मनको जीतकर मन्त्री, प्रधान, सचिव पुरवासी और कुटुम्बादिक अपने वशमें करके शत्रुओंकी जड़को उखाड़ महावत और कटककी ओरसे बेखटक हो राज्य करेंगे ॥ ३ ॥ और इसी रीतिसे समुद्रतककी भूमिको जीतेंगे इस प्रकार आशावेष्टित हृदय वाले राजा अपने निकट रात-दिन डंका बजानेवाले कालका

कुछ ध्यान नहीं करते ॥४॥ अनेक राजा तो समुद्रके पारतक मुझको अपने पुरुषार्थसे जीतकर अत्यन्त तृष्णासे समुद्रके देशोंमें भी प्रवेश करते हैं, इंद्रिय और मनके जीतनेपर राज्य साधनेकी इच्छा करना मूर्खता है और आत्मजयका फल तो एक मुक्ति ही है ॥ ५ ॥ श्रीशुकदेवजी बोले कि हे राजा परीक्षित् ! वसुधा कहती है कि देखो ! जो मुझको छोड़कर मनु और मनुकी सन्तान मेरे ऊपर जैसे आये वैसे ही हाथ पसारे चले गये, मुझ अचलाको यह कुबुद्धि राजा युद्धमें जीतना चाहते हैं ॥६॥ देखो ! राज्यकी ममतामें बँधे हुए असत् राजा मेरे लिये पिता, पुत्र, भ्राता ये परस्पर भी क्लेश करते हैं ॥ ७ ॥ हे मूढ ! यह वसुधा मेरी है, इसमें तेरी किंचिन्मात्र भी नहीं है यह

समुद्रावरणां जित्वा मां विशन्त्यब्धिमोजसा ॥ कियदात्मजयस्यैतन्मुक्तिरात्मजये फलम् ॥ ५ ॥ यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह ॥ गता यथागतं युद्धे तां मां जेष्यन्त्यबुद्धयः ॥ ६ ॥ मत्कृते पितृपुत्राणां भ्रातॄणां चापि विग्रहः ॥ जायते ह्यसतां राज्ये ममताबद्धचेतसाम् ॥ ७ ॥ ममैवेयं मही कृत्स्ना न ते मूढेतिवादिनः ॥ स्पर्धमाना मिथो घ्नन्ति म्रियन्ते मत्कृते नृपाः ॥ ८ ॥ पृथुः पुरूरवा गाधिर्नहुषो भरतोऽर्जुनः ॥ मान्धाता सगरो रामः खट्वाङ्गो धुन्धुहा रघुः ॥ ९ ॥ तृणबिन्दुर्ययातिश्च शर्यातिः शन्तनुर्गयः ॥ भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः ॥१०॥ हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः ॥ नमुचिः शम्बरो भौमो हिरण्याक्षोऽथ तारकः ॥ ११ ॥ अन्ये च बहवो दैत्या राजानो ये महेश्वराः ॥ सर्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः ॥ १२ ॥ ममतां मय्यवर्त्तन्त कृत्वोच्चैर्मर्त्यधर्मिणः ॥ कथावशेषाः कालेन ह्यकृतार्थाः कृता विभो ॥ १३ ॥

कहते और परस्पर स्पर्द्धा करते हुए मेरे लिये अनेक राजा युद्ध ही करते करते मर गये ॥ ८ ॥ पृथु, पुरूरवा, गाधि, नहुष, अर्जुन, भरत, मांधात, सगर, राम, खट्वांग धुन्धुमार, रघु ॥ ९ ॥ तृणबिंदु, ययाति, शर्याति, शान्तनु, गय, भगीरथ, कुवलयाश्व, ककुत्स्थ, नैषध, नृग ॥ १० ॥ हिरण्यकशिपु, वृत्रासुर, रावण, नमुचि, नरकासुर, शम्बर, हिरण्याक्ष, तारक ॥ ११ ॥ ऐसे ऐसे अनेक दैत्य और राजा जो कि बड़े बड़े बलवान् और सर्वगुणनिधान, योद्धाओंके पराजय करनेवाले, जिन्होंने कहीं भी हार नहीं मानी, सब ही अजित हो गये ॥ १२ ॥ सो सब मरणधर्मा मेरे विषे अत्यन्त ममता करके रहते थे सो अब विना ही मनोरथ पूर्ण

किये कालके गालमें चले गये ॥१३॥ और सबकी सब कथा ही मात्र रह गयी। हे विभो ! लोकोंमें यश विस्तार करके आपतो परलोकको चले गये, ऐसे बड़े बड़े राजाओंकी कथा मैंने तुमसे कही, सो केवल विषयोंकी असारता और विज्ञान और वैराग्यका निरूपण करनेके लिये सो इसमें केवल वाणीका विलास है, कुछ परमार्थ नहीं ॥ १४ ॥ जिस अमंगलके दूर करनेवाले उत्तमश्लोक भगवान्के गुणोंको कवीश्वर लोग सदा गाते हैं, जो कोई श्रीकृष्णके चरणारविन्दोंकी निर्मल भक्तिको चाहे वह निरन्तर उनके गुणोंको सुने ॥ १५ ॥ राजा परीक्षित् बोले कि हे भगवन् ! हे महामुने ! कलियुगके बड़े बड़े दोषोंको कलियुगके मनुष्य कौनसे उपायसे दूर कर सकते हैं ? सो तुम हमसे

कथा इमास्ते कथिता महीयसां वितीर्य लोकेषु यशः परेयुषाम् ॥ विज्ञानवैराग्यविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यम् ॥ १४ ॥ यस्तूत्तमश्लोकगुणानुवादः सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः ॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ १५ ॥ राजोवाच ॥ केनोपायेन भगवन् कलेर्दोषान्कलौ जनाः ॥ विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा मुने ॥ १६ ॥ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः ॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः ॥ १७ ॥ श्रीशुक उवाच ॥ कृते प्रवर्त्तते धर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यं दया तपो दानमिति पादा विभोर्नृप ॥ १८ ॥ संतुष्टाः करुणा मैत्राः शान्ता दान्तास्तितिक्षवः ॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः ॥ १९ ॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः ॥ अधर्मपादैरनृतहिंसाऽसन्तोषविग्रहैः ॥ २० ॥

कहो ॥ १६ ॥ पहले तो युगोंके धर्मका और प्रलय कल्पका प्रमाण कहो, फिर महात्मा कालरूप विष्णुभगवान् की गति कहो ॥ १७ ॥ श्रीशुकदेवजी बोले कि हे नरेन्द्र ! सत्ययुगमें मनुष्योंका धर्म चार चरण करके बर्ते हैं एक तो सत्य, दूसरी दया, तीसरा तप, चौथा दान ये धर्मके चार चरण हैं ॥ १८ ॥ सत्ययुगके मनुष्य सन्तोषी, करुणावान्, सब प्रेम प्रीति रखनेवाले, शान्तचित्त, जितेंद्रिय, सहनशील, आत्माराम, समदृष्टि और परमार्थमें निरालस्य युक्त और परिश्रमी होते हैं ॥ १९ ॥ त्रेतायुगके विषे झूँठ, हिंसा, तृष्णा, विग्रह इन चार अधर्मके चरणोंसे सत्य, दया, तप, दान ये धर्मके चरण हैं, इनमेंसे धीरे धीरे चौथा भाग क्षीण होता जाता है ॥ २० ॥

हे राजन्! क्रिया तपमें निपुण न तो अतिहिंसक और न अतिलम्पट, धर्म, अर्थ, काममें निष्ठा, वेदत्रयी—धर्मपरायण ब्राह्मणवर्ण जिनमें मुख्यतया युगकी प्रजा होती है ॥२१॥ द्वापर युगमें अधैर्य, हिंसा, झूठ बोलना और द्रोह इन धर्मके चार चरणोंसे दया, तप, सत्य दान ये धर्मपांव आधे-आधे घट गये ॥ २२ ॥ इससे द्वापर युगमें यशस्वी, बड़े शीलवान्, वेदाध्ययनमें निपुण, अति ऐश्वर्यवाले, कुटुम्बी, प्रसन्नमुख, ब्राह्मण और क्षत्रिय चारों वर्णोंमें, मुख्य माने जायँगे ॥२३॥ कलियुगमें जब अधर्मकी वृद्धि होगी तब धर्मका एक चरण रह जायगा। सो भी शनैः शनैः करके अन्तमें नष्ट हो जायगा ॥ २४ ॥ कलियुगमें लोग लोभी, दुराचारी, निर्दयी, झूंठी लड़ाई करनेवाले,

तदा क्रियातपोनिष्ठा नातिहिंस्रा न लम्पटाः ॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप ॥ २१ ॥ तपः सत्यदयादानेष्वर्धं ह्रसति द्वापरे ॥ हिंसातुष्ट्यानृतद्वेषैर्धर्मस्याधर्मलक्षणैः ॥ २२ ॥ यशस्विनो महाशीलाः स्वाध्यायाध्ययनेरताः ॥ आढ्याः कुटुम्बिनो हृष्टा वर्णाः क्षत्रद्विजोत्तराः ॥ २३ ॥ कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः ॥ एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति ॥२४॥ तस्मिँल्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः ॥ दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥२५॥ सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ॥ कालसञ्चोदितास्ते वै परिवर्तन्त आत्मनि ॥ २६ ॥ प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च ॥ तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः ॥२७॥ यदा कर्मसु काम्येषु भक्तिर्भवति देहिनाम् ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥२८॥ यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥ २९ ॥

दुर्भागी, अत्यन्त तृष्णावाले, शूद्र और दास जिनमें मुख्य माने जायँगे ॥ २५ ॥ सत्त्वगुण, रजोगुण, तमोगुण ये तीनों गुण ईश्वरके अधीन हैं, काल करके प्रेरित हैं, प्राणियोंमें सदा फिरते दिखायी देते हैं ॥ २६ ॥ जब मन, बुद्धि और इंद्रिय सत्त्वगुणमें स्थित हों तब सत्ययुग समझना चाहिये क्योंकि सत्ययुगके प्रभावसे ज्ञानमें रुचि होती है ॥ २७ ॥ हे बुद्धिमान् नृप! जब प्राणियोंकी रुचि सकाम कर्मोंमें हो तब रजोगुणयुक्त त्रेतायुग जानिये ॥ २८ ॥ जब लोभ, तृषा, अभिमान, दम्भ, मत्सरता, और काम्यकर्ममें प्रवृत्ति हो तब

भा॰ द्वा॰ ॥ ८ ॥

रजोगुण तमोगुणका उत्पन्न करनेवाला मुख्य द्वापर युग समझना चाहिये ॥२९॥ जब मनुष्योंके मनमें कपट, झूंठ, आलस्य, निद्रा, हिंसा, दुःख, शोक, मोह, भय, दीनता हो तब तमोगुणको प्रकट करनेवाला मुख्य कलियुग जानिये ॥ ३० ॥ सो प्राणी कलियुगके हेतुको पाकर मन्दबुद्धि, भाग्यहीन, बहुत भोजन करनेवाले, कामी और निर्धन होंगे और स्त्री असाध्वी और व्यभिचारिणी होंगी॥३१॥ देश देशान्तरोंमें चोरोंका बड़ा भय होगा, वेद पाखण्डसे अत्यन्त दूषित होंगे, राजा प्रजाके लूटनेवाले होंगे, ब्राह्मण स्त्रीलम्पट उदरपरायण होंगे ॥३२॥ ब्राह्मण व्रत, आचारसे भ्रष्ट होंगे, गृहस्थ भिखारी होंगे, तपस्वी ग्रामवासी होंगे, संन्यासी द्रव्यके लोभी होंगे ॥ ३३ ॥ कलियुगकी नारी

यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम् ॥ शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ॥ ३० ॥ यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥ ३१ ॥ दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः ॥ राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥ ३२ ॥ अव्रता बटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥ तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः ॥ ३३ ॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ॥ ३४ ॥ पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः ॥ अनापद्यपि मंस्यन्ते वार्तां साधु जुगुप्सिताम् ॥ ३५ ॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ ३६ ॥

भा॰ टी॰ अ॰ ३

अत्यन्त ठिंगनी और बहुत भोजन करनेवाली, कालीकाली, बहुत सन्तान उपजानेवाली, महानिर्लज्ज, सदा कटुक वचन बोलनेवाली, चोर, ढीठ, कपटकी भरी हुई अनेक प्रकारकी माया दिखानेवाली होंगी ॥ ३४ ॥ तुच्छ किरातादि कपटी, दुराचारी, म्लेच्छ व्यापारी होंगे, आपदा विना ही सब लोक निन्दित जीविकाको श्रेष्ठ समझेंगे, जिस वृत्तिको सत्पुरुष स्वप्नमें भी धिक्कार करते थे ॥ ३५ ॥ धनहीन उत्तम पतिको भी स्त्री त्याग देंगी, नौकर अपने स्वामियोंकी नौकरी छोड़कर औरोंकी नौकरी करेंगे और नौकर रोगी हो जायँगे

तो स्वामी लोभके मारे नौकरीसे हटा देंगे, विना दूधकी गायोंको लोग म्लेच्छोंके हाथ बेंच डालेंगे ॥ ३६ ॥ पिता, भ्राता, सुहृद् और जातिवालोंको छोड़कर स्त्रीके सम्बन्धियोंसे प्यार करेंगे और स्त्रीके बहिन (साली), स्त्रीका भ्राता (साला) और उसकी स्त्री

पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः ॥ ननान्दृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥

(सलहेज) के साथ गुप्त मतकी बातें करेंगे । इस प्रकार दीन स्त्री और लम्पट नर कलियुगमें होंगे * ॥ ३७ ॥

---

* लावनी—धनि कलियुग महराज आपने लीला अजब दिखाई है। उलटा चलन चला दुनियांमें सबकी मति बौराई है ॥ नीति पंथ उठ गया कचहरी पापन आन लगाई है । धर्म गया पाताल सभीके मन बेधरमी छाई है ॥ गुप्त हुए सच्चे वकील झूठोंकी बात सवाई है । सच्चोंकी परतीति नहीं झूठांने सनद बनाई है ॥ न्याय छोड़ अन्याय करें राजोंने नीति गँवाई है । हकदारोंका हक्कमेट बेहकपर कलम उठाई है ॥ जो हैं जाली फरेबवाले उनकी ही बनि आई है । उलटा चलन चला दुनियांमें सबकी मति बौराई है ॥१॥ गूजर जाट बने संन्यासी पोथी बगल दबाई है । मूड़मुड़ाकर इक धेलेमे कफनी लाल रँगाई है ॥ पन्थ चले लाखों पाखंडी अद्भुत कथा बनाई है । मुंह काला कर दिया किसीने शिरपर जटा रखाई है ॥ हुए नीच कुरसी नसीन ऊँचोंको नहीं तिपाई है । जुगुनू पहुँचे आसमान पर जाकर दुम चमकाई है ॥ फांके करते सन्त मिलें भडुओंको दूध मलाई है । उलटा ० ॥२॥ सास बहू से लड़ें बहू भी आंख फेर मुसलाई है । लेकर मूसल हाथ कोसती दांत पीस उठ धाई है ॥ घरवालेको छोड़ गैर कर कुलकी लाज गवांई है । निज पतिकी सेवा तजकर परपतिसे प्रीति लगाई है । पुरुष हुए ऐसे व्यभिचारी विषयवासना छाई है । वेश्या-ओंके फन्देमें पड़ घरकी तजी लुगाई है ॥ मात पिताकी करें बुराई नारि परमसुखदाई है । उलटा चलन चला दुनियांमें सबकी मति बौराई है ॥३॥ व्याह बुढ़ापेमें जो करते उनपर गजब खुदाई है । साठ बरसके आप करी कन्याके सङ्ग सगाई है ।कुछ दिन पीछे आप मर गये करके राड़ बिठाई है । लगी करन व्यभिचार लाज तजि घर घर लोग हँसाई है । पंडित पाधा करें दलाली मंत्री जिनका नाई है । शर्म रही नहिं बेशर्मोंको बेटी बेंचकर खाई है ॥ बहन भानजी त्यागन करके साली ज्योति जिमाई है । उलटा चलन चला दुनियांमें सबकी मति बौराई है॥४॥गंगाजल गोरसको छोड़कर गाढ़ी भांग छनाई है । भक्ष्य अभक्ष्य लगे खाने मदिराकी होति छकाई है । श्वशुर बहूको कुदृष्टि देखें अदनी नियति डुलाई है । ठट्ठा अरु मसखरी करें सासूसे ज्वान जमाई है ॥ कहे भतीजा चचासे अपने तू मूरख सौदाई है । हमें चैन करनेसे मतलब किसकी चाची ताई है ॥ बहिन बहिनसे लड़ें और लड़ता भाईसे भाई है । उलटा चलन चला-दुनियांमें सबकी मति बौराई है ॥ ५ ॥ जामा अङ्गा दिया त्याग दिया अरु पगड़ी फारि बहाई है । पहन कोट पतलून शीशपर टोपी गोल जमाई है । तोड़ तख्त अरु सिंहासनको लाके बेंच बिछाई है । खीर खांड़ को त्यागन करके रोटी डबल पकाई है ॥ तोड़के ठाकुरद्वारा मसजिद सबकी करी सफाई है । गिरजा घरमें जाकरके ईसाकी करी बड़ाई है । बात करें सब अंगरेजीमें निज भाषा बिसराई है । उलटा चलन चला दुनियांमें सबकी मति बौराई है ॥६॥ मित्र शत्रु-सम हुए प्रीतिकी डाली तोड़ जलाई है । विद्या बिन हो गये विप्र गायत्री तलक भुलाई है । क्षत्रिय बैठे नारी बनकर ले तलवार छिपाई है । बन आईना कुछ बनियोंसे माया मुफ्त लुटाई है । शूद्र हुए धनवान ब्राह्मणोंने कीन्हीं स्योकाई है । गयावाल और मथुराके चौबोंकी बात बनि आई है। चारों युगोंसे कलिने अपनी नई रीति दिखलाई है । उलटा चलन चला दुनियांमें सब की मति बौराई है ॥७॥ अपुज पूजने लगे कहुं सब शिरपर देवी आई है । घर घरमें गुलगुले शेख सद्दोंकी चढ़ी कढ़ाई है ॥ परब्रह्मको छोड़ भूत प्रेतोंकी दई दुहाई है । मूंड़ हिलाती कही मलिनियां कहुं कुसुम्भी माई है ॥ बालभोग ठाकुरको नहिं सय्यदके लिये मिठाई है । सन्तको कंबल नहीं पतुरियाको कुरती सिलवाई है ॥ गुरू हरैं चेलोंका धन चेला करता है चतुराई है । उलटा चलन चला दुनियांमें सबकी मति बौराई है ॥८॥ विधवालग गईपान चबाने दे सुरमा मुसुकाई है । नित करती शृङ्गार देखकर अहिवाती शरमाई है ॥ बैठें ज्वारी और अगामी हुआ जगत अन्यायी है । सब लक्षणं विपरीति और घर-घरमें होत लड़ाई है ॥ गाय जाय लाखों मारी करता नहिं कोई सुनाई है । इसीसे पड़ता काल सृष्टि में संपति सकल बिलाई है । हो दयाल हे नाथ ! आज कलयुगकी महिमा गाई । उलटा चलन चला दुनियांमें सबकी मति बौराई है ॥९॥

शूद्र तपस्वियोंका वेष धारण करके जीविका करेंगे और प्रतिग्रह लेंगे अधर्मी लोग ऊँचे आसनोंपर बैठकर धर्मका उपदेश करेंगे ॥ ३८ ॥ हे राजन् ! जब पृथ्वी अन्नहीन हो जायगी तब प्राणी अनावृष्टिके भयसे अत्यन्त पीड़ित और सदा दुर्भिक्ष्य और राजाओंके करसे क्लेशवान् और अत्यन्त व्याकुल हो जायँगे॥३९॥और वसन, भूषण, खान, पान, स्नान, शयन मैथुन,आदि सुखोंसे हीन दीन पिशाचसे दिखायी देंगे। सब प्रजा कलियुगमें इस प्रकार हो जायगी ॥ ४० ॥ कलियुगमें बीस कौड़ियोंके लिये मित्रता छोड़कर परस्पर लड़ेंगे और उसीको धन समझ

शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ ३८ ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरपीडिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोऽन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा भविष्यन्ति कलौ प्रजाः ॥४०॥ कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यन्ति च प्रियान् प्राणान् हनिष्यन्ति स्वकानपि ॥ ४१ ॥ न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान् क्षुद्राः शिश्नोदरम्भराः ॥ ४२ ॥ कलौ न राजञ्जगतां परं गुरुं त्रैलोक्यनाथानतपादपङ्कजम् ॥ प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाखण्डविभिन्नचेतसः ॥ ४३ ॥ यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन्वा विवशो गृणन् पुमान् ॥ विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥ ४४ ॥

कर मरने मारनेको उपस्थित होंगे ॥ ४१ ॥ और अपने माता पिताका पालन नहीं करेंगे, सब अर्थोंसे निपुण पुत्रकी भी रक्षा न करेंगे, केवल स्त्रीसङ्ग और उदरपूर्ण करके सब प्रजा क्षुद्र हो जायगी ॥ ४२ ॥ हे महाराज ! सब सृष्टिके परमगुरु और त्रिभुवनके पति जिनके चरणकमलको ब्रह्मादिक देवता नित्यप्रति नमस्कार करते हैं, ऐसे जगदीश्वर भगवान् अच्युतको कलियुगमें मरनेके समय पाखण्डोंसे दूषित हो बहुत पूजन न करेंगे, कभी रामनवमी, नृसिंहचौदस, जन्माष्टमीको भगवान्‌की पूजा कर लिया करेंगे ॥ ४३ ॥ वा जब मरण

समय आतुर होकर अथवा ऊँचेसे गिरकर वा मार्गमें रपटनेके समय विवश होकर कहेंगे कि 'हे भगवन्!' परन्तु नाम लेते ही वह मनुष्य कर्मबन्धनसे छूटकर परमगतिको प्राप्त होंगे तो भी उन भगवान्का कलियुगमें लोग पूजन नहीं करेंगे ॥ ४४ ॥ हे राजन्! अब कलियुगके सम्पूर्ण दोषोंको दूर करनेका उपाय आपके सामने वर्णन करता हूँ, आप सावधान होकर सुनिये, द्रव्य देश शरीरसे उत्पन्न हुए कलियुगके दोषोंके नाशक पुरुषोत्तम भगवान् मनुष्यके चित्तमें स्थित होकर सब दोषोंको हर लेते हैं ॥४५॥ जो प्राणी परमेश्वरका श्रवण, कीर्त्तन, पूजन, ध्यान और सत्कार करते हैं भगवान् उन पुरुषोंके हृदयमें स्थित होकर दशसहस्र जन्मके पापोंको दूर कर देते हैं ॥ ४६ ॥ जैसे सुवर्ण अग्निसे तप्त होकर और सब धातुओंके मिले हुए मलिनपनको दूर कर देता है ऐसे ही विष्णु भगवान् हृदयमें

पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसम्भवान् ॥ सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥ ४५ ॥ श्रुतः सङ्कीर्तितो ध्यातः पूजितश्चादृतोऽपि वा ॥ नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम् ॥ ४६ ॥ यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हन्ति धातुजम् ॥ एवमात्मगतो विष्णुर्योगिनामशुभाशुभम् ॥ ४७ ॥ विद्यातपः प्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ॥ नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥ ४८ ॥ तस्मात्सर्वात्मना राजन्हृदिस्थं कुरु केशवम् ॥ म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् ॥ ४९ ॥ म्रियमाणैरभिध्येयो भगवान्परमेश्वरः ॥ आत्मभावं नयत्यङ्ग सर्वात्मा सर्वसंश्रयः ॥ ५० ॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः ॥ कीर्त्तनादेव कृष्णस्य मुक्तसंगः परं व्रजेत् ॥ ५१ ॥

स्थित होकर सब अशुभ वासनाओंको कलियुगमें दूर करेंगे ॥४७॥ विद्या अर्थात् अन्यदेवकी उपासना, तप, प्राणायाम, मित्रता, तीर्थ स्नान, व्रत, दान, जप आदिके करनेसे वैसा मन शुद्ध नहीं होता जैसा कि अनन्त भगवान् जब हृदयमें वास करें, तब शुद्ध होता है ॥ ४८ ॥ इसलिये हे राजन्! आपका मरण समय निकट आ गया है, अब आप सब प्रकारसे सावधान हो वसुदेव भगवान्का हृदयमें ध्यान धरो, तब तुम परमगतिको प्राप्त होओगे ॥ ४९ ॥ हे राजन्! जिसकी मृत्यु निकट आ जाय वह सर्वाश्रय, सर्वात्मा सर्वेश्वर भगवान्का ध्यान करें, क्योंकि उनका ध्यान करनेसे आदिपुरुष अविनाशी परमात्माके विषे लय हो जाता है ॥५०॥ हे राजन्! यह महाघोर कलियुग अनेक दोषोंकी

खानि है, परन्तु इसमें भी एक गुण बड़ा भारी है कि इस युगमें केवल परमेश्वरका कीर्त्तन करनेसे ही मनुष्य सम्पूर्ण बन्धनोंसे छूट कर तीन ही दिनमें श्रीकृष्णचन्द्र आनन्दकन्दके परमधामको चला जाता है ॥ ५१ ॥ सत्ययुगमें विष्णु भगवान्के ध्यान करनेसे जो फल प्राप्त होता है, त्रेतामें यज्ञोंके करनेसे जो फल होता है, द्वापरमें परिचर्या करनेसे जो फल होते हैं वे सब फल कलियुगमें केवल हरिके कीर्तनसे ही प्राप्त हो जाते हैं ॥ ५२ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे भाषाटीकायां कलियुगदोषवर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥ दोहा–नैमित्तिक प्राकृतिक अरु, आत्यंतिक औ नित्य। चौथे चार प्रकारके, प्रलय कहूँ हरिचिंत्य ॥ श्रीशुकदेवजी बोले कि हे राजा परीक्षित्! जो कि आपने दो प्रश्न किये थे कि कलियुगका दोष किस उपायसे निवारण हो सकता है? और कलियुगमें कौनसा धर्म मुख्य

कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात् ॥ ५२ ॥ इति श्रीभा० महा० द्वादश० कलिदोषादि व० तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप ॥ कथितो युगमानं च शृणु कल्पलयावपि ॥ १ ॥ चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते ॥ स कल्पो यत्र मनवश्चतुर्दश विशाम्पते ॥ २ ॥ तदन्ते प्रलयस्तावान्ब्राह्मी रात्रिरुदाहृता ॥ त्रयो लोका इमे तत्र कल्पन्ते प्रलयाय हि ॥ ३ ॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥ शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चात्मभूः ॥ ४ ॥ द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय वै ॥ ५ ॥

है, जो पालना चाहिये? इन दोनों प्रश्नोंका उत्तर तो मैंने आपसे वर्णन किया, अब प्रलयकालको निरूपण करता हूँ–परमाणुसे लेकर द्विपरार्द्धतक काल और युगोंके प्रमाण मैं तुमसे पहले कह चुका हूँ अब कल्प और प्रलय (सृष्टिका अन्त) का प्रमाण सुनो ॥ १ ॥ हे प्रजा पालक! युगोंकी सहस्र चौकड़ीका ब्रह्माका एक दिन होता है, उसीको कल्प कहते हैं, जिसमें चौदह मनु राज्य करते हैं ॥ २ ॥ फिर अन्तमें चार सहस्र युगवाली ब्रह्माकी रात्रि होती है, उस रातमें इस त्रिलोकीकी प्रलय हो जाती है ॥ ३ ॥ इस प्रलयको विद्वान् लोग नैमित्तिक प्रलय कहते हैं, इस प्रलयमें विश्वस्रष्टा श्रीनारायण ब्रह्मा सहित त्रिलोकीको अपने उदरमें धारण करके अनन्त भगवान् शेषशय्यापर शयन करते हैं ॥ ४ ॥ अब प्राकृतिक प्रलयका वृत्तांत सुनिये, परमेष्ठी ब्रह्माजीके द्विपरार्द्धका जब अन्त होता है तब महत्तत्त्व

अहंकार और पञ्चतन्मात्रा इन सातों प्रकृतियोंकी प्रलय होती है ॥ ५ ॥ हे राजन् ! इसलिये इस प्रलयको पंडित लोग प्राकृतिक प्रलय कहते हैं, जिस प्रलयमें नाशका कारण प्राप्त होनेसे सातों प्रकृतियां और उनके कार्यरूप सब ब्रह्माण्ड भी लय हो जाते हैं ॥ ६ ॥ हे राजन् ! जब प्रलय होगा उस समय सौ १०० वर्षतक मेघ नहीं वर्षेगा, तब सब पृथ्वी अन्नरहित हो जायगी, उस समय सब प्रजा क्षुधासे पीड़ित हो एक एकको भक्षण करने लगेगी । इस प्रकार कालाधीन हो सहज सहजमें सब नाशको प्राप्त हो जायगी ॥७॥ फिर प्रलयकालका मार्त्तण्ड अपनी प्रचण्ड किरणोंसे समुद्रके और सब शरीरोंके रसोंको खैंच लेगा, किंचिन्मात्र भी नहीं छोड़ेगा ॥ ८ ॥ फिर संकर्षण भगवान्‌के

एष प्राकृतिको राजन् प्रलयो यत्र लीयते ॥ आण्डकोशस्तु संघातो विघांत उपसादिते ॥ ६ ॥ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ॥ तदा निरन्ने ह्यन्योऽन्यं भक्ष्यमाणाः क्षुधार्दिताः ॥ क्षयं यास्यन्ति शनकैः कालेनोपद्रुताः प्रजाः ॥ ७ ॥ समुद्रं दैहिकं भौमं रसं सांवर्त्तको रविः ॥ रश्मिभिः पिबते घोरैः सर्वं नैव विमुञ्चति ॥ ८ ॥ ततः संवर्तको बह्निः संकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ ॥ ९ ॥ उपर्यधः समन्ताच्च शिखाभिर्वह्निसूर्ययोः ॥ दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत् ॥ १० ॥ ततः प्रचण्डपवनो वर्षाणामधिकं शतम् ॥ परः संवर्तको वाति धूम्रं खं रजसा वृतम् ॥ ११ ॥ ततो मेघकुलान्यङ्ग चित्रवर्णान्यनेकशः ॥ शतं वर्षाणि वर्षन्ति नदन्ति रभसस्वनैः ॥ १२ ॥ तदा भूमेर्गन्धगुणं ग्रसन्त्याप उदप्लवे ॥ ग्रस्तगन्धा तु पृथिवी प्रलयत्वाय कल्पते ॥ १३ ॥

